MSS No. 268 Subject Philosophy

Name of MSS मध्य सिद्दान्त कौमुदी

Author

Period Folios

Script Sanskrit Source Prithi pal singh

Missing Folios

268

268

मध्य सिध्दान्त कौमुदी ॥ वरद
राजकृत
२१२ पत्रक ॥ ल० म० ८ पं० ध्र० पू

ह० ल०



268

१००

प्रश्नकौमुदी

[illegible]

[illegible]

[illegible]

[illegible]

म॰ सि॰ कौ॰ २

ॐ श्रीगणेशायनमः ॐपरमात्मनेनमः नत्वावरदराजः श्रीगुरून्भट्टोजिदीक्षितान्
करोतिपाणिनीयानांमध्यसिद्धांतकौमुदीं १ अइउण् ऋऌक् एओङ् ऐऔच् हयवरट् ल
ण् ञमङणनम् झभञ् घढधष् जबगडदश् खफछठथचटतव् कपय् शषसर् ह
ल् इतिमाहेश्वराणिसूत्राण्यणादिसंज्ञार्थानि हकारादिष्वकारः उच्चारणार्थः लण्
मध्येत्वित्संज्ञकः हकारोद्विरुपात्तोयमटिशल्यपिवांछता मर्हणार्थवदित्यत्रद्वयंसि
द्धंभविष्यति हलंत्यं उपदेशेंत्यंहलित्स्यात् उपदेशआद्योच्चारणं सूत्रेष्वदृष्टंपदंसूत्रान
रादनुवर्तनीयंसर्वत्र अदर्शनंलोपः प्रसक्तस्यादर्शनंलोपसंज्ञंस्यात् तस्यलोपः तस्येतो
लोपःस्यात् णादयोणाद्यर्थाः आदिरंत्येनसहेता अंत्येनेतासहितआदिर्मध्यगानांस्वस्य १

चसंज्ञा स्यात् यथा णितिग्रअइउवर्णानांसंज्ञा एवमच्हल्अल्इत्यादयः ऊकालोऽज्ह्रस्व
दीर्घप्लुतः उश्चऊश्चऊ३श्च वः वांकालइवकालोयस्यसोच् क्रमाद्ध्रस्वदीर्घप्लुतसंज्ञः स्यात् स
प्रत्येकमुदात्तादिभेदेनत्रिधा उच्चैरुदात्तः ताल्वादिषुसभागेषुस्थानेषूर्द्धभागेनिष्प
न्नोजुदात्तसंज्ञःस्यात् नीचैरनुदात्तः समाहारःस्वरितः उदात्तानुदात्तत्वेवर्णधर्मैसमाहृये
तेयस्मिन्सोच्स्वरितसंज्ञास्यात् सनवविधोपिप्रत्येकमनुनासिकत्वाननुनासिकत्वाभ्यांद्वि
तुनाः धामुखनासिकावचनोनुनासिकः मुखसहितनासिकयोच्चार्यमाणोनुनासिकःस्यात् तदि
त्थं अइउऋ एषांप्र प्रत्येकमष्टादशभेदाः ऌवर्णस्यद्वादशतस्यदीर्घाभावात् एचामपि
द्वादशतेषांह्रस्वाभावात् तुल्यास्यप्रयत्नंसवर्णं ताल्वादिस्थानमाभ्यंतरप्रयत्नश्चेत्येतद्द्व

पंयस्ययेनतुल्यंतन्मिथःसवर्णंस्यात् ऋॡवर्णयोर्मिथःसावर्ण्यंवाच्यं अकुहविसर्जनीयानां
कंठः इचुयशानांतालु ऋटुरषाणांमूर्द्धा लृतुलसानांदंता उपूपध्मानीयानामोष्ठौ ञमङ
णनानांनासिकाच एदैतोःकंठतालु ओदौतोःकंठोष्ठं वकारस्यदंतोष्ठं जिह्वामूलीयस्य
जिह्वामूले नासिकानुस्वारस्य अष्टौस्थानानिवर्णानामुरःकंठःशिरस्तथा जिह्वामूलंचदंता
श्चनासिकोष्ठौचतालुच १ यत्नोद्विधा आभ्यंतरोबाह्यश्च आद्यःपंचधा स्पृष्टेष त्स्पृष्टेषद्वि
वृतसंवृतभेदात् तत्रस्पृष्टंप्रयत्नंस्पर्शानां ईषत्स्पृष्टमंतःस्थानां ईषद्विवृतमूष्मणां विवृ
तंस्वराणां ह्रस्वस्यावर्णस्यप्रयोगेसंवृतं प्रक्रियादशायांतुविवृतमेव बाह्यस्त्वेकादशधा
विवारःसंवारःश्वासोनादोघोषोऽघोषोऽल्पप्राणोमहाप्राणउदात्तोऽनुदात्तःस्वरि

तस्येति खरोविवारःश्वासोऽघोषश्च हशःसंवारः नादोघोषश्च वर्गाणांप्रथमतृतीय
पंचमायणश्चाल्पप्राणाः अन्येमहाप्राणाः कादयोमावसानाःस्पर्शाः यणोंतस्थाः
शलऊष्माणाः अचःस्वराः ≍क≍ख इतिकखाभ्यांप्रागर्द्धविसर्गसदृशोजिह्वामूलीयः ≍
प≍फ इतिपफाभ्यांप्रागर्द्धविसर्गसदृशउपध्मानीयः अंअः इत्यचःपरावनुस्वारविसर्गौ
अणुदित्सवर्णस्यचाप्रत्ययः अविधीयमानोऽणुदिच्चसवर्णस्यसंज्ञास्यात्
अत्रैवाणपरेणणकारेण कुचुटुतुपुवर्गाः एतेउदितः तदेवमइत्यष्टादशानांसंज्ञा
तथेकारोकारौ ऋकारस्त्रिंशत एवंऌकारोपि एचोद्वादशानां अननुनासिकाननुना
सिकभेदेनयवलाद्विधा तेनाननुनासिकास्तेद्वयोर्द्वयोःसंज्ञा परःसन्निकर्षःसंहि

म॰सि॰
कौ॰
३
3

ता वर्णानामतिशयितः संनिधिः संहितासंज्ञा स्यात् हलोनंतराः संयोगः अज्भिरव्यवहि
ता हलः संयोगसंज्ञाः स्युः सुप्तिङंतं पदं सुबंतं तिङंतं च पदसंज्ञं स्यात् इति संज्ञाप्रक
रणम् इकोयणचि इकः स्थाने यण् स्यादचि संहितायां विषये सुधीउपास्य इति स्थिते त
स्मिन्निति निर्दिष्टे पूर्वस्य सप्तमीनिर्देशेन विधीयमाने कार्यं वर्णांतरेणाव्यवहितस्य पू
र्वस्य ज्ञेयं स्थानेंतरतमः प्रसंगे सति सदृशतम आदेशः स्यात् सुध्य्उपास्य इति स्थिते
अनचि च अचः परस्य यरो द्वे वा स्तो नत्वचि झलां जश् झशि इति धस्य दः संयोगांतस्य
लोपः संयोगांतं यत्पदं तस्य लोपः स्यात् अलोंत्यस्य षष्ठीनिर्दिष्टोंत्यस्यादेशः इति प्राप्ते
यणः प्रतिषेधो वाच्यः अज्झीनं परेण संयोज्यं सुद्ध्युपास्यः मद्ध्वरिः धात्त्रंशः लाकृति ३

अचोरहाभ्यां द्वे अचः पराभ्यां रेफहकाराभ्यां परो देवास्तः हर्य्यनुभवः अचो अयप्रश्च आपृश्रा
वृपतेस्वरवियथासंख्यमनुदेशः समानां समसंबंधी विधिर्यथासंख्यं स्यात् हरये विष्णवे नाय
कः पावकः वांतो यि प्रत्यये यादौ प्रत्यये परे ओदौतोरवावौ स्तः गव्यं नाव्यं अध्वपरमाणे
च गव्यूतिः स्त्रीकोशयुगं धातोस्तन्निमित्तस्यैव यादौ प्रत्यये परे धातोरेचश्चेद्वांतादेशस्तर्हि
तन्निमित्तस्यैव नान्यस्य लव्यं अवश्यलाव्यं तन्निमित्तस्य किं ओयते औयते क्षय्यजय्यौ श
क्यार्थे यांतादेशनिपातनार्थमिदं क्षय्यं जय्यं शक्यार्थे किं क्षेतुं जेतुं योग्यं क्षेयं जेयं पा
यं मनः क्रय्यस्तदर्थे क्रेतारः क्रीणीयुरिति बुद्ध्या आपणे प्रसारितं क्रय्यं क्रेयमन्यत् क
यणादिमित्यर्थः अदेङ्गुणः अदेङ् च गुणसंज्ञः स्यात् तपरस्तत्कालस्य तपरस्तात्परो वा उच्चा

म· सि· कौ· ४ ५

येमाणोसमकालस्सैवसंज्ञास्यात् एकःपूर्वपरयोरित्यधिकृत्य आद्गुणः अवर्णादचिपरेपूर्वप
रयोरेकोगुणआदेशःस्यात् उपेंद्रः रमेशः गंगोदकं उपदेशोऽजनुनासिकइत् [illegible]
[illegible] उपदेशेऽजनुनासिकइत् उपदेशेऽनुनासिकोजित्संज्ञास्यात् प्रतिज्ञानुनासिक्याःपा
णिनीयाः लण्सूत्रस्थावर्णेनसहोच्चार्यमाणोरेफोरलयोःसंज्ञा उरण्रपरः ऋइतित्रिंश
तःसंज्ञेत्युक्तंतत्स्थानेयोऽण्सरपरः सन्नेवप्रवर्त्तते कृष्णर्द्धिः तवल्कारः लोपःशाकल्यस्य अ
वर्णपूर्वयोःपदांतयोर्यवयोर्वालोपोऽशिपरे पूर्वत्रासिद्धं सपादसप्ताध्यायींप्रतित्रिपाद्य
सिद्धात्रिपाद्यामपिपूर्वंप्रतिपरंशास्त्रमसिद्धं हरइह हरयिह विष्णविति वृद्धिरादैच्
आदैचवृद्धिसंज्ञास्यात् वृद्धिरेचि आदेचिपरेवृद्धिरेकादेशोगुणापवादः कृष्णैकत्वं गंगौ ४

च्चः देवैश्वर्यं कृष्णैकत्वं एते यत्र दृश् अवर्णादेजाद्योरेत्येधत्यूहरूठि च परे पूर्वपरयोर्वृद्धिरे
कादेशः उपैति उपैधते प्रष्ठौहः पत्राद्योः किं उपेतः माभवान्प्रेयत स्वादीरेरिणोः स्वैरं
स्वैरिणी अक्षादूहिन्यां अक्षौहिणीसेना प्रादूहोढोढ्येषैष्येषु प्रौहः प्रौढः प्रौढिः प्रै
षः प्रैष्यः ऋते च तृतीयसमासे सुखेन ऋतः सुखार्तः तृतीयेति किं परमर्तः प्रवत्स
तरकंबलवसनार्णदशानामृणे प्रार्णमित्यादि उपसर्गाः क्रियायोगे प्रादयः क्रि
यायोगे उपसर्गसंज्ञाः स्युः प्र परा अप् सम अनु अव निस् निर् दुस् दुर् वि आ
ङ् नि अधि अपि अति सु उत् अभि प्रति परि उप् एते प्रादयः चादयोऽधातवः क्रि
यावाचिनोऽन्ये चादयो धातुसंज्ञास्युः आदुपसर्गादृति धातौ अवर्णान्तादुपसर्गादृकारादौ

म॰ सि॰
कौ॰
५
5

यातोपरेवृद्धिरेकादेशःस्यात् प्रार्छति वासुप्यापिशलेः आङुपसर्गादृकारादौसुब्धातौ
वृद्धिर्वा आपिशलिग्रहणंपूजार्थं अचोरहाभ्यां द्वेयस्मेवाद्धतिप्राप्ते प्रारोचिद्दे न प्रार्षभी
यति एङिपररूपंआङुपसर्गादेङादौधातौपररूपमेकादेशः प्रेजति उपोषति अचोम अचोन्त्यादिटि
ध्येयोन्त्यःसआदिर्यस्यतट्टिसंज्ञंस्यात् शकंध्वादिषुपररूपंवाच्यं तच्चटेः शकंधुः कर्कं
धुः कुलटा सीमंतः केशवेशे सीमांतोन्यः मनीषा हलीषा पतंजलिः सारंगः प
शुपक्षिणोः सारंगोन्यः आकृतिगणोयं एवेचानियोगे क्वेवभोक्ष्यसे अनियोगेकिं त
वैव ओत्वोष्ठयोःसमासेवा स्थूलोतुः स्थूलौतुः बिंबोष्ठः बिंबौष्ठः समासेकिं तवौष्ठः ओ
माङोश्च अवर्णान्तादोमिआङिचपरेपररूपमेकादेशःस्यात् शिवायोंनमः शिवेहि शि प॰ ५

वेदिस्प्रकः सवर्णेदीर्घः एकादेशः स्यात् दैत्यारिः श्रीशः विष्णूदयः होतृकारः एङः पदांताद
ति पदांतादेङोतिपरे पूर्वरूपमेकादेशः हरेव विष्णोव सर्वत्रविभाषागोः लोकेवेदेचैङंतस्यगो
रतिवाप्रकृतिभावः पदांते गोअग्रं गोग्रं एङंतस्य किं चित्रग्वग्रं पदांतेकिं गोः अनेकालशि
न्त्वर्वस्य इतिप्राप्ते ङिच्च ङिदनेकालप्यंतस्यस्यात् अवङ्स्फोटायनस्य पदांतेएङंतस्यगोरवङ्
वाग्वि गवाग्रं पदांतेकिं गवि इंद्रेच गोरवङिंद्रेच सर्वेङः अवस्थितविभाषया गवाक्षः दूराद्धू
तेच दूरात्संबोधनेवाक्यस्य टेरप्लुतोवा प्लुतः प्रगृह्याअचि नित्यं एतेविप्रकृत्याः गाछकृष्ण ३ अत्र
गोस्युरति ह्रस्वंलघुः संयोगेगुरुः संयोगेपरेह्रस्वंगुरुसंज्ञंस्यात् दीर्घंचगुरुः स्यात् गुरोरनृतो
रनंतस्याप्येकैकस्यप्राचां दूराद्धूतेयद्वाक्यंतस्य ऋकद्भिन्नस्यानंत्यस्यापिभ्रोवाप्लुतदे ३ वदत देवदा

म. सि.
कौ.
९
6

३ त्र देवदत्ता३ गतोः किं वकारादकारस्य माभूत् अन्ततः किं कृष्णा३ एकैकग्रहणं पर्यायार्थं १ ईदूदेद्द्विवचनं प्रगृह्यं १
हरेदेदंतं द्विवचनं प्रगृह्यसंज्ञंस्यात् हरी एतौ विष्णू इमौ गंगे अमू मणीवोष्ट्रस्येति त्विवार्थे वशब्दो
वा शब्दो वा बोध्यः अदसो मात् अस्मात्परावीदूतौ प्रगृह्यौ स्तः अमी ईशाः रामकृष्णाव मू आसा
ते मात्किं अमुकेत्र असति माङ्ग्रहणे एकारोपि प्रगृह्य वर्जित चादयोऽसत्वे अद्रव्यार्थाश्चादयो
निपातसंज्ञास्युः प्रादयः एतेपि तथा वक्ष्यमाणलक्षणं यत्र सर्वनाम्नः प्रयुज्यते द्रव्यमित्युच्यते सो
ऽर्थो भेद्यत्वेन विवक्षितः निपात एकोजनाङ् एकोज्निपात आङ् वर्जः प्रगृह्यः इ इंद्रः उ उमेशः
वाक्यस्मरणयोरङित् आ एवं मन्यसे आ एवं किलतत् अन्यत्र ङित् ईषदुष्णं ओष्णं ओत् ओदंतो नि, ओत्स १
पातः प्रगृह्यः अहो ईशाः संबुद्धौ शाकल्यस्येतावनार्षे संबुद्धनिमित्तक ओंकारो वा प्रगृह्यो ९

वैदिके इत्यतो विष्णो इति विष्णविति विष्ण इति मय उञो वो वा मयः परस्य ञो वो वा स्यादचि
किमु उक्तं इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च पदान्ता इको ह्रस्वो वा स्यादसवर्णेऽचि ह्रस्वविधिसाम
र्थ्यान्न स्वरसंधिः चक्रि अत्र चक्र्यत्र पदान्ताः किं गौर्यौ न समासे वाप्यश्वः ऋत्यकः ऋ
ति परे पदान्ता अकः प्राग्वत् ब्रह्म ऋषिः ब्रह्मर्षिः पदान्ताः किं आर्च्छत् इति स्वरसंधिः स्तो
श्चुना श्चुः सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः हरिश्शेते रामश्चि
नोति सच्चित् शार्ङ्गिञ्जयः शात् शान्स्य सोऽक्तेन विश्नः प्रश्नः ष्टुना ष्टुः स्तोः ष्टुना योगे ष्टुः स्या
त् रामष्षष्ठः रामष्टीकते पेष्टा तट्टीका चक्रिण्ढौकसे न पदान्ताट्टोरनाम् पदान्ताट्टवर्गात्
परस्यानामः स्तोः ष्टुर्न षट् सन्तः षट् ते पदान्तात् किं ईट्टे टोः किं सर्पिष्टमं अनाम्नवतिनगरीणामिति

म॰सि॰
कौ॰
७
7

वाक्षं षण्णवतिः षण्णगर्यः तोःषि नष्टुत्वं सन्षष्ठः झलांजशोंते पदांतेझलांजशःस्युः
वागीशः यरोनुनासिकेनुनासिकोवा यरःपदांतस्यानुनासिकेपरेनुनासिकोवा एतन्मु
रारिः प्रत्ययेभाषायांनित्यं तन्मात्रं चिन्मात्रं तोर्लि परसवर्णः तल्लयः विद्वाँल्लिख
ति नस्यानुनासिकोलः उदःस्थास्तंभोःपूर्वस्य उदःपरयोःस्थास्तंभोःपूर्वसवर्णः तस्मादि
त्युत्तरस्य पंचमीनिर्देशेनक्रियमाणंकार्यंवर्णांतरेणाव्यवहितस्यपरस्यज्ञेयं आदेःप
रस्य परस्ययद्विहितंतत्तस्यादेर्बोध्यं अत्राघोषमहाप्राणस्यसस्यतादृशएवथकारः
इतिसस्यथ झरोझरिसवर्णे हलोपरस्यझरोलोपोवासवर्णेझरि खरि
च खरिपरेझलांचरःस्युः उत्सस्योदस्यतः उत्थानं उत्तंभनं झयोहोन्यतरस्यां झयःपर

स्यहस्यवापूर्वसवर्णः मादस्यझयोयस्यमहाप्राणस्यहस्यतादृशोवर्गचतुर्थः वाग्घरिः वा
ग्हरिः शश्छोटि पदांतात्झयःपरस्यशस्यछोवाटि तच्छिवः तचशिवः पदांतात्किं विशे
छत्वममीतिवाच्यम् तच्छ्लोकेन मोनुस्वारः मांतस्यपदस्यानुस्वारोहलि हरिंवंदे पदस्ये
तिकिंगम्यते नश्चापदांतस्यझलि नस्यमस्यचापदांतस्यझल्यनुस्वारः यशांसि आक्रं
स्यते झलिकिंमन्यते अनुस्वारस्ययियरसवर्णः शान्तः वापदांतस्य त्वंकरोषि त्वंक
रोषि मोराजिसमःक्वौ क्विवंतेराजतौपरेसमोमस्यमएवस्यात् सम्राट् हेमपरेवा म
परेहकारेमस्यमोवा किमह्मलयति किंह्मलयति यवलपरेयवलावा किंय्ह्यः किंह्यः
किंव्ह्वलयति किंह्वलयति किंल्ह्लादयति किंह्लादयति नपरेनः नपरेहकारेम

स्यनोवा किलङ्कृते ङःसिधुट् ङान्परस्यसस्यधुड्वा आद्यंतौटकितौ टित्कितौयस्योक्तौतस्यक्रमा
दाद्यंतावयवौस्तः षट्त्संतः षट्संतः ङ्णोःकुक्टुक्शरिवास्तः प्राङ्क्षष्ठः प्राङ्षष्ठः प्रा
ङ्षष्ठः सुगण्ट्षष्ठः सुगण्षष्ठः नश्च नांतात्परस्यसस्यधुड्वा सन्त्सः सन्सः शि
तुक् पदांतस्यनस्यशितुग्वा सञ्च्छंभुः सञ्छंभुः सञ्च्शंभुः सञ्शंभुः ञ्छौ ञ्च
शौ ञ्चशौ ञ्शाविति चतुष्टयंरूपाणामिष्टं तुक्छत्वचलोपानांविकल्पनात् ङमो
ह्रस्वादचिङमुण्नित्यं ह्रस्वात्परोयोङम् तदंतं यत्पदं तस्मात्परस्याचोनित्यंङमुट् प्रत्य
ङ्ङात्मा सुगण्णीशः सन्नच्युतः समःसुटि समोरुःस्यात्सुटि अत्रानुनासिकःपूर्व
स्यतुवा अत्ररुप्रकरणेरोःपूर्वस्यानुनासिकोवा अनुनासिकात्परोऽनुस्वारः अनुना ८

सिके विहायसः पूर्वस्मात्परो ऽस्मात्रागमः खरवसानयोर्विसर्जनीयः खरि अवसाने च पदांत
स्यरस्य विसर्गः इति प्राप्ते संपुंकानां सो वक्तव्यः सँस्स्कर्त्ता संस्स्कर्त्ता पुमः खय्यम्परे अम्परे खय्य
यि पुमो रुः पुँस्कोकिलः पुंस्कोकिलः नश्छव्यप्रशान् अम्परे छवि नांतस्य रुः पदांते
विसर्जनीयस्य सः खरि चक्रिँस्त्रायस्व चक्रिंस्त्रायस्व अप्रशान् किं प्रशान् नानोति पदांते
किं ह इति नृन्पे नृ इति नस्य रुर्वा पे कुप्वोः ᳲकᳲपौ च कवर्गे पवर्गे च विसर्गस्य ᳲकᳲपौ स्तः
चाद्विसर्गः नृँः पाहि नृं पाहि नृँᳲपाहि नृंᳲपाहि नृन्पाहि सोपदादौ विसर्गस्य सः स्यात्
पदाद्योः कुप्वोः पयस्पाशं पयस्कल्पं यशस्के यशस्काम्यति अनव्ययस्येति वाच्यं प्रातः
कल्पं कामे रोरेवेति वाच्यम् नेह गीःकाम्यति इणः षः इणः परस्य विसर्गस्य षः पूर्ववि

म॰ सि॰ कौ॰ ६ 9

षये सर्पिष्पाशं सर्पिष्कल्पं सर्पिष्कं सर्पिष्काम्यति कस्कादिषु च एष्विण उत्तरस्य विसर्ग
स्य षः स्यादन्यस्य तु सः कस्कः कौतस्कुतः सर्पिष्कुण्डिका धनुष्कपालमित्यादि आकृतिग
णोयं नस्य परमाम्रेडिते द्विरुक्तस्य परमाम्रेडितं स्यात् कानाम्रेडिते कान्नकारस्य रुः स्या
दाम्रेडिते कांस्कान् कांस्कान् छे च ह्रस्वस्य छे तुक् ग्रच्छा आङ्माङोश्च तुक् छे आच्छादय
ति माच्छिदत् दीर्घात् तुक् छे म्लेच्छति पदान्ताद्वा दीर्घात्पदान्तात् छे तुग्वा लक्ष्मीच्छा
लक्ष्मीछाया इति हल्संधिः विसर्जनीयस्य सः खरि विसर्जनीयस्य सः शर्परे विसर्जनीयः
शर्परे खरि विसर्गस्य विसर्ग एव न त्वन्यत् कः त्सरुः घनाघनः क्षोभनः वा शरि शरि वि
सर्गस्य विसर्गो वा हरिः शेते हरिश्शेते खर्परे शरि वा विसर्गलोपो वक्तव्यः हरि ६

स्फुरति हरिःस्फुरति ससजुषोःरुः पदान्तस्य सस्य सजुषश्च रुःस्यात् अतोरोरप्लुतादप्लुते अ
प्लुतादतःपरस्यरोरुःस्यात् अप्लुतेसौजसमैहितिहयन्ययेःकृते शिवस्यअर्च्यइतिस्थिते
शिवोर्च्यः अतःकिंदेवा अत्रअतिकिंस्वआगेन अप्लुतात्किं एहिकृष्णोता३ अत्रत्ताहि स्व
तस्यासिद्धत्वादतःपदीयंअप्लुतादिति विशेषणोतनत्सामर्थ्यान्त्रासिद्धत्वे नपरकरणस्यत
तसामर्थ्यदीर्घनिवृत्याचरितार्थत्वात् अप्लुतेति किं तिष्ठतुपय आग्निदत्त हसिव तथा
शिवोवेद्यः भोभगोअघोअपूर्वस्य योशि एतस्पूर्वस्यरोर्यादेशोशि देवाइह देवायिह भो
सभगोसघ्अघोस् इतिसांतानिपाताः तेषांरुत्वेयत्वेचकृतेव्योर्लघुप्रयत्नतरः शाकटाय
नस्य अशिपदान्ते व्योतोगार्ग्यस्य गार्ग्यग्रहणंपूजार्थं पदान्तस्यालघुप्रयत्नस्यनित्यं।

म. सि.
कौ.
९
10

लोपः भोयच्युत लघुप्रयत्नपदे भोयच्युत पदांतस्य किं तोये हलि सर्वेषां भोभगोअघोअ
पूर्वस्य यस्य लोपः स्याद्धलि भोदेवाः भगोनमस्ते अघोयाहि देवायांति रोऽसुपि अह्नोरेफादे
शोनतुरुः अहरहः अहर्गणः असुपि किं अहोभ्यां अत्राहन्निति रुत्वं रूपरात्रिरथं
तरेषु रुत्वं वाच्यम् अहोरूपं गतमहोरात्रिरेषा एकदेशविकृतन्यायेनाहोरात्र अहोरथं
तरं अहरादीनां पत्यादिषु वा रेफो विसर्गापवादः अहर्पतिः गीर्पतिः धूर्पतिः पक्षे
विसर्गोपध्मानीयौ रोरि रेफस्य रेफे लोपः ढ्रलोपे पूर्वस्य दीर्घोऽणः ढरेफयोर्लोपनि
मित्तयोः पूर्वस्याणो दीर्घः पुनारमते अणः किं तृढः मनसरथ इत्यत्र रुत्वे हशि चे
त्वेरोरीतिलोपे च प्राप्ते विप्रतिषेधे परं कार्यम् तुल्यबलविरोधे परं कार्यं स्यात् इति ९

लोपेप्राप्तेपूर्वत्रासिद्धमिति रोरीत्वस्यासिद्धत्वादुत्वमेव मनोरथः एतत्तदोःसुलोपोकोरनञ्स
मासेहलि अककारयोरेतत्तदोर्य रुःसस्यलोपोहलिनञ्समासेन एषविष्णुः सएषशंभुः अ
कोःकिं एषकोरुद्रः अनञ्समासेकिं असःशिवः हलिकिं एषोत्र सोचिलोपेचेत्पादपूरणं
सइत्यस्यसोर्लोपःस्यादचिपादश्चेल्लोपेसत्येवपूर्येत सेमाममविदिप्रभृतिं सेषदाशरथी
रामः सैषराजायुधिष्ठिरः सैषकर्णोमहात्यागी सैषभीमोमहाबलः । इतिविसर्गसंधिः
अर्थवदधातुरप्रत्ययःप्रातिपदिकं धातुंप्रत्ययंप्रत्ययांतंचवर्जयित्वा अर्थवच्छब्दरूपंप्रा
तिपदकसंज्ञंस्यात् कृत्तद्धितांतौसमासाश्चतथासुः स्वौजसमौट्छष्टाभ्यांभिस्ङेभ्यांभ्यस्
ङसिभ्यांभ्यस्ङसोसांङ्योस्सुप् सुऔजसितिप्रथमा अमौशस्द्वितीया टाभ्यांभिसस्तृतीया ङेभ्यां

ल·सि·
कौ·
११

भ्यस्चतुर्थी ङसिभ्यांभ्यस् (पंचमी) ङस्ओसाम्षष्ठी ङिओस्सुप्सप्तमी ङ्याप्प्रातिपदिकात्
ङ्यन्तादाबन्तात्प्रातिपदिकाच्चपरेस्वादयः प्रत्ययाःस्युः सुपः सुपस्त्रीणित्रीणिवचनान्येक
शएकवचनद्विवचनबहुवचनसंज्ञानिस्युः द्व्येकयोर्द्विवचनैकवचने द्वित्वैकत्वयोरेते
(खरवसानयोर्विसर्जनीयः)
स्तः विरामोवसानं वर्णानामभावोवसानसंज्ञःस्यात् रुत्वविसर्गौरामः सरूपाणामे
कशेषएकविभक्तौ एकविभक्तौयानिसरूपाण्येवदृष्टानितेषामेकएवशिष्यते प्रथ
मयोःपूर्वसवर्णः अकःप्रथमाद्वितीय योरचिपूर्वसवर्णदीर्घएकादेशःस्यात् इतिप्रा
प्ते नादिचि आदिचिपूर्वसवर्णदीर्घः नवृद्धिरेचि रामौ बहुषुबहुवचनम् चुटू प्रत्ययाद्यौ
चुटूइतौस्तः विभक्तिश्च सुप्तिङौविभक्तीस्तः नविभक्तौतुस्माः विभक्तिस्थास्तवर्गसमा ॥

नेनः इतिसस्यन रामाः एकवचनेसंबुद्धिः संबोधनेप्रथमायाएकवचनंसंबुद्धिःस्यात् य
स्मात्प्रत्ययविधिस्तदादिप्रत्ययेंऽगंयः प्रत्ययस्मात्क्रियतेतदादिशब्दरूपंतस्मिन्प्रत्ययेपरेंऽगसं
संज्ञंस्यात् एङ्ह्रस्वात्संबुद्धेः एङंताद्ध्रस्वांताच्चांगात्परस्य लुप्यते संबुद्धेश्चेत् संबोधनद्योतना
र्थं हेशब्दःप्राक्प्रयुज्यते हेराम हेरामौ हेरामाः अमिपूर्वः अकोऽमिपरेपूर्वरूपमेकादेशः
रामं रामौ लशक्वतद्धिते तद्धितवर्जप्रत्ययाद्यालशाःकवर्गाश्चेतःस्युः तस्माच्छसोनःपुंसि
पूर्वसवर्णदीर्घात्परस्य शसः सस्यनःस्यात् पुंसि अट्कुप्वाङ्नुम्व्यवायेपि अट् कव
र्गः पवर्गः आङ् नुम् एतैर्व्यस्तैर्यथासंभवंमिलितैश्चव्यवधानेपिरषाभ्यांपरस्यनस्यणः
स्यात् समानपदेइतिप्राप्ते पदांतस्यनस्यणोन रामान् टाङसिङसामिनात्स्याः अदं

म॰ सि॰
कौ॰
१२
12

नाद्यादीनामिनादयःस्युः णत्वं रामेण सुपि च यञादौ सुपि परे तोंगस्य दीर्घः रामाभ्यां अतो
भिस ऐस् अनेकाल्शित्सर्वस्य रामैः ङेर्यः अतोंगात्परस्य ङेर्यादेशः स्थानिवदादेशोनल्वि
धौ इति आदेशःस्थानिवत्स्यान्नतुस्थान्यलाश्रये विधौ वर्णमात्राश्रितोविधिरल्विधिः इति स्था
निवत्त्वात्सुपि चेति दीर्घः रामाय रामाभ्यां बहुवचने झल्येत् झलादौ बहुवचने सुप्यतोंग
स्य एकारः रामेभ्यः सुपि किं पचध्वे वावसाने अवसाने झलां चरो वा रामात् रामाभ्यां
रामेभ्यः रामस्य ओसि च अतोंगस्यैकारः रामयोः ह्रस्वनद्यापो नुट् ह्रस्वांतान्नद्यंतादा
बंताच्चांगात् परस्यामो नुडागमः नामि अजंतांगस्य दीर्घः रामाणां रामे रामयोः एत्वे कृ
ले आदेशप्रत्यययोः इण्कुभ्यां परस्यापदांतस्यादेशः प्रत्ययावयवश्च यः सस्तस्य षः स्या १२

सर्वादीनिसर्वनामानि

देशः ईषद्दिष्टुतत्नस्यसस्थानादेशप्रवृषः शेषेषु एवंकृष्णादयोप्यदंताः सर्वादीनिसर्वनामा
निसर्वनामसंज्ञानिस्युः सर्वविश्वउभउभयडतरडतमअन्यअन्यतरइतरत्वत्वनेमसम
सिमसर्वपूर्वापरावरदक्षिणोत्तरापराधराणिव्यवस्थायामसंज्ञायां स्वमज्ञातिधनाख्यायां अं
तरंबहिर्योगोपसंव्यानयोः त्यद् तद् यद् एतद् इदम् अदस् एक द्वि युष्मद् अस्मद् भवतु कि
म् जसः शी अदंतात्सर्वनाम्नो जसः शी अनेकाल्त्वात्सर्वादेशः सर्वे सर्वनाम्नः स्मै अतः
सर्वनाम्नो ङे स्मै सर्वस्मै ङसिङ्योः स्मात्स्मिनौ अतः सर्वनाम्नाः एतयोरेतौ सर्वस्मात् आमि
सर्वनाम्नः सुट् अवर्णांतात्परस्य सर्वनाम्नो विहितस्यामः सुडागमः एत्वषत्वे सर्वेषां सर्वस्मि
न् शेषं रामवत् एवं विश्वादयोप्यदंताः उभशब्दो नित्यं द्विवचनांतः उभौ २ उभाभ्यां ३ उ

म॰सि॰
कौ॰
१३
13

भयोः २ नेत्येह पाठोऽकजर्थः उभयशब्दस्य द्विवचनं नास्तीति कैयटः अस्तीति हरदत्तः उभयः
उभये उभयं उभयान् उभयेन डतरडतमौ प्रत्ययौ ग्रहणे तदन्तग्रहणमिति तदन्ता ग्राह्याः ने
मइत्यर्द्धे समः सर्वपर्यायः तुल्यपर्यायस्य तु न समानामिति ज्ञापकात् पूर्वपरावरदक्षिणोत्तरा
पराधराणि व्यवस्थायामसंज्ञायां एतेषां व्यवस्थायामसंज्ञायां सर्वनामसंज्ञा गणसूत्रात् सर्व
त्र या प्राप्ता सा जसि वा पूर्वे पूर्वाः स्वमज्ञातिधनाख्यायां ज्ञातिधनान्यवाचिनः स्वशब्दस्य प्रा
प्ता संज्ञा जसि वा स्वाभिधेयापेक्षावधिनियमो व्यवस्था अवस्थायां किं दक्षिणा गाथकाः
कुशला इत्यर्थः असंज्ञायां किम् उत्तराः कुरवः स्वे स्वाः आत्मीयाः आत्मान इति वा ज्ञातिधनवा
चिनस्तु स्वाः ज्ञातयोऽर्था वा अन्तरं बहिर्योगोपसंव्यानयोः वाह्ये परिधानीये चार्थे अन्तरशब्द १३

सप्राप्तासंज्ञाजसिवा अंतरे अंतराः वाग्रहावाह्याद्यर्थः अंतरे अंतराः वा शाटकाः परि
धानीयाद्यर्थः पूर्वादिभ्यो नवभ्यो वा ङसिङ्योस्स्मात्स्मिनौ वा स्तः पूर्वस्मात् पूर्वात् पूर्व
स्मिन् पूर्वस्मिन् पूर्वे एवं परादीनामपि शेषं सर्ववत् संज्ञोपसर्जनीभूतास्तु न सर्वादयः
सर्वो नाम कश्चित् तस्मै सर्वाय देहि अतिक्रांतः सर्वमति सर्वस्तस्मै अतिसर्वाय अंतरमिति
गणसूत्रे पुरीति वक्तव्यम् अंतरायां पुरि तृतीयासमासे सर्वनामता न मासपूर्वाय तृतीया
सर्वा मासार्थे वाक्येपि न मासेन पूर्वाय द्वंद्वे च उक्ता संज्ञा न वर्णाश्रमेतराणां विभाषा जसि
वर्णाश्रमेतरे वर्णाश्रमेतराः प्रथमचरमतयाल्पार्द्धकतिपयनेमाश्च एते जसुक्तसंज्ञा वा स्युः
प्रथमे प्रथमाः तयः प्रत्ययः द्वितये द्वितयाः शेषं रामवत् नेमे नेमाः शेषं सर्ववत् ती

म॰ सि॰ कौ॰ १४ 14

यस्यादि स्कृत्वा द्वितीयस्मै द्वितीयाय इत्यादि एवं तृतीयः निर्जरः जरायाजरसन्यतरस्यां
जराया जरसाजादौ विभक्तौ पदांगाधिकारे तस्य तदंतस्य निर्दिश्यमानस्यादेशा भवंति ए
कदेशविकृतस्यानन्यत्वात् जरशब्दस्य जरस् निर्जरसौ निर्जरसः इत्यादि पदे हलादौ च
रामवत् विश्वपाः दीर्घाज्जसि च दीर्घाज्जसि इचि च न एवं सर्वत्र दीर्घः वृद्धिः विश्वपौ विश्व
पाः हे विश्वपाः हे विश्वपौ सुडनपुंसकस्य स्वादिपंचवचनानि सर्वनामस्थानसंज्ञानि स्यु
रक्लीबस्य स्वादिष्वसर्वनामस्थाने कप्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु पूर्वं पदं स्यात्
यचि भं यादिष्वजादिषु च कप्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु पूर्वं भं स्यात् आकडा
रादेका संज्ञा इतऊर्ध्वं कडाराः कर्मधारये इत्यतः प्रागेकस्यैकैव संज्ञा ज्ञेया या परानवका १४

साच आतो धातोः आकारान्तो यो धातुस्तदन्तस्य भस्यांगस्य लोपः अल्लोपस्य विश्वपः विश्वपा

विश्वपाभ्यामित्यादि एवं शंखध्मादयः धातोः किं हाहान् आत इति योगविभागाद्धातो

रपि क्वचित् क्वः ध्मः हरिः हरी जसि च ह्रस्वान्तस्यांगस्य गुणः हरयः ह्रस्वस्य गुणः संबुद्धौ

हे हरे हरिं हरी हरीन् शसो ता सश्च शेषह्रस्वादिति स्य ह्रस्वो याविदुतौ तदन्तस्य विवर्ण्णे

घिसंज्ञस्यात् आङो ना स्त्रियां चेः परस्याङो नाः स्यादस्त्रियां आङिति टासंज्ञा प्राचां हरिणा

हरिभ्यां ३ हरिभिः चेर्ङिति घिसंज्ञस्य ङित्सु परेषु गुणः हरये हरिभ्यः २ गोत्कृते पञ्चमीङ

सिङसोश्च पञ्चमीङसि ङसोरतिः एवं रूपमेकादेशः हरेः २ हर्योः २ हरीणां च्चेः ङेरदया

म्नन्तस्य ङेरौ मचेरत् हरौ हरिषु एवं कव्यादयः अतस्सौ सख्युरंगस्यान्तादेशः संबुद्धौ

म॰ सि॰
कौ॰
१५
15

सौ अलोंत्यात्पूर्वउपधा सर्वनामस्थानेचासंबुद्धौ नांतस्योपधायादीर्घःसंबुद्धौसर्वनामस्थाने
अपृक्तएकाल्प्रत्ययः एकाल्प्रत्ययोयःसोऽपृक्तसंज्ञःस्यात् हल्ङ्याब्भ्योदीर्घात्सुतिस्यपृ
क्तंहल् हलंतात्परंदीर्घौयौङ्यापौतदंताच्चपरंसुतिसीत्येतदपृक्तंहल्लुप्यते प्रत्ययलोपे
प्रत्ययलक्षणं प्रत्ययलोपेपितदाश्रितमेवकार्यंस्यात् नलोपःप्रातिपदिकांतस्य प्राति
पदिकसंज्ञकंयत्पदंतदंतस्यनस्यलोपः सखा सख्युरसंबुद्धौ सख्युरंगात्परंसंबुद्धिवर्ज्जंसर्वना
मस्थानंणिद्वत् अचोञ्णिति अजंतांगस्यवृद्धिर्ञितिणितिच सखायौ सखायः हेस
खे सखायं सखायौ सखीन् सख्या सख्ये ख्यत्यात्परस्य खितिशब्दाभ्यांखीतीशब्दाभ्यां
कृतयणादेशाभ्यांपरस्यङसिङसोरतउः सख्युः औत् इतःपरस्यङेरौत् सख्यौ शेषंहरि १५

वत् घतिः समासप्रवृत्तिसंज्ञः घस्मात् घत्नोघत्नः घस्मै शेषं हरिवत् समासेत्वभ्यतये क
तिशब्दो बहुवचनान्तः बहुगणवतुडति संख्या डति च ष्णान्ता संख्या षट्संज्ञा स्यात् षड्
भ्यो लुक् जश्शसोः प्रत्ययस्य लुक्श्लुलुपः लुक्श्लुलुप्रत्ययस्यादर्शनेक्र
मात्तत्संज्ञास्यात् जसिचेति गुणे प्राप्ते नलुमताङ्गस्य लुमताशब्देन प्रत्ययलोपेऽपि
तन्निमित्तमंगकार्यं न स्यात् कति २ कतिभिः कतिभ्यः २ कतीनां कतिषु युष्मद
स्मद्षट्संज्ञकास्त्रिषु सरूपाः त्रयः त्रीन् त्रिभिः त्रिभ्यः २ त्रेस्त्रयः आमित्रया
णां त्रिषु गौणत्वेऽपि प्रियत्रयाणां त्यदादीनामः एषामकारो विभक्तौ द्विपर्यंता
नामेवेष्टिः द्वौ २ द्वाभ्यां ३ द्वयोः २ द्विपर्यन्तानां किं भवान् भवंतौ यातिलोकमिति य

म॰ सि॰ पीः सूर्यः पप्यौ पप्यः हे पपीः पपीं पपीन् पप्या पपीभ्यां३ पपीभिः पप्ये पपीभ्यां प
कौ॰ पीभ्यः२ पप्यः पप्योः२ पप्यां पपी पपीषु एवं वातप्रम्यादयः बह्व्यः श्रेयस्यो यस्य सः ब
१८ हुश्रेयसी यूस्त्र्याख्यौ नदी ईदूदंतौ नित्यस्त्रीलिंगौ नदीसंज्ञौ प्रथमलिंगग्रहणं च पूर्व
16 स्त्र्याख्यस्योपसर्जनत्वेपि नदीत्वं वक्तव्यमित्यर्थः अंबार्थनद्योर्ह्रस्वः संबुद्धौ हे बहुश्रे
यसि आण्नद्याः नद्यंतात्परेषां ङितामाडागमः आटश्च आटोचि परे वृद्धिरेकादेशः
बहुश्रेयस्यै बहुश्रेयस्याः२ बहुश्रेयसीनां ङेराम्नद्याम्नीभ्यः नद्यंतादावंतान्नीश
ब्दाच्च ङेराम्स्यात् बहुश्रेयस्यां शेषं पपीवत् अतिलक्ष्मीः शेषं बहुश्रेयसीवत् प्र
धीः अचि श्नुधातुभ्रुवां य्वोरियङुवङौ श्नुप्रत्ययांतस्यवर्णोवर्णांतस्य धातोर्भ्रूश् १८

येनसर्वांगस्येयङुवङौस्तोजादौप्रत्ययेपरेइतिप्राप्ते एनेकाचोसंयोगपूर्वस्य धात्ववयवसं
योगपूर्वोनभवति यइवर्णस्तदंतोयोधातुस्तदंतस्यानेकाचोंगस्ययणजादौप्रत्यये प्र
ध्यौ प्रध्यः प्रध्यं प्रध्यः प्रध्या शेषंपपीवत् एवंग्रामणी ङौतुग्रामण्यां गतिश्चप्राद
यःक्रियायोगेगतिसंज्ञास्युः गतिकारकेतरपूर्वपदस्ययण्नेष्यते शुद्धधियौ नभूसु
धियोः एतयोरचिसुपि यण्न सुधियौ सुधियः इत्यादि सुखमिच्छतीतिसुखीः सुख्युः
सुतीः सुत्युः शेषंप्रधीवत् शंभुर्हरिवत् एवंभान्वादयः तृज्वत्क्रोष्टुः असंबुद्धौसर्वना
मस्थाने क्रोष्टुशब्दस्यस्थानेक्रोष्टृप्रयोक्तव्यम् इत्यर्थः ऋतोङिसर्वनामस्थानयोः
ङौसर्वनामस्थानेचऋतोंगस्यगुणः इतिप्राप्ते ऋदुशनस्पुरुदंशोनेहसांच ऋदंता

म.सि.
कौ.
८
17

नामुशनसादीनां चानङ् स्यादसंबुद्धौ सौ अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशा-
स्तॄणां अवादीनामुपधाया दीर्घोऽसंबुद्धौ सर्वनामस्थाने क्रोष्टा क्रोष्टारौ क्रोष्टारः क्रो-
ष्टारं क्रोष्टारौ क्रोष्टून् विभाषा तृतीयादिष्वचि तृतीयादिष्वजादिषु क्रोष्टुर्वा तृज्व-
त् क्रोष्ट्रा क्रोष्ट्रे ऋत उत् ऋतो ङसिङसोरति उदेकादेशः रपरः रात्सस्य रेफात्संयो-
गान्तस्य सस्यैव लोपो नान्यस्य रस्य विसर्गः क्रोष्टुः २ क्रोष्ट्रोः २ नुमचिरतृज्वद्भावेभ्यो
नुट् पूर्वविप्रतिषेधेन क्रोष्टूनां क्रोष्टरि पक्षे हलादौ च शंभुवत् हूहूः हूह्वावित्यादि
अतिचमूशब्दे तु नदीकार्यं विशेषः हे अतिचमु अतिचम्वै अतिचम्वाः अतिचम्वाः
अतिचमूनां अतिचम्वाम् खलपूः ओः सुपि धात्ववयवसंयोगपूर्वो न भवति यउ ८

वर्णोनदंतोयोधातुस्तदंतस्यानेकाचोंगस्यस्यादचियण् खलप्वौ एवं हल्वादयः स्वभूः
स्वभ्वौ स्वभ्वः एवं स्वयंभूः वर्षाभूः वर्षाभ्वश्च अस्योवर्णस्ययणस्यादचिसुपि वर्षा
भ्वाविमादि हूहूः हूकारपुनःपूर्वस्यभुवोयणावक्तव्यः हूह्वौ एवं कारभूः पुनर्भूः दृ
म्भूकाराभ्रूशब्दो स्वयंभूवत् धाता हे धातः धातारौ धातारः ऋवर्णान्तस्य णित्वे
धातोःयात्तृणोएवंनप्त्रादयः उद्गाता न प्त्रादिग्रहणंव्युत्पन्नानिपक्षेनियमार्थं तेनन
प्त्रादिग्रहणस्यनियमार्थत्वान्नादीर्घः पिता पितरौ पितरः पितरं शेषंधातृवत्
एवंजामातादयः ना नरौ नरः नृच अस्यानामिवादीर्घः नृणां नॄणां गोतोणि
त् ओकारान्ताद्विहितंसर्वनामस्थानेणिद्वत् गौः गावौ गावः ओतोम्शसोः ओतो

म. सि.
कौ.
१८
18

म्शसोराकारएकादेशः गां गावौ गाः गवा गवे गोः रायोहलि रैशब्दस्याका
रएकादेशो हलि विभक्तौ राः रायौ रायः राभ्यामित्यादि ग्लौः ग्लावौ ग्लावः ग्लौ
भ्यामित्यादि इत्यजन्ताः पुल्लिंगाः रमा औङ आपः आवंतादे गात्परोङःशी औङितौ
कारविभक्तेः संज्ञा रमे रमाः संबुद्धौ च आप एकारः हे रमे हे रमाः रमां रमे रमाः
आङि चापः आङि ओसि चाप एकारः रमया रमाभ्यां रमाभिः याडापः आपो ङितो
याट् वृद्धिः रमायै रमाभ्यः रमायाः २ रमयोः २ रमाणां रमायां रमासु एवं दुर्गाद
यः सर्वनाम्नः स्याड्ढ्रस्वश्च आवंतात्सर्वनाम्नो ङितः स्याट् आपश्च ह्रस्वः सर्वस्यै सर्वस्याः
२ सर्वासां शेषं रमावत् एवं विश्वादय आवंताः विभाषा दिक्समासे बहुव्रीहौ सर्व १८

नामता वा उत्तरपूर्वस्यै उत्तरपूर्वायै अपुरी युक्तेर्नेह अन्तरायै नगर्यै तीयस्येति वा द्वि
तीयायै एवं तृतीया अंबार्थनद्योर्ह्रस्वः हे अम्ब हे अक्क हे अल्ल असंयुक्ता ये डलकास्तद्व
तां ह्रस्वो न हे अंबाडे अंबिके हे अंबाले जरा जरसौ जरसित्यादि पक्षे रमावत् गोपा विश्व
पावत् मतिः मत्या ङिति ह्रस्वश्च इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्य स्त्रीलिंगावीदू
तौ ह्रस्वौ च इदुतौ स्त्रियां वा नदीसंज्ञौ स्तो ङिति मत्यै मतये मत्याः मतेः नदीत्वपक्षे
ङेः इति ङेरौत्वप्राप्ते इदुद्भ्यां नदीसंज्ञाभ्यां परस्य ङेराम् मत्यां मतौ शेषं हरिव
त् एवं बुद्ध्यादयः त्रिचतुरोः स्त्रियां तिसृचतसृ स्त्रीलिंगयोरेतयोरेतावादेशौ स्तो विभ
क्तौ अचि र ऋतः तिसृचतसोर्ऋतो रादेशो गुणदीर्घोत्वानामपवादः तिस्रः २ ति

म·सि·
कौ·
१५
19

स्त्रीभिः तिसृभ्यः२ स्त्रामिवत् नतिसृचतसृ पतयोर्नामिनदीर्घो तिसृणां तिसृषु हे२
हाभ्यां२ हयोः गौरी गौर्यौ गौर्यः गौरीं गौर्यांवित्यादि एवंनद्यादयः लक्ष्मीः अवीतंत्री
तरीलक्ष्मीश्रीह्री श्रीणामप्रणाादितः स्त्रीलिंगानाममप्राधान्यहल्लोपोनकदाचन १ शेषं
गौरीवत् एवंतरीतंत्र्यादयः स्त्री हेस्त्रि स्त्रियाः असेयङ्जादौप्रत्यये स्त्रियौ स्त्रियः
वाम्शसोः स्त्रियाइयङ् स्त्रिये स्त्री स्त्रियौ स्त्रीः स्त्रिः स्त्रियः स्त्रिया स्त्रियै स्त्रियाः२ पर
त्वान्नुट् स्त्रीणां स्त्रीषु श्रीः श्रियौ श्रियः नेयङुवस्थानावस्त्री इयङुवङोःस्थितिर्ययो
स्तौवीहूतौनदीसंज्ञौनस्तः नतस्त्री हेश्रीः श्रिये श्रियै श्रियाः श्रियः वामि इयङु
वङ्स्थानौ स्त्र्याख्यौयू आमिवानदीसंज्ञौ नतस्त्री श्रीणां श्रियां श्रियि ङितिह्रस्वे १५

तिष्ठा नदीतं स्त्रियौ येनर्मतिवत् स्त्रियाचीक्रोष्टुस्त्रजंतवद्रूपं लभते ऋन्नेभ्योङीप् ऋ
देतेभ्यो नांतेभ्यः स्त्रियां ङीप् क्रोष्ट्री गौरीवत् सुश्रीवत् स्वयंभूवत् नप्तृस्वस्रादि
भ्यः ऋन्नेभ्योङीप् प्राप्तो न स्यात् स्वसा तिस्रश्चतस्रश्च ननांदा दुहिता तथा यातामा
तेति सप्तैते स्वस्रादय उदाहृताः १ स्वसा स्वसारौ मातृपितृवत् शास्त्रिमातृः द्यौर्गोवत्
राः पुंवत् नौर्ग्लौवत् इत्यजंतास्त्रीलिंगाः अतोम् अतोंगात् क्लीबात् स्वमोरम् स्वा
ने पूः ह्रस्वादिति सेर्लुग्हिलोपः हेमान नपुंसकाच्च क्लीबादौङः शी भसंज्ञायो य
स्येति च ईकारे तद्धिते च सस्येवर्णावर्णयोर्लोपः इत्यलोपे प्राप्ते औङः श्यां प्रतिषेधः
ज्ञाते जश्शसोः शि क्लीबात् शि सर्वनामस्थाने नपुंसकस्य फलं च फलेन स्वाजंत

म॰ सि॰
कौ॰
२
20

स्य च क्लीबस्य न म् स्यात् सर्वनामस्थाने मिदचोऽन्त्यात्परः अचां मध्ये योऽन्त्यस्तस्मात्परस्तस्यैवा
वयवो मित्स्यात् उपधाया दीर्घः ज्ञानानि पुनस्तद्वत् शेषं रामवत् एवं धनवनफलाद
यः अड्डतरादिभ्यः पंचभ्यः एभ्यः क्लीबेभ्यः स्वमोरड्डादेशः टेः डिति भस्य टेर्लोपः कत
रत् कतरद् कतरे कतराणि हे कतरत् शेषं पुंवत् कतमत् इतरत् अन्यत् अन्यतरत्
अन्यतमस्य तु अन्यतममित्येव एकतरात् प्रतिषेधः एकतरं ह्रस्वो नपुंसके प्रातिपद
कस्य अजंतस्यैवेत्येव श्रीपं ज्ञानवत् स्वमोर्नपुंसकात् इकोऽचि विभक्तौ वारि इगंतस्य
नपुंसकस्याचि विभक्तौ वारिणी वारीणि न लुमतेत्यस्यानित्यत्वात्पक्षे संबुद्धिनिमित्तको गुणः
हे वारि हे वारे घेर्ङितीति गुणे प्राप्ते वृद्ध्यौत्वतृज्वद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधेन २

वारिणी वारिणः वारिणोः नुमचिरेतिनुट्वारीणां वारिणि हलादौहरिवत् तृतीया
दिषुभाषितपुंस्कंपुंवद्गालवस्य प्रवृत्तिनिमित्तैक्येभाषितपुंस्कमिगन्तंक्लीबंपुवद्वाटादा
वचि अनादयेअनादिनेइत्यादिशेषंवारिवत् यन्निमित्तमुपादायपुंसिशब्दःप्रवर्त्त
ते क्लीबवृत्तितदेवस्याद्भाषितपुंस्कंतदुच्यते । पीलुर्वृक्षःतत्फलेपीलुतस्मैपीलुने नत्व
पीलवे अत्रनपुंवत् प्रवृत्तिनिमित्तभेदात् अस्थिदधिसक्थ्यक्ष्णामनङुदात्त
टादावचि अल्लोपोनः अंगावयवोसर्वनामस्थानेयजादिस्वादिपरोयोन्
तस्याकारस्यलोपः दध्ना दध्ने दध्नः दध्नोः विभाषाङिश्योः अंगावयवोजादिप्रत्य
यपरोयोन्तस्याकारस्यलोपोवाङिश्योः दध्नि दधनि शेषंवारिवत् एवमस्थिस

म॰सि॰
कौ॰
२१
21

क्ष्यादि सखि सखिनी सखीनि हेसखे सखि सखिया सखिनेत्यादि मथ मथनी
मथूनि हेमथ हेमथो एवंमाछदयः सल्लसल्लनी सल्लनेत्यादि धातृ धातृणी
धातृणि हेधातः हेधातृ धातॄणां एवंज्ञातृकर्त्रादयः पचश्चत्वस्वादेशे प्रथ
प्रथनी प्रथूनि प्रथनेत्यादि प्रि प्रिणी प्रीणि प्रिणा एकादेशाविष्ठातम
नन्यवत् प्रराभ्यां प्रीणां सत्र सत्रनी सत्रूनि सत्रनेत्यादि इत्यजंतानपुंसकलिं
गाः ॥ ७ रामजी होइ ॥ कलियदांतेच लिट् लिड लिहौ लिहः लिट् लिड्भ्य
लिड्भ्य वादेर्धातोर्घः कलिपदांतेचोपदेशोदेर्धातोर्हस्य घः एकाचोवशोभ
षकषंतस्यम्बोः धातवयवसैकाचोकषतस्ववशोभषूस्येपदांतेच इहव्याप

२१

देशीवद्भावेनयात्वञ्वयघत्वात्वमघूभावः ध्रुक् ध्रुग् द्रुहौ द्रुहः ध्रुग्भ्यां ध्रुक्षु वा द्रुह
मुहस्नुहस्निहां एषांहस्यवाघः झलिपदांतेच ध्रुक् ध्रुग् द्रुहौद्रुहः ध्रुट् ध्रुड् ध्रु
ग्भ्यां ध्रुग्भिः ध्रुड्भ्यां ध्रुक्षु ध्रुट्सु ध्रुट्त्सु एवंमुह् धात्वादेःषःसः स्नुट् स्नु
ड् स्नुक् स्नुग् एवंस्निहः इग्यणः संप्रसारणं यणःस्थानेप्रयुज्यमानोयइक्संप्र
सारणसंज्ञास्यात् वाहऊठ्भस्यवाहः संप्रसारणमूठ्संप्रसारणाच्च संप्रसारणाद
चिपूर्वरूपमेकादेशः वृद्धिः विश्वौहः इत्यादि चतुरनडुहोरामुदात्तः सर्वनामस्था
नेसावनडुहःनुम् आच्छीनद्योर्मितिसूत्रादादित्यधिकारादवर्णात्परोयंनुम् अ
नोविशेषविहितेनापिनुमा आमन्नबाध्यते आमाचनुम् नबाध्यतेसुल्लोपः संयो

म॰ सि॰
कौ॰
२२
22

गांतस्यलोपः नुम्विधिःसामर्थ्यादसस्येस्वितिदत्वेन संयोगांतस्यलोपस्यासिद्धत्वान्नलो
पोन अनड्वान् अमसंबुद्धौचतुरनडुहोः हेअनड्वाहौ अनड्वाहः वसुस्रंसुध्वंस्वनडुहां
दः सांतवस्वंतस्यस्रंसादेश्चदःपदांते अनडुद्भ्यामित्यादि पदांतेकिं स्रस्तं ध्वस्तं सहेः
साडःसः साढ्रूपस्यसहेःसस्यमूर्द्धन्यादेशः तुराषाट् तुरासाहौ तुरासाहः तुराषा
ड्भ्यामित्यादि दिवऔत् दिवितिप्रातिपदिकस्यौत्स्यात्सौ सुद्यौः सुदिवौ दिवउत् प
दांते सुद्युभ्यामित्यादि चत्वारः चतुरः चतुर्भिः चतुर्भ्यः षट्चतुर्भ्यश्च एभ्यः आ
मोनुडागमः रषाभ्यांनोणः समानपदे चतुर्णां रोःसुपि रोरेवविसर्जनीयःसुपि चतुर्षु
मोनोधातोः पदांते प्रशान् प्रशामौ किमःकः विभक्तौ कः कौके इत्यादि इद २२

सोमः सौ त्यदाद्यत्वापवादः इदोय् पुंसि इदमइदोय् सौ पुंसि अयं त्यदाद्यत्वे अतो गुणे
अपदान्तादतो गुणे पररूपमेकादेशः इम इदमो दस्य मस्याद्विभक्तौ इमे त्यदादेः सं
बोधनेनास्तीत्यर्थे इत्युत्सर्गः अनाप्यकः अककारस्य इदम इदोनापि विभक्तौ आवि
तिश्रमाहारः अनेन हलिलोपः अककारस्य इदम इदोलोपो आपि हलादौ नानर्थ
केलोन्त्यविधिरनभ्यासविकारे आद्यन्तवदेकस्मिन् एकस्मिन्क्रियमाणं कार्यमा
दाविवान्त इवस्यात् हपि च नित्यदीर्घः आभ्यां नेदमदसोरकोः अककारयोरिदमद
[illegible] अककारयोरिदमदसोर्भिसऐसन्स्यात् एभिः अस्मै अत्वे नित्वता
न्नेस्मैयस्याद्धलिलोपः अस्मात् अस्य अनयोः एषां अस्मिन् अनयोः एषु

म. सि. कौ. २३
23

द्वितीयाटौस्स्वेनः इदमेतदोरन्वादेशे किंचित्कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुं
पुनरुपादानमन्वादेशः यथानेन व्याकरणमधीतमेनं छन्दोऽध्यापयेति अनयोः प
वित्रं कुलं एनयोः प्रभूतं स्वमिति एनं एनौ एनान् एनेन एनयोः २ राजा न ङिसंबु
द्ध्योः नस्य लोपो न ङौ संबुद्धौ च हे राजन् ङावुत्तरपदे प्रतिषेधो ब्रह्मनिष्ठः राजानौ वक्तव्यः यथा चर्मतिलः॥
राजानः राजानं राजानौ राज्ञः राज्ञा नलोपः सुप्स्वरसंज्ञा तुग्विधिषु कृति सुब्विधौ स्वरवि
धौ संज्ञाविधौ कृति तुग्विधौ च नलोपोऽसिद्धो नान्यत्र राजाश्व इत्यादौ इत्यसिद्धत्वादात्
मैत्वमैस्त्वं च न राजभ्यां राजभिः राजभ्यः राज्ञि राजनि यज्वा यज्वानौ यज्वानः न
संयोगाद्वमन्तात् वमन्तसंयोगादनोऽकारस्य लोपो न यज्वभ्यां ब्रह्मा ब्रह्माणः ब्र २३

ष्णा इन्हन्पूषार्यमणांशौ एषांशावेवोपधाया दीर्घः सौ च इन्नादीनामुपधाया
दीर्घो संबुद्धौ सौ वृत्रहा हे वृत्रहन् एकाजुत्तरपदे णः एकाजुत्तरपदं यस्य तस्मिन्समा
सेपूर्वपदस्थान्निमित्तात्परस्य प्रातिपदिकान्तनुम्विभक्तिस्थस्य नस्य णत्वं स्यात् वृत्रह
णौ वृत्रहणः हो हन्तेर्ञ्णिन्नेषु ञिति णिति प्रत्यये नेच परे हन्तेर्हस्य कुत्वं हन्तेरुपसर्ग
स्थान्निमित्ताद्धन्तेर्नस्य णः प्रहण्यात् अन्तर्वस्य हन्तेरनर्वस्यैव नस्य णो [illegible] नास्य
प्रघ्नन्ति योगविभागसामर्थ्याद्धन्तेनतरस्य विधिर्वा भवति प्रतिषेधो वेति न्यायं वाधित्वा
रपदे ३ एकाजुत्तरपदे णत्वं नित्यं प्रवर्त्तते वृत्रघ्नः इत्यादि एवं शार्ङ्गिन् यशस्विन् अर्यमन् पूषन् म
घवावहुले मघवन्शब्दस्य वा तृ अन्तादेशः ऋ इत् उगिदचां सर्वनामस्थानेऽधातोः

म. सि.
कौ.
२५
24

अधातोरुगितोनलोपिनोंचतेश्च नुम्स्यात्सर्वनामस्थाने मघवान् उपधाया दीर्घं कर्त्तव्ये
संयोगांतस्यलोपस्यासिद्धत्वेनभवति बहुलग्रहणात् मघवंतौ मघवंतः मघवद्भ्यां तृत्वा
भावेसुटिराजवत् श्वयुवमघोनामतद्धिते अन्नंतानांभानामेषामतद्धितेपरेसंप्रसा
रणंस्यात् मघोनः मघवभ्यां मघवभिएवंश्वन्युवन् नसंप्रसारणेसंप्रसारणं शुनः
युवभ्यामित्यादि अर्वा हेअर्वन् अर्वणस्त्रसावनञः नञ्रहितस्यार्वन्नंतस्यतृ इत्यंतादे
शोनत्वसौ अर्वंतौ अर्वंतः अर्वद्भ्यां पथिमथ्यृभुक्षामात्सौ इतोत्सर्वनामस्थाने प
थ्यादेः थोन्थः पथिमथोःथस्यन्थादेशः सर्वनामस्थाने पंथाः पंथानौ भस्यटेः भ
स्यपथ्यादेष्टिलोपः पथः पथिभ्यां एवंमंथा ऋभुक्षाः ष्णांताःषट् षांतानांताचसंख्या २५

षट्संज्ञास्यात् पंच २ पंचभिः पंचभ्यः २ नुट् नोपधायाः नांतस्योपधायादीर्घोना
मि पंचानां पंचसु अष्टनआविभक्तौ हलादौवास्यात् अष्टाभ्य औश् कृताकारा
दष्टनोजश्शसोरौश् अष्टभ्यइतिवक्तव्येकृतात्वनिर्देशाज्जश्शसोर्विषये आत्वंना
पद्यते अष्टौ २ अष्टाभिः अष्टाभ्यः २ अष्टानां अष्टासु आत्वाभावेअष्टपंचवत् ऋ
त्विग्दधृक्स्रग्दिगुष्णिगंचुयुजिक्रुंचांच पभ्यः क्विन् अंचेः सुप्युपपदे क्विन् युजिक्रुं
चोः केवलयोः क्रुंचेर्नलोपाभावश्चनिपात्यते कनाविती ह्रस्वदितिङः अत्रधात्वधिका
रेतिक्विन्नः प्रत्ययः कृत्संज्ञा वेरपृक्तस्यलोपः क्विन्प्रत्ययस्यकुः क्विन्प्रत्ययोयस्मात्क्वि
यतेतस्य कवर्गोंतादेशः पदांते ऋत्विजौ ऋत्विग्भ्यां३ युजेरसमासे सर्वनामस्था

ऋत्विग् । ऋत्विक् १५

नेनुम् सुलोपः संयोगांतस्यलोपः कुत्वेननस्यङः युङ् युञ्जौयुग्भ्यां३ असमासेकिं चोः
कुः चवर्गस्यकवर्गादेशःस्यात्झलिपदांतेच सुयुक् सुयुग् सुयुजौसुयुजः सुयुग्भ्यां खन्
खञ्जौ खञ्जः खन्भ्यां व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशांषः झलिपदांतेच जश्च
र्वे राट् राड् राजौ राजः राड्भ्यां३ एवंविराट् देवेट् विभ्राट् विश्वसृट् परिसृट् परीव्र
जेषः पदांते परावुपदेव्रजेःक्विप्स्याद्दीर्घश्चपदांते षत्वमपिपरित्यज्यसर्वंव्रजतीतिपरि
व्राट्परिव्राजौ विश्वस्यवसुराटोः विश्वस्यदीर्घोवसौराटिचपरे विश्वाराट् विश्वराड् वि
श्वराजौ विश्वाराड्भ्यां स्कोःसंयोगाद्योरंतेच पदांते झलिचपरेःसंयोगाद्योःसकार
ककारयोर्लोपः भृट्भृड् स्वस्यश्चुत्वेनशः झलांजशोन्तेइतिशस्यजः भृज्जौ भृड्भ्यां

त्यदाद्यत्वेपररूपे तदोःसःसावनंत्ययोः त्यदादीनांतदोरनंतयोःसःस्यात्सौ स्यः त्यौ त्ये सः

तौ ते यः यौ ये एषः एतौ एते एनं एनौ एनान् एनेन एनयोः २ ङे.प्रथमयोरम् युष्म

दस्मद्भ्यांपरस्यङेःप्रथमाद्वितीययोश्चामादेशः त्वाहौसौ अनयोर्मपर्यंतस्य शेषेलोपः

आत्वयत्वनिमित्तेतरविभक्तौपरतोयुष्मदस्मदोरंत्यलोपःस्यात् नेत्यहे एनयोष्टिलोपः

युवावौद्विवचने द्वयोरुक्तावनयोर्मपर्यंतस्ययुवावौस्तःविभक्तौ प्रथमायाश्चद्विव

चनेभाषायां औङ्श्चतयोरात्वंलोके युवां आवां यूयवयौजसि अनयोर्मपर्यंतस्य यू

यं वयं त्वमावेकवचने एकस्योक्तावनयोर्मपर्यंतस्यविभक्तौ द्वितीयायांच अन

योरात् त्वांमां शसोनः आभ्यांशसोनःस्यादमोपवादः आदेःपरस्य संयोगांतस्य

म.सि.
कौ.
२९
26

लोपः युष्मान् अस्मान् योचि अनयोर्यादेशोनादेशेजादौ विभक्तौ त्वया मया युष्मदस्मदो
रनादेशे अनयोरात्स्यादनादेशेहलादौ विभक्तौ युवाभ्यां२ आवाभ्यां२ युष्माभिः अस्मा
भिः तुभ्यमह्योङयि अनयोर्मपर्यंतस्यादिलोपः तुभ्यं मह्यं भ्यसोभ्यम् आभ्यांपरस्य यु
ष्मभ्यं अस्मभ्यं एकव चनस्यच आभ्यांङसेरत् त्वत् मत् पंचम्याश्चत् आभ्यांभ्यसः
युष्मत् अस्मत् तवममौङसि अनयोर्मपर्यंतस्य युष्मदस्मद्भ्यां ङसोश् तव मम युवयोः२
आवयोः२ साम आकं आभ्यांसाम आकं स्यात् युष्माकं अस्माकं त्वयि मयि युष्मासु अ
स्मासु ःः युष्मदस्मदोःषष्ठीचतुर्थीद्वितीयास्थयोर्वांनावौ पदात्परयोरपदादौ स्थितयोः
षष्ठ्यादिविशिष्टयोर्वांनावौ बहुवचनस्य वस्नसौ स्तः तेमयावेकवचनस्य उक्तविषयोः २९

न्तयोः षष्ठीचतुर्थ्येकवचनांतयोस्तेमेएतौस्तः त्वामौद्वितीयायाः उक्तविधयोर्द्वितीयैक
वचनांतयोस्त्वामाएतौस्तः श्रीशस्त्वावतुमापीह दत्तात्तेमेपिशर्मसः स्वामीतेमे पिसहरिः
पातुवामपिनोविभुः सुखंवांनोददात्वीशः पतिर्वामपिनोहरिः सोव्याद्वोनः शिवंवोनो
दद्यात्सेव्योत्रवःसनः एकवाक्येयुष्मदस्मदादेशाःवक्तव्याः एकतिङ्वाक्यंतेनेहन ओदनं
पचतवभविष्यति इहतेशालीनांतेओदनंदास्यामीति एतेवांनावादयआदेशा अनन्वा
देशेवावक्तव्याः अन्वादेशेतुनित्यंस्युः धातातेभक्तोस्तिधातातवभक्तोस्तीतिवातस्मैतेनम
इत्येव नचवाहाहैवयुक्ते चादिपंचकयोगेनैतेस्युः हरिस्त्वांमांचरक्षतु कथंत्वांमां
वानरक्षेदित्यादि पश्यार्थैश्चानालोचने चाक्षुषज्ञानार्थैर्धातुभिर्योगेनैतेआदेशाः

म.सि.
कौ.
२७
27

भवंति चेन्नसमानौ समीचीनाते आलोचनेन भक्तस्त्वा पश्यति चक्षुषा सपूर्वायाःप्रथमायाविभा
षा विद्यमानपूर्वात्प्रथमांतादन्वादेशेप्यादेशावास्युःभक्तस्त्वमप्यहं तेन हरस्त्वं त्रायते
समौ त्वामेतिवा सामंत्रिते संबोधने या प्रथमा तदंतं सामंत्रितसंज्ञास्यात् आमंत्रितं पूर्व
मविद्यमानवत् अग्नेतव देवास्मान्पाहि नामंत्रितेसमानाधिकरणेसामान्यवचनं
विशेष्यं समानाधिकरणे आमंत्रितेपरे नाविद्यमानवत् हरेदयालो नःपाहि सुपात्
सुपादौ पादःपत् पाच्छब्दांतं यदंगं भं तदवयवस्य पाच्छब्दस्य पदादेशः सुपदः सुपाद्भ्यां
अग्निमत् अग्निमथौ अग्निमद्भ्यां अनिदितां हल उपधायाःक्ङिति हलंतानामनिदि
तामंगानामुपधायानस्यलोपःकितिङितिनुम संयोगांतस्यलोपः नस्यकुत्वेनङः प्रा २७

ङ् प्राञ्चौ प्राञ्चः अचः लुप्तनकारस्यांचतेर्भस्याकारस्यलोपः चौ लुप्ताकारनकारेंचतौप
रेपूर्वस्याणोदीर्घः प्राचः प्राचा प्राग्भ्यां प्रत्यङ् प्रत्यञ्चौ प्रत्यञ्चः प्रतीचः प्रत्यग्भ्यां उद
ङ् उद ञ्चौ उदईत् उदउत्तरस्यलुप्तनकारस्यांचतेर्भस्याकारस्यईत् उदीचः उदग्भ्यां
समः समिवप्रत्ययांतेंचतौपरे सम्यङ् सम्यञ्चौ समीचः सम्यग्भ्यां सहस्यसध्रितद्या
सध्र्यङ् तिरसस्तिर्यलोपेअलुप्ताकारेंचतौवप्रत्ययांतेतिरसस्तिर्यादेशः तिर्यङ् ति
र्यञ्चौ तिरश्चा तिर्यग्भ्यां नांचेःपूजायां पूजार्थस्यांचतेरुपधायानस्यलोपोन प्राङ्
प्राञ्चौ नलोपाभावादलोपोन प्राञ्चः प्राङ्भ्यां प्राङ्क्षु प्राङःक्षु एवंपूजार्थेप्रत्यङ्ङा
दयः क्रुङ् क्रुञ्चौ क्रुञ्चः क्रुङ्भ्यां पयोमुक् पयोमुचौ पयोमुचो पयोमुचः पयोमु

र्भ्यो महद्धातोर्वर्त्तमाने पृषन्महद्बृहज्जगच्छतृवच्च एते निपातिते शतृवच्चैषां कार्यं
स्यात् उगित्वान्नुम् सांतमहतः संयोगस्य सांतसंयोगस्य महतश्च यो नकारस्तस्योप
धाया दीर्घो संबुद्धौ सर्वनामस्थाने महान् महांतौ महांतः हे महन् महद्भ्यां अत्व
संतस्य चाधातोः अत्वंतस्योपधाया दीर्घो धातुभिन्नासंतस्य चासंबुद्धौ सौ धीमान् धी
मंतौ धीमंतः हे धीमन् शसादौ महद्वत् भातेर्डवतुः डित्वसामर्थ्यादभस्यापि टेर्लो
पः भवान् भवंतौ भवंतः शत्रंतस्य तु भवन् उभे अभ्यस्तं षष्ठद्वित्वप्रकरणे ये द्वे वि
हिते ते उभे समुदिते अभ्यस्तसंज्ञे स्तः नाभ्यस्ताच्छतुः नुम् न ददत् ददतौ जक्षित्या
दयः षट् षड्धातवोन्ये जक्षितिश्च सप्तम एते अभ्यस्तसंज्ञाः स्युः जक्षत् जक्षतौ जक्ष

तः षवेंज्जाग्रत् दरिद्रत् शासत् चकासत् दीधीङ् दीप्तिदेवनयोः वेवीङ् वेतिना तुल्ये षष्ठो
छांदसो वेवत् जक्षजागृदरिद्राशासदीधीङ् वेवीङ्चकासस्तथा अभ्यस्तसंज्ञा विज्ञेया
धातवोऽनुतिभाषिताः गघ् गघौ गुघः गड्भ्यां त्यदादिषु दृशोऽनालोचने कञ्च त्यदादिषू
षपदेषु अज्ञानार्थाद् दृशो धातोः कञ् स्यात् क्विप् च आ सर्वनाम्नः इगादेशावतश्च तादृक् ता
दृशौ तादृशः तादृग्भ्यां व्रश्चादिषः जश्चत्वे विट् विशौ विशः विड्भ्यां नशेर्वा नशेः
कवर्गान्तादेशो वा नशौ नशः नड्भ्यां नग्भ्यां स्पृशोऽनुदके क्विन् अनुदके सुप्युपपदे स्पृ
शेः क्विन् घृतस्पृक् घृतस्पृशौ घृतस्पृशः दधृक् दधृषौ दधृषः दधृग्भ्यां रत्नमुट्
रत्नमुषौ रत्नमुषः रत्नमुड्भ्यां षट् षड्भिः षड्भ्यः २ षण्णां षट्सु पञ्चप्राचां षड्नामिव

म॰ सि॰
कौ॰
२१
29

दाहते नम्रमादिकमेवग्रन्थयेनित्यवचनात् वोंरुपधायादीर्घइकः रेफवांतस्यधातोरुपधाया
कोर्दीर्घः पदांते पिपठीः पिपठिषौ पिपठिषः पिपठीर्भ्यां नुम्विसर्जनीयाशर्व्यवायेपि
पतैः प्रत्येकंव्यवधानेपीणात्कुभ्यांपरस्यसस्यमूर्द्धन्यादेशः ष्टुत्वेनपूर्वस्यषः पिपठीष्षु पिप
ठीषु चिकीः चिकीर्षौ चिकीर्षु विद्वान् विद्वांसौ हेविद्वन् वसोःसंप्रसारणं वस्वंतस्यभ
स्यसंप्रसारणं विदुषः वसुस्रंसुध्वंस्वनडुहां दः विद्वद्भ्यां पुंसोसुङ् सर्वनामस्थाने पुमान् हेपुमन्
पुमांसौ पुंसः पुंभ्यां पुंभिः पुंसु ऋदुशनसपुरुदंसोनेहसांचनङ् उशना उशनसौ अस्यसंबुद्धौवानङ्
नलोपश्चवावाच्यः हेउशन हेउशनन् हेउशनः उशनोभ्यां अनेहा अनेहसौ अने
हसः हेअनेहः वेधाः वेधसौ वेधसः वेधोभ्यां अदसऔसुलोपश्च सौपरे तदोरितिसः २१

असौ औत्वप्रतिषेधः साकच्कस्य वा वक्तव्यः सादुत्वे अमुकः अमुकौ त्यदाद्यत्वे पररूपं वृद्धिः
अदसोसेर्दादुदोमः अदसोसान्तस्य दात्परस्य उदूतौ स्तो दस्य मश्च आन्तरतम्याद्ध्रस्वस्य उः
दीर्घस्य ऊः अमू जसः शी एत ईत् वहुवचने अदसो दात्परस्येत ईद्दस्य मो वह्वर्थोक्तौ
अमी एवं चासिद्धमिति विभक्तिकार्यं प्राक् पश्चादुत्वमत्वे अमुं अमू अमून् मुत्वे कृते
घिसंज्ञायां नाभावः न मु ने नाभावे कर्त्तव्ये मुभावो नासिद्धः अमुना अमूभ्यां अमीभिः
अमुष्मै अमीभ्यः अमुष्मात् अमुष्य अमुयोः२ अमीषां अमुष्मिन् अमीषु इति ह
लन्ताः पुल्लिंगाः ॥ नहो धः झलिपदांतेच नहिवृतिव्यधिवृषिरुचिसहितनिषु क्वौ क्वि
वंतेषु पूर्वस्य दीर्घः उपानत् उपानद् उपानहौ उपानहः उपानद्भ्यां उपानत्सु क्विवंतत्वा

म॰ सि॰
कौ॰
३॰
30

त्कुत्वेन चः उष्णिक् उष्णिग् उष्णिहौ उष्णिहः उष्णिग्भ्यां द्यौः दिवौ दिवः द्युभ्यां गीः गिरौ गि
रः एवं पूः चतस्रः२ चतसृभिः चतसृभ्यः२ चतसृणां चतसृषु का के काः सर्ववत् यः
सौ इदमो दस्य इदमो मः इयं त्यदाद्यत्वे टाप् दश्चेति मः इमे इमाः इमां इमे इमाः अनया ह
लि लोपः आभ्यां आभिः अस्यै अस्याः२ अनयोः आसां अस्यां आसु स्रक् स्रजौ स्रजः
स्रग्भ्यां त्यदाद्यत्वे टाप् स्या सेमाः एवं त्यद्यदेतद् वाक् वाचौ वाचः वाग्भ्यां३ अप्शब्दो
नित्यं बहुवचनान्तः अप्तृन्निति दीर्घः आपः अपः अपो भि अपस्तकारो भादौ प्रत्यये
अद्भिः अद्भ्यः२ अपां अप्सु दिक् दिशौ दिशः दिग्भ्यां३ त्यदादिषु दृश इति दृशः क्विन् विधा
नादन्यापि कुत्वं दृक् दृशौ दृशः दृग्भ्यां त्विट् त्विषौ त्विषः त्विषः त्विड्भ्यां ससज १

षोहरितिहत्वे सजूः सजुषौ सजूर्भ्यां सजूष्षु सजूःषु आशीः आशिषौ आशीर्भ्यां अ
सौ उत्वमत्व अमू अमूः अमूं अमुया अमूभ्यां अमूभिः अमुष्यै अमूभ्यः२ अमुष्याः२
अमुयोः२ अमूषां अमुष्यां अमूषु ॥ इतिहलंताःस्त्रीलिंगाः ॥ स्वमोर्नपुंसका
त्लुक वहस्वेस्विति दः स्वनडुत् स्वनडुहा चतुरनडुहोरित्याम् स्वनडुंहि पुनस्तद्व
शेषंपुंवत् वाः वारी वारि वारा वार्भ्यां चत्वारि किं के कानि इदं इमे इमानि अन्वादे
शेनपुंसकेएनवक्तव्यः एनत् एने एनानि एनेन एनयोः ब्रह्म संबुद्धौनपुंसकानांन
लोपोवावक्तव्यः हेब्रह्म हेब्रह्मन् ब्रह्मणी ब्रह्माणि शेषंवत् अहः विभाषाङिश्योः
अहनी अह्नी अहानि अहनि अह्नि अहन्विनासरूःपदांते अहोभ्याम् दंडि दंडिनौ दं

म·सि·
कौ·
३१
31

ह्रीति सुपथि टिलोपः सुपथ सुपंथानि ऊर्क ऊर्जी ऊर्ज्जि नरजानांसंयोगः तत् ते तानि
यत् ये यानि एतत् एते एतानि गवाक् गोची गवांचि पुनस्तद्वत् गोचा गवाग्भ्यां
शकृत् शकृती शकृंति शकृङ्यां ददत् ददती वानपुंसकस्य अभ्यस्तात्परोयःशात्रव
यवस्तदंतस्यक्लीवस्यनम् सर्वनामस्थाने ददंति ददति नुदत् आच्छीनद्योर्नुम् अ
दगात्परोयःशात्रवयवस्तदंतस्यनम्वाशीनद्योः नुदंती नुदती नुदंति भात् भांती
भाती भांति पचत् शप्श्यनोर्नित्यं शप्श्यनोरात्परोयःशात्रवयवस्तदंतस्यनम् शी
नद्योः पचंती पचंति दीव्यत् दीव्यंती दीव्यंति धनुः धनुषी सांतेतिदीर्घः नम्विस
र्जनीयेनीयेतिषः धनूंषि धनुषा धनुर्भ्यां एवचक्षुर्हं विशदयः पयः पयसी पयां

सि पयोभ्यां सुपुम् सुपुंसी सुपुमांसि अदविभक्तिकार्यं च उत्वमत्वे अमु अमूनि
शेषंपूर्ववत् ॥ इति हलंतानपुंसकलिंगाः ॥ अथ स्वरादिनिपातमव्ययं
स्वर् अंतर् प्रातर् पुनर् पुनुतर् उच्चैस् नीचैस् शनैस् ऋधक् ऋते युगप
त् आरात् पृथक् ह्यस् श्वस् दिवा रात्रौ सायं चिरं मनाक् ईषत् जोषं तूष्णीं
बहिस् अवस् समया निकषा स्वयं वृथा नक्तं नञ् हेतौ इद्धा अद्धा सामिव
त् ब्राह्मणवत् क्षत्रियवत् सना उपधा सनत् सनात् अन्यत् तिरस् अंतरा
अंतरेण ज्याक् कं शं सहसा विना नाना स्वस्ति स्वधा अलं वषट् श्रौषट् अ
स्ति उपांशु क्षमा विहायसा दोषा मृषा मिथ्या १ मुधा पुरा चिरा मिथो मिथ

म॰ सि॰
कौ॰
३२
32

स् प्रायस् मुहुस् प्रवाहिकं प्रवाहिका आर्यहलं अभीक्ष्णं साकं सार्द्धं नमस् हिरुक्
धिक् अथ आमः प्रताम् प्रशान् मा माङ् आकृतिगणोयं च वा ह अह एव
एवं नून शश्वत् भूयस् सुपत् कुवित् नेत् चेत् चण् यत्र कच्चित् नहहंत् मा
किं माकीम् नकिः आकीं आङ् नञ् यावत् तावत् त्वैद्वै स्वाहा तथा हि खलु
किल सुष्ठु आदह उपसर्गविभक्तिस्वरप्रतिरूपकाश्च अवदत्तं अहंयुः अस्तिक्षी
रा अ आ इ ई उ ऊ ए ऐ ओ औ पशुकम् यथाकथाच पाट् प्याट् अंग हे है भो अयेद्य
विषु एकपदे युत आतः चादिरप्याकृतिगणः तसिलादयः प्राक् पाशपः शस्प्र
भृतयः प्राक्समासांतेभ्यः अम् आम् कृत्वोर्थाः तसिलवती नानाञौ एतदंतमव्य ३२

यंञ्रतञ्मात्दिक्त्मेजंतःक्तितयोमांतपर्जंतस्य तदंतमप्ययं स्मारंस्मारंजीवसेपिविये

त्कातोसुन कस्तुनःपतदंतमप्ययंक्त्वाउदेतोः विसृपः अव्ययीभावस्य अधिहरि

अव्ययावाप्सुपः अव्ययाद्विहितस्यापःसुपस्त्रलुक् तत्रशालायां अथविहितवि

शेषणान्नेह अस्तुत्वसौ अव्ययसंज्ञायां यद्यपितदंतविधिरस्तितथापितगोणे अ

प्यूहणोपर्थे अव्ययस्यापिलिंगत्वात् तथाचश्रुतिः सदृशंत्रिषुलिंगेषुसर्वासुच

विभक्तिषु वचनेषुसर्वेषुयन्नव्येतितदव्ययम् । वष्टिभागुरिरल्लोपमवाप्योरुपस

र्गयोः आपंचैवहलंतानांयथावाचानिशादिशा । विगाहः अवगाहः पि

धाने अपिधाने इत्यवयति ॥

भ्वादि ॥ पत्र ॥ २६॥
अदादि ॥ पत्र ॥ ३७॥
जुहोत्यादि ॥ प ॥ ३९॥
दिवादि ॥ पत्र ॥ ४४॥
स्वादि ॥ पत्र ॥ ४५॥
तुदादि ॥ पत्र ॥ ४८॥
रुधादि ॥ पत्र ॥

[illegible]

धातोः वर्त्तमानाः प्रत्यया धातोर्ज्ञेयाः लट् लिट् लुट् लृट् लेट् लोट् लङ् लिङ् लुङ् लृङ् ए
षु पंचमो लकारश्छंदोमात्रगोचरः लः कर्मणि च भावे चाकर्मकेभ्यः लकाराः सकर्मकेभ्यः कर्म
[illegible]णि कर्त्तरि च स्युरकर्मकेभ्यो भावकर्त्तरि च वर्त्तमाने लट् वर्त्तमानक्रियावृत्तेर्धातो
र्लट् स्यात् अटाविती उच्चारणसामर्थ्यात्लस्य नेत्वं भवतेर्याम कर्त्तृविवक्षायां भू ल इति स्थि
ते तिप् तस् झि १ सिप् थस् थ २ मिप् वस् मस् ३ त आतां झ ४ थास् आथां ध्वं ५ मि
इ् वहि महिङ् ६ एतेऽष्टादश लादेशाः स्युः लः परस्मैपदं [illegible] लादेशाः
परस्मैपदसंज्ञाः स्युः तङानावात्मनेपदं तङ्प्रत्याहारः शानच्कानचौ चैतत्संज्ञाः स्युः पूर्वसं
ज्ञापवादः अनुदात्तङित आत्मनेपदं अनुदात्तेत उपदेशे यो ङित् तदंताच्च धातोर्लः स्थाने आ

लस्येत्यनुवृत्ते लादेशा वानुवर्त्त्यते न परस्मैपदिभ्यः
स्तात्म्लस्य वचोवचने तिचान शभवत्येव कर्त्तरि इह निघ्नान २

वाक्यार्थनिष्ठत्वं एकविभक्तिकत्वं ॥ सामानाधिकरण्यं
भिन्नप्रवृत्तिनिमित्तयोरेकस्मिन्नर्थे प्रवृत्तिः
त्ति तत्सामानाधिकरण्यम् ॥४॥ पंक्ति ।

सि॰ कौ॰ ३४ 34

त्मनेपदं स्यात् स्वरितञितः कर्त्रभिप्राये क्रियाफले शेषात्कर्तरि परस्मैपदं आत्मनेपदनि
मित्तहीनाद्धातोः कर्तरि परस्मैपदं स्यात् तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः तिङ उभयोः
पदयोस्त्रयस्त्रिकाः क्रमादेतत्संज्ञाः स्युः तान्येकवचनद्विवचनबहुवचनान्येकशः लः
प्रथमादिसंज्ञानि तिङस्त्रीणि त्रीणि प्रत्येकं वचनादिसंज्ञानि स्युः युष्मद्युपपदे समानाधिक
(क्रियानिष्पादकत्वं कारकत्वं ... पदे ... प्रयुज्यमाने च)
रणे स्थानिन्यपि मध्यमः तिङ्वाच्यकारकवाचिनि युष्मद्युपपदे प्रयुज्यमाने च मध्यमः तथाभूतेऽस्म
(मध्यमोत्तमयो रविषये प्रथमः)
द्युत्तमः शेषे प्रथमः भू तिप् ति जाते तिङ् शित्सार्वधातुकं तिङः शितश्च धात्वधिकारोक्ताः प्र
त्ययाः सार्वधातुकसंज्ञाः कर्तरि शप् कर्त्रर्थे सार्वधातुके परे धातोः शप् सार्वधातुकार्धधातुकयोः अन
योः परयोरिगन्ताङ्गस्य गुणः अवादेशः भवति भवतः झोन्तः प्रत्ययावयवस्य झस्यान्तादेशः

प्रथमतः प्रथ मपुरुषवकुम्भ चितं कथं मध्य मेति ॥ प्रश्ने चे तिङ्त्रेनुवृत्य ३४ र्थ मध्य मइति ॥ प. पं.

नकारे ऽकार उच्चारणार्थः ॥ धात्वधिकारोक्तेति किं ॥ इरी नित्यत्र धातोः शित्वात्सार्वधातुकमपित् ङित् ॥ इति द्वि त्वात् ॥ घेर्ङिति इति शाल्लेर्गुणः स्यादिति भावः ॥ ३

अतोऽगुणे भवंति भवसि भवथः भवथ अतो दीर्घो यमि अतोऽगस्य दीर्घो यञादौ सा
र्वधातुके भवामि भवावः भवामः स भवति तौ भवतः ते भवंति त्वं भवसि युवां भवथः
यूयं भवथ अहं भवामि आवां भवावः वयं भवामः शेषे विभाषा कस्वादावषोतउ
स्वादि
पदेशे कादिषांतषडैंगदनदादेरन्यस्मिन्धातावुपसर्गस्थान्निमित्तात्परस्य नेर्णत्व
स्याद्वा प्रणिभवति प्रनिभवति परोक्षे लिट् [illegible]
भूतानद्यतनपरोक्षेऽर्थे धातोर्लिट् स्यात् लस्य तिबादयः परस्मैपदानां णलतुसुस्थ
लथुसणल्वमाः लिट्स्तिबादीनां णलादयः स्युः भूञ इति स्थिते भुवो वुग्लुङ्लिटोः अ
७॥ ६॥१॥८॥
चि लिटि धातोरनभ्यासस्य लिटि परेऽनभ्यासस्य धात्ववयवस्यैकाचः प्रथमस्य द्वे स्तः
स्तजादेः॥ उर्गुणाव॥ [illegible]

म. सि.
कौ.
३५
35

अ६।१।१।८।।
आदिभूतादचः परस्यात्तु भूभूव इति पूर्वोभ्यासः अत्र ये द्वे तयोः हलादिशेषः अभ्या
सस्यादिर्हल् शिष्यते अन्ये हलो लुप्यन्ते ह्रस्वः अभ्यासस्यासस्याचः भवतेरः भवतेर
भ्यासोकारस्य अः स्याल्लिटि अभ्यासेचर्च अभ्यासे झलां चरः स्युर्जशश्च झलां जशः
खयां चर इति विवेकः बभूव बभूवतुः बभूवुः लिङ् लिडादेशस्तिङार्द्धधातुकसं
ज्ञः आर्द्धधातुकस्येड्वलादेः बभूविथ बभूवथुः बभूव बभूव बभूविव बभूवि
म अनद्यतने लुट् भविष्यत्यनद्यतनेऽर्थे धातोर्लुट् स्यतासी ल्लुलुटोः धातोरेतौ स्तो ल्
लुटोः परतः शबाद्यपवादः लृ इति लृङ्लृटोर्ग्रहणम् आर्द्धधातुके शेषः तिङ्शि ह्यो
न्यो धातोरितिविहितः प्रत्ययस्तत्संज्ञः स्यात् इट् लुटः प्रथमस्य डारौरसः भविता नासलो रा. ३५

लोपः सादेशप्रत्यये रिच तदेशप्रत्ययेतथा भवितारौ भवितारः भवितासि भवितास्थः भविता
स्थ भवितास्मि भवितास्वः भवितास्मः ल्टृच्शेषेच भविष्यदर्थाद्धातोर्ल्टृट् क्रियार्थायांक्रिय
यामुपपदेचस्याल्टृट् भविष्यति भविष्यतः भविष्यन्ति भविष्यसि भविष्यथः भविष्यथ भ
विष्यामि भविष्यावः भविष्यामः लोट्च विध्यादिष्वर्थेषुधातोर्लोट् आशिषिलिङ्लोटौ प
तः लोटउकारस्यउः भवतु तुह्योस्तातङाशिष्यन्यतरस्यां आशिषितुह्योस्तातङ्वापरत्वात्स
र्वादेशः तत्तुङिच्चेत्यस्यबाधकःकाशाःउतिचेत् ऋणः अतंत्यार्थउकारग्रहणात्ताङादिष्विति
गृहाण भवतात् लोटोलङ्वत् लोटस्तामादयःसलोपश्च तस्थस्थमिपांतांतंतामः॥
ङित्त्वस्त्वतांतामादयःस्युः भवतां भवंतु सेर्ह्यपिच्च लोटःसेर्हिःसोपिच्च अतोहेर्लुक्
भव भवतात् भवतं भवत मेर्निः लोटः आडुत्तमस्यपिच्च लोटुत्तमस्याट्सपिच्च

म॰ सि॰
कौ॰
३६
36.

हिन्योरुत्वे नइकारोच्चारणसामर्थ्यात् भवानि ते प्राग्धातोः ते गत्युपसर्गसंज्ञा धातोः प्रागेव
प्रयोक्तव्याः आनि लोट् उपसर्गस्थान्निमित्तात्परस्य लोडादेशस्यानिस्य णः स्यात् प्रभवाणि
दुरः षत्वणत्वयोरुपसर्गत्वप्रतिषेधो वक्तव्यः दुःस्थितिः दुर्भवाणि अन्तःशब्दस्याङ्किविधि
णत्वेषूपसर्गत्वं वाच्यं अन्तर्भवाणि नित्यं ङितः सकारान्तस्य ङिदुत्तमस्य नित्यं लोपः अलो
न्त्यस्येति सलोपः भवव भवाम अनद्यतने लङ् अनद्यतनभूतार्थवृत्तेर्धातोर्लङ् लङ्लृ
ङ्क्षुडुदात्तः एष्वंगस्याट् इतश्च ङितो लस्य परस्मैपदमिकारांतं यत्तस्य लोपः अभवत्
अभवतां अभवन् अभवः अभवतम् अभवत अभवं अभवाव अभवाम विधिनिमंत्र
णामंत्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् एष्वर्थेषु धातोर्लिङ् यासुट् परस्मैपदेषूदात्तो ङिच्च
लिङः परस्मैपदानां यासुडागमो ङिच्च ङितोन्नेर्लोपने क्वचिदनवकाशकार्यैष्वनलाविधा

भ॰सि॰
कौ॰
३६

अभूवन् अभूः अभूतं अभूत अभवं अभूव अभूम नमाङ्योगे अडाटौ न स्तः माभू-
वान् भूत मास्म भवत् मास्म भूत् लिङ्निमित्ते लृङ् क्रियानिष्पत्तौ हेतुहेतुमद्भावादि लि-
ङ्निमित्तं तत्र भविष्यदर्थे च लृङ् क्रियायाश्चानिष्पत्तौ गम्यमानायां अभविष्यत् अभवि-
ष्यतां अभविष्यन् अभविष्यः अभविष्यतं अभविष्यत अभविष्यं अभविष्याम
सुवृष्टिश्चेदभविष्यत्तदा सुभिक्षमभविष्यत् इत्यादि ज्ञेयं प्रभवतीत्यादौ उपसर्गा-
णामसमस्तत्वेऽपि संहितानित्या तदुक्तं संहितैकपदे नित्या नित्या धातूपसर्गयोः
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते सत्त्वाद्यर्थनिर्देशश्चोपलक्षणं योगात्सर्गो भ-
वतीत्यादावुपयत इत्याद्यर्थात् उपसर्गास्त्वर्थविशेषद्योतकाः प्रभवति पराभवति सं

वत्स्यमाणेति॥ वृत्त परमा...धातोर्लृट् ...लृट्शेषे च ...रूपं जातं॥ लृटः शानच्॥
...इति रूपं सिद्धं॥ ...धातोः ...टिदादि ...प्रकृतेः ...
इति॥ ...परस्मैपदे ...ङिच्चेति ...ङित्त्वं तु कार्यं॥ लिङः ...
...॥ ...लिङि ...

विति॥ प्रतिषेधयइतितेनवक्ष्यमाणेनामिङ्डीत्र लिङः सलोपोनंतस्य सार्वधातुकलिङोनंत

स्यसस्यलोपः इतिप्राप्ते अतोयेयः अतः परस्य सार्वधातुकावयवस्य यासः इयङ्गेणः लो

पोव्योर्वलि भवेत् भवेतां झेर्जुस् लिङः भवेयुः भवेः भवेतं भवेत भवेयम् भवेव भ

वेम लिङाशिषि आशिषिलिङः लिङ्स्तिङार्धधातुकसंज्ञः किदाशिषि आशिषिलिङोयासु

ट्कित् स्कोरितिसलोपः क्ङितिच गितिकितिङितिनिमित्ते इग्लक्षणौ गुणवृद्धीनस्तः

भूयात् भूयास्तां भूयासुः भूयाः भूयास्तं भूयास्त भूयासं भूयास्व भूयास्म लुङ् भूतार्थवृ

त्तेर्धातोर्लुङ् च्लि लुङि स्याच्लुपाभूभ्यः सिचः परस्मैपदेषु लुक् गापाविहेणादेशापि

वतीग्रहणं भुवो वुग्लुङ्लिटोः भूसुवोस्तिङि सार्वधातुकेतिङि गुणोन अभूत् अभूतां

भवति अनुभवति अभिभवति उद्भवति परिभवतीत्यादौ विलक्षणार्थावगतेः उक्तं च उपस
र्गेणधात्वर्थो बलादन्यत्र नीयते प्रहाराहारसंहारविहारपरिहारवत् इति अनस्यातन्यग
मते अनति अतस्यादेः अभ्यासस्यासस्यादेरतो दीर्घः स्यात् आत आततुः आतुः आ
तिथ आनथुः आन आत आनिव आनिम अनिता अनिष्यति अनतु आडजादीनां अ
जादेरागमस्यादिल्लुङ्लङ्लृङ्क्षु आनत् अनेत् अनात् अनासीत् लुङि सिचइडागमेकृते असि
सिचोऽपृक्ते विद्यमानात् सिचोऽस्तेश्च परस्यापृक्तस्य हलईडागमः इट ईटि इटः परस्य सस्य लो
पः स्यादीति सिज्लोपे एकादेशे सिद्धो वाच्यः आनीत् आनिष्टां सिज्भ्यस्तविदिभ्यश्च
सिचोऽभ्यस्ताद्विदेश्च परस्य ङित्संबंधिनो झेर्जुस् आनिषुः आनीः आनिष्टं आनिष्ट आ

तिषं आतिष्ट आतिष्म आतिष्मत एवं अवरतणागतिकोतिप्रीतितृप्त्यवगमप्रवेशश्र
वणास्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिंगनहिंसादानभागवृद्धिषु ॥१॥
अवतीत्यादि षिवु गतौ पुगंतलघूपधस्य च पुगंतस्य लघूपधस्य चांगस्येको गुणः
सार्वधातुकार्धधातुकयोः यासादेरितिसः सेवति षत्वं सिषेव सेकसृपसृस्तृस्वञ्ज
स्तुस्वाञ्जेदंमाजेनसादयः षकारः घोपदेशाः ष्वष्कस्विदस्वदस्वंजस्वपृस्मिङः दंतजके
वलदंत्यः ष्वष्कादीनां पृथग्ग्रहणात् असंयोगाल्लिट्कित् असंयोगात्परोऽपिल्लिट्कि
त्स्यात् सिषिवतुः सिषिवुः सिषेविथ सिषिवथुः सिषिव सिषेव सिषिविव सि
षिविम सेविता सेविष्यति सेवतु असेवत् सेवेत् सिव्यात् असेवीत् असेविष्यत्

सात्पदाद्योः सत्वषोनइतिनिषेधेप्राप्ते उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनय
सेधसिचसंजस्वंजां उपसर्गस्थान्निमित्तादेषांसस्यषः सदिरप्रतेः प्रतिभिन्नादुपसर्गात्सदेः
अहं तु करोमि अहं तु कार्षं पुरि लुङ्चास्मे पुरायोगे भूतानद्यतने वा लुङ् चाल्लट् न स्मयोगे पठेयथा प्राप्तं वसन्तीह पुरा छात्राः अवात्सुः अवसन् ऊषुर्वा अस्मे किं यजति स्म पुरा भविष्यतीत्यनुवर्तमाने यावत्पुरानिपातयोर्लट् यावद्भुङ्क्ते पुरा भुङ्क्ते निपातयोः किं यावद्दास्यते तेन यावद्भोजयते करणभूतया पुरा यास्यति विभाषा कदा कर्ह्योः लट् स्यात् कदा कर्हि वा भुङ्क्ते भोक्ष्यते भोक्ता वा वर्तमानसामीप्ये वर्तमानवद्वा वर्तमाने ये प्रत्यया उक्तास्ते वर्तमानसामीप्ये भूते भविष्यति च वा स्युः कदाऽऽगतोऽसि अयमागच्छामि आगमं वा कदा गमिष्यसि एष गच्छामि गमिष्यामि वा आशंसायां भूतवच्च भविष्यकाले भूतवद्वर्तमानवच्च प्रत्यया वाऽऽशंसायां

लटि । लुङि । पठे लङ् लिटौ स्तः ॥ लट् । निपातत्वाभावे लट् एव

लङि अवसन्॥
यावत्पुरानिपातयो रुपपदयोर्भुज धातोर्भविष्यति लट् स्यात् २॥
भविष्यत्यर्थे कदा कर्ह्यो रुपपदयोर्भविष्यत्यर्थे धातोर्लट् स्यात्

वर्तमानसामीप्ये यथा॥ कदाऽऽगतोऽसि इति भूतकाले वर्तमानमुदाहृतम्॥ आगच्छामीति भूतकालाभिव्यक्तये वर्तमानकाल
मुदाहरणं [illegible] अयं इति इदानीमेवागच्छामि॥ २॥ कदा गमिष्यसि इति भविष्यत्काले प्रश्नवाक्यं॥ एष गच्छामीत्युदा
हरणे भविष्यत्कालाभिव्यक्तये एष इति प्रयोगात् इदानीमेव ग[illegible]मिष्यामि इति वर्तमानकालोदाहृतः॥ २॥

देवश्चेद्वर्षीद्वर्षति वर्षिष्यतिवा तदायास्यामवप्स्यामःवपामः वप्स्यामोवा क्षिप्र
वचनेलृट् क्षिप्रपर्यायोपपदे पूर्वविषयेलृट् दृष्टिश्चेत्क्षिप्रमाशुत्वरितंवा आ
यास्यति शीघ्रंवप्स्यामः आशंसावचनेलिङ् आशंसावाचिन्युपपदेभविष्यति
लिङ्स्यात्भूतवत् गुरुश्चेदुपेयादाशंसे अधीयीय आशंसे क्षिप्रमधीयी
य हेतुहेतुमतोर्लिङ् वास्यात् कृष्णंनमेच्चेत्सुखंयायात् कृष्णंनंस्यतिचेत्सुखं
यास्यति भविष्यत्येवेष्यते नेह हंतीतिपलायते इच्छार्थेषुलिङ्लोटौ इच्छामि
भुंजीत भुंक्तांवा भवान् एवंकामप्रवेदनेऽकच्चितिवक्तव्यम् नेहकच्चित्करोति लि
ङ् समानकर्तृकेष्विच्छार्थेषु भुंजीयेतीच्छति विधिनिमंत्रणेतिलिङ् विधिः

लिङ्-स्यात्॥

कामप्रवेदनाभावात्लट्एव

म.सि.कौ.
१९
109

प्रेरणं भृत्यादेर्निकृष्टप्रवर्त्तनंयजेत [illegible]
[illegible] यजेत निमंत्रणंनियोगकरणं अवश्यकेश्राद्धभोजना
उत्तरत्र म　　　　स्वेच्छाचारः
दौदौहित्रादेःप्रवर्त्तनं इहभुंजीत आमंत्रणंकामचारानुज्ञा इहासीत अधीष्ट
सत्कारपूर्वकोव्यापारः पुत्रानध्यापयेत् संप्रश्नःसंप्रधारणं किंभोवेदमधीयी
य उततर्कंप्रार्थने याञ्चाभोभोजनंलभेय एवंलोट् प्रैषातिसर्गप्राप्तकालेषु
कृत्याश्च प्रैषोविधिः अतिसर्गः कामचारानुज्ञा चकारेणलोटोनुकर्षणं
= येकृत्यतृचःप्रत्ययाःस्युः
प्राप्तकालार्थं भवतायष्टव्यं भवान्यजतां अर्हेकृत्यतृचश्च चाल्लिङ् त्वंकन्यांवि
=कार्य
वहेः शकिलिङ् शक्तोलिङ्साञ्चात्कृत्याः त्वंभारंवहेः यावत्संवत्येप्रत्ययाः या

१९

त्वर्थानां संबंधे यत्र काले प्रत्यया उक्तास्ततोन्यत्रापि स्युः तिङ्न्तवाच्यक्रियायाः
प्राधान्यात्तदनुरोधेन गुणभूतक्रियावाचिभ्यः प्रत्ययाः वसन्ददर्श भूतेलु
शाब्दबोधः
ङ् अतीतवासकर्तृकं दर्शनमर्थः सोमयाज्यस्य पुत्रो भविता सोमेन यद्वा मा [illegible]
शाब्दबोधः
गोयः पुत्रस्तत्कर्तृकं भवनं क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः
पौनःपुन्ये भृशार्थे च द्योत्ये धातोर्लोट् स्यात् तस्य च हिस्वौ स्तः लिङ्ङोपवादः तौ च
हिस्वौ क्रमेण परस्मैपदात्मनेपदसंज्ञौ स्तः तिङ्संज्ञा च तध्वमोर्विषये तु हिस्वौ वा
स्तः पुरुषैकवचनसंज्ञे इत्यनयोरिति दिक् स्वपेते हिस्वविधानसामर्थ्यात् तेन स
धमःस्वःस्मात
कलपुरुषवचनविषये परस्मैपदिभ्यो हिः कर्तर्यात्मनेपदिभ्यः स्वो भावक

म॰ सि॰ कौ॰ ११॰ 110

मेकन्दिषु समुच्चयेन्यतरस्यां अनेकक्रियासमुच्चये द्योत्ये प्रागुक्तं वा स्यात् यथा
विध्यनुप्रयोगः पूर्वस्मिन् आद्ये लोड्विधाने लोट्प्रकृतिभूत एव धातुरनुप्र
योज्यः समुच्चये सामान्यवचनस्य समुच्चये लोड्विधौ सामान्यार्थस्य धातोरनु
प्रयोगः स्यात् अनुप्रयोगाद्यथायथं लङादयस्तिवादयश्च ततस्मोकाल
योः पुरुषविशेषार्थस्य चाभिव्यक्तिः क्रियासमभिहारे द्वे वाच्ये याहिया
हीतियाति पुनःपुनरतिशयेन वा यातीत्यर्थः एककर्तृकं चर्दमानं
यानेयातीत्यस्य इतिशब्दस्य अभेदान्वयेनार्थं ग्राहयति एवं यातः याति
यासि याथः याथ यातियाते तिपूर्ये याथ याहियाहीत्ययासीत् यास्यति

११॰

ध्वमः स्वः यत्र ध्वमः स्वो नस्यात्तत्रेदम्

वा अधीष्वाधीष्वेत्यधीतेध्वं विषये पदे अधीध्वमधीध्वमिति यूयमधीध्वे इत्यनुव
येन प्रकृत्यिवधानाः स्वादेत्यप्यवहरति अन्नं भुंक्ष्व दाधिकमास्वादस्वेत्यप्यव

मलोहरितिदेहलीक व

हरते नप्यमोस्तु पिबत स्वादतेत्यप्यवहरथ भुंग्ध्वं आस्वादध्वमित्यभ्यवहर
थ भुंग्ध्वं आस्वादध्वमित्यभ्यवहरध्वे यथा पदे हि सो अत्र समुच्चीयमानविशेषा
णामनुप्रयोगार्थं नसामान्येनाभेदान्वयः पदे सक्तून्पिबति धानाः स्वादति
अन्नं भुंक्ते दाधिकमास्वादते पतेन पुरीमवस्कंद लुनीहि नंदनं मथाण रत्ना

ली

निहरामरोगनाः विगृह्य चक्रेनमुचि द्विषा वलीयरूत्यमस्तास्य महन्नित्यं
शिव इति व्याख्याने अवस्कंदनलवनादिरूपाभ्यामानद्यतनपरोक्षाएकक

क्तो निरूपितस्तमाह ॥ धातोः ननु तिङ् निरूपणात्प्रागेव स्योऽटके किन्नच्चिरस्थौ प्रानिरूपणं कृतमितिकिकथमिदं भवदुक्तसंगतिः स
गच्छत इति चेदत्राहुः ॥ कि न्नादि निरूपणस्य तत्रप्रासंगिकत्वात्प्राधान्येन कृतामत्रैव निरूपणान्नोक्तशंकावकाश इति ॥ वासरूपो ॥ स्त्रियां
अपवादेन नित्यं बाधे प्राप्ते क्वचिदुत्सर्गस्यापि प्रवृत्त्यर्थमिदं सूत्रमतएवाचोपत अनहेलोऽर्थपदित्याद्यपवादविषये तत्रा

देकाश्रस्यास्यक्रियेत्यर्थात् इह पुनः पुनश्च स्कंदेत्यादिरर्थ इति व्याख्यानं भ्रम
मूलमेव द्वितीयस्य चैकक्रियासमभिहारे इत्यस्यानवप्रवृत्तेः लोडेन हित्वा पनेस्य पु
नीमव स्कंदेत्यादि मध्यमपुरुषैकवचनमित्यपि केषांचिद्भ्रम एव पुरुषवचान
मन्वेडुहूनेनानुक्तत्वात् ॥ इति लकारार्थप्रक्रिया ॥ इति तिङ् ॥ ओं
श्रीगणेशाय नमः धातोः आतृतीयाध्यायांतेये प्रत्ययास्ते धातोः परे स्युः कृ
दतिङ् इति कृत्संज्ञा वासरूपोऽस्त्रियां अस्मिन् धात्वधिकारे ऽसरूपोऽपवाद
प्रत्यय उत्सर्गस्य वाबाधकः स्यात् स्त्र्यधिकारोक्तं विना कृत्याः ण्वुलस्तृचावित
तः प्राक् कृत्यसंज्ञाः स्युः कर्तरि कृत् इति प्राप्ते तयोरेव कृत्यक्तखलर्थाः प

॥ अत्र तत्र प इत्यादि

ण्वुल्तृचौ उत्सर्गौ ॥ इगुपध
ज्ञाप्रीकिरः कः इत्यपवादः ॥
तद्विषये ण्वुल्तृचव पि
भवतः क्षेपाः ॥ क्षेपकः ॥ क्षे
प्ता ॥ अग्रे स्वरूपकाकिर गोदः
अजिघ्या किरः ॥ चिकीर्षा ॥
अग्रे स्यो बाधको भवती
ति व क्तव्यम् ॥ ३ ॥ २ ॥ ॥

नकाररेफौ स्वरार्थौ

तेभावकर्मणोरेवस्युः तव्यत्तव्यानीयरः धातोरेतेस्युः पचितव्यं पचनीयंत्वया

कर्मैकवचनं भावेऽत्सर्गः क्लीबत्वंच चेतव्यम्चयनीयोवा धर्मस्त्वया केलिमर उपसंख्या

नं पचेलिमामाषाः पक्तव्या इत्यर्थः भिदेलिमाः कर्मणिप्रत्ययः वसेस्तव्यत्क

र्त्तरिणिच्च वसतीतिवास्तव्यः कृत्यचः उपसर्गस्थान्निमित्तात्परस्याचउत्तरस

म. सि.
कौ.
११२
112

कृत्स्यस्यनस्यणत्वेस्यात् प्रयाणीयं अचः किं प्रमग्नः निर्विण्णस्योपसंख्यानं णेर्वि

भाषाप्राग्वत् प्रयापणीयं प्रयापनीयं हलश्चेजुपधात् कृत्स्नस्याचः परस्य णो

वा प्रकोपणीयं प्रक्रोपनीयं हलः किं प्रोहणीयं इजुपधात् किं

प्रवणीयं

इङ्गादेः सनुमः सनुमश्चेद्भवति इङ्गादेर्हलन्ताद्वितीयः कृत्यस्थस्यैव प्रेंभणीयं प्रेंखणीयं
इङ्गादेः किं मगिसर्पणे प्रमंगनीयं वा निंसनिंदनिंदा पधानस्य णो वा कृति प्रणिंसि
तव्यं प्रनिंसितव्यं नभाभूपूकमिगमिप्यायीवेपां पश्चः कृत्यस्य णो न प्रभानीयं एवं
नभादीनामुपसंख्याने प्रभापनीयं कृत्यल्युटो बहुलं क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः
क्वचिद्विभाषा क्वचिदन्यदेव विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदंति
स्नात्यनेन स्नानीयं चूर्णं दीयते स्मै दानीयो विप्रः ऋदुपधाच्चाक्लृपिचृतेः क्यप् स्या
त् वृत्तवृत्यं वृधवृध्यं क्लृपिचृतोस्तु कल्प्यं चर्त्यं अचोयत् चेयं जेयं ईद्यति आतः गु
णः देयं ग्लेयं पोरदुपधात् पवर्गान्तादुपधाद्यत् एषतोपवादः शप्यं लभ्यं आङो

म॰ सि॰
वैत॰
१०७
107A

ण्याङः परस्य लभेर्नुम् स्यात् यादौ प्रत्यये आलंभ्यो गौः उपात्प्रशंसायां उपलंभ्यः सा
धुः स्तोतुं किं उपलभ्यं शक्यः उपलभ्यः शकिसहोश्च शक्यं सह्यं गदमदचरयम
श्चानुपसर्गे गद्यं मद्यं चर्यं चरेराङि चागुरौ आचर्यो देशः अगुरौ किं आचार्य उ
रुः यमो अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु अवद्यं पापं पण्यं विक्रेयं शा
नेन वर्या कन्या वह्यं करणं वहत्यनेनेति वह्यं शकटं वाह्यमन्यत् अर्यः स्वामिवै
श्ययोः अनयोः किं ब्राह्मण आर्यः उपसर्या काल्या प्रजने गर्भग्रहणे प्राप्तका
ला चेदित्यर्थः उपसर्या गौः गर्भाधानार्थं वृषभेणोपगन्तुं योग्येत्यर्थः प्रजने का
ल्येति किं उपसार्या काशी प्राप्तव्येत्यर्थः अजर्यं संगतं विशेष्यं चेत् नजीर्यतीत्य १०७

जर्यं वटः स्तुपिष्ठाप्रच चाष्यञ् ब्रह्मोऽद्यं ब्रह्मवर्च्यं भुवोभावे क्यप् ब्रह्मणोभावो ब्रह्म
भयं हननस्तच चात्काप् ब्रह्मणोहनने ब्रह्महत्या रात्रिस्तशास्त्रहरनुषः क्यप् हस्तस्य
पितिकृतिनक् रसः स्तुत्याः शिष्यः वृङ्तिवृञोयहणे नवृङः वृत्यः वृङस्तुवार्यां
ऋत्विजः आहत्यः नृष्यः पुनःकावुक्तिः परस्यापि णपतोवाधनार्थ्यां अवश्यस्तुमः
मजेर्विभाषा मजेःकाव्वा मज्यः मृदृलोणपत् मृचर्णोनाज्हलेनाच्चणपत् चजोःकुधि
णपतोः चजोःकुत्वेचितिणपति निष्ठायामनिट्इतिवक्तव्यं तेनेहन गर्ज्यमार्ग्यः आरा
वश्यकेणपत् पाक्यंल्लंपेदवश्यमःकृत्ये तेकाममनसोरपि समोवाहितततयो मांस
स्यपचिपुहृचजोः अवश्यपलाव्यं गंतुकामः गंतुमनाः सहितः संहितः सततः

म. सि. कौ. १०८
108A

सेतनः मांसपाकः मांसपचने भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वाएते
कृत्यान्ताः कर्त्तरि वा निपात्यन्ते भवतीति भव्यः भव्यमनेन वा भोज्यं भक्ष्ये भोग्यमन्य
त् राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः एते सप्त क्यबन्ता निपात्यन्ते भि
द्योद्ध्यौ नदे नदे किं भेत्ता उद्धिता पुष्यसिद्ध्यौ नक्षत्रे विपूय विनीय जित्याः मुञ्जक
ल्कहलिषु विपूयो मुञ्जः विनीयः कल्कः जित्यो हलिः प्रत्यपिभ्यां ग्रहेः छन्दसि
वक्तव्ये प्रतिगृह्यं अपिगृह्यं लोके तु प्रतिग्राह्यं पदास्वैरिबाह्यापक्ष्येषु च अवगृ
ह्यं प्रतिगृह्यं पदे अस्वैरिपरतन्त्रः गृह्यकाः शुकाः ग्रामगृह्या सेना आर्यैः गृह्यते
आर्यगृह्यः न पक्षाश्रितः स्वपक्ष्यः विभाषाकृवृषोः क्यप् स्यात् कृत्यं वृष्यं पक्षे ण्यत् का १०८

कार्यं वर्ष्मे अग्निंचपत्रे पत्रेवाहने योगमन्यत् अमावस्यदन्यतरस्यां अमासहवसतो
स्यांचेद्राकौ त्यमावस्या अमावास्यावा अग्नौपरिचाय्योपचाय्यसमूह्याः अग्निथा
राणार्थं स्थलविशेषेपतेसाधवः अनतत्रपरिचेये उपचेयेसंवाह्ये क्रतौकुंडपा
यसंचाय्यौ चित्याग्निचित्येच चित्योग्निः अग्नेश्चयनमग्निचित्या इतिकृत्यप्रक्रिया
श्रीगुरुचरणाभ्यांनमः पवृलतन्वा धातोरेतोलः कर्त्तरिकृदितिकर्त्रर्थे युवोरनाकौ
अनुपतयोरनुनासिकयोरेतौलः कारकः कर्त्ता कर्मेःकर्त्रेयात्मनेपदविषयात्
कृतइणनिषेधोवाच्यः प्रक्रंता कर्त्तरीतिकिं प्रक्रमितव्यं आत्मनेपदेतिकिं संक्र
मिता अनन्यभावेविषयपाव्वः तेनअनुपसर्गाद्वेति विकल्पादिसननिषेधः क्र

प्र.सि.
कौ.
१०९
109A

मिता नंदिग्रहिपचादिभ्योल्युणिन्यचः नंद्यादेर्ल्युः ग्रहादेर्णिनिः पचादेरच्स्यात् नंदय

तीतिनंदनः जनार्दनः लवणः गणोनिपातनात्साधुत्वं ग्राही स्थायी मंत्री पचादिराकृ

तिगणाः इगुपधज्ञाप्रीकिरः कः क्षिपः बुधः कृशः ज्ञः प्रियः किरः आतश्चोप

सर्गे प्रज्ञः सुग्लः पाघ्राध्माधेदृशः शः पिबः जिघ्रः धमः धयः पश्यः अनुप

सर्गाल्लिंपविंदधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च लिंपः विंदः धारयः वेदयः

उदेजयः चेतयः सातयः पारयः साहयः अनुपसर्गात्किं प्रलिपः गवादिषुविंदेः

संज्ञायां गोविंदः ददातिदधात्योर्विभाषा ददः दधः प्रनेर्वदनाधानात्‌णः ज्वलि

तिकसंतेभ्योणःवास्यात् ज्वालः ज्वलः चालः चलः श्यात्र्याधास्त्रुसंस्त्रुतीणवसाव १०९

हृलिहश्लिषश्वसश्च अवश्यायः आत् धायः व्याधः आस्रावः संस्रावः अत्यायः अवसा
यः अवहारः लेहः श्लेषः श्वासः विभाषाग्रहः व्यवस्थितविभाषेयं तेन जलचरे ग्राहः
ज्योतिषि ग्रहः गेहे कः गृह्णातीत्यादिकमिति निरूढे शिल्पिनि ष्वुन् क्रियाकौशले शिल्पं ष्व
न्तस्यास्तीति नृतिखनिरञ्जिभ्य एव नर्तकः खनकः अके अने च रञ्जेर्नलोपो वाच्यः र
जकः गस्थकन् गाथकः ण्युट् च गायनः प्रुसृल्वः समभिहारे वुन् समभिहारे ग्रहणा
त्साधुकारित्वं लक्ष्यते प्रवकः सरकः लवकः आशिषि च वुन् तस्मात् जीवनात् जीवकः
तत्रोपपदं सप्तमीस्थं सप्तम्यन्ते पदे कर्मणीत्यादौ वाच्यत्वेन स्थिते कुंभादि तद्वाचकं पदमुप
पदसंज्ञं स्यात् कर्मण्यण् कर्मण्युपपदे धातोरण् कुंभं करोतीति कुंभकारः आतोऽनु

म॰सि॰ कौ॰ ११९ 110A

पसर्गे कः सुप्युपपदे अणोपवादः गोदः केवलदः अनुपसर्गे किं गोसंदायः मूलविभुजादि
भ्यः मूलानि विभुजति मूलविभुजो रथः आकृतिगणोऽयं महीध्रः कुध्रः सुपिस्थः स
मस्थः विषमस्थः सुपीति योगविभागादन्यस्मादपि स्थ इति कप्रत्ययांतस्मान्नकर
णे षष्ठ्यर्थे प्रथमा द्वाभ्यां पिबतीति द्विपः अंबांबगोभूमिसव्यापद्वित्रिकुशेकुशंकं
ग्वंगुमंजिपुंजिपरमेबर्हिर्दिव्यग्निभ्यः स्थः सस्य षः स्यात् द्विष्ठः त्रिष्ठः तुंदशोकयोः परि
मृजापनुदोः तुंदशोकयोः कर्मणोरुपपदयोराभ्यां कः स्यात् आलस्यसुखाहरणयो
रिति वक्तव्यम् तुंदपरिमृजोऽलसः शोकापनुदः सुखस्याहर्ता प्रेदाज्ञः दारूपाज्ञा
नातेभ्यः प्रोपसृष्टात्कर्मण्युपपदे कः स्यादणोपवादः सर्वप्रदः पथिप्रज्ञः समि ख्यः गोसं ११९

त्वेः गापोष्टक् कर्मण्युपपदे सामगः पिबतेःसुरासीध्वोरितिवाच्यं सुरापी सीधुपी हर
तेरनुद्यमनेच अंशहरः अनुद्यमनेकिं भारहारः शक्तिलांगलांकुश तोमर यष्टि घ
ट घटी धनुष्षुग्रहेः शक्तिग्रहः सूत्रेचधार्यर्थे सूत्रग्रहः यस्तुसूत्रंकेवलमुपादत्तेन
तुधारयति तत्राणेवसूत्रग्राहः वयसिच उद्यमनार्थंसूत्रं कवचहरः कुमारः आङि
ताच्छील्ये पुष्पाण्याहरतितच्छीलःपुष्पाहरः अर्हःअच्स्यात् कर्मण्युपपदे पूजार्हा
ब्राह्मणी स्तंबकर्णयोर्रमिजपोः हस्तिसूचकयोरिति वक्तव्यं स्तंबेरमते स्तंबेरमो हस्ती
कर्णेजपःसूचकः शमिधातोःसंज्ञायां शंभवः शंवदः पुनर्धातुग्रहणंवाऽसरूपविषयेऽपि
प्रवृत्त्यर्थं अधिकरणेशेतेः खेशेते खशयः पार्श्वादिषूपसंख्यानं पार्श्वाभ्यांशेतेपार्श्व

प्रायः पृष्ठप्रायः उत्तरप्रायः चरेष्टः अधिकरणेउपपदे कुरुचरः कुरुचरी भिक्षासेना
दायेषुच भिक्षाचरः सेनाचरः आदायेतिल्यबन्तं आदायचरः कृञोहेतुताच्छील्यानु
लोम्येषु एषुद्योत्येषु कृञष्टः अतःकृकमिकंसकुंभपात्रकुशाकर्णीष्वनव्ययस्य
अतउत्तरस्यानव्ययविसर्गस्यसमासेनित्यंसादेशः करोत्यादिषुपरेषु यशस्करीवि
द्या श्राद्धकरः वचनकरः दिवाविभानिशाप्रभाभास्करांतानंतादिबहुनांदीकिंलि
पिलिविबलिभक्तिकर्तृचित्रक्षेत्रसंख्याजंघाबाह्वहर्यत् तद्धनुररुष्षु एषुकृञष्टोहे
त्वादावपि दिवाकरः विभाकरः निशाकरः कस्कादित्वात्सः भास्करः बहुकरः प
ककरः क्षिकरः अहस्करः धनुष्करः इत्यादि नशब्दश्लोककलहगाथावैरचाटुसूत्र

मेत्रपदेषु पशुकृजष्टोन शार्ङ्कारः स्तेवपाक्कतोस्ति ब्रीहिवत्सयोरितिवक्तव्यम् स्तेवकरिर्ब्रीहिः
शाक्कान्करिर्वत्सः हरतेर्दृतिनाथयोःपशौ दृतिहरिः नाथंनासारज्जुंहरतीति नाथहरिः पशुः
फलेग्रहिरात्मंभरिश्च पतौनिपात्यते चात् कुक्षिंभरिः चाद्रास्तस्यात्मनोदरके हि ष्ठितिपथ्वः
ज्योत्स्नाकरं भ मृदरंभरय स्वकोरा इतिमुरारिः पञ्जेःषणा एपत्यात् अरुर्द्विषदजन्तस्यमुम्
अरुषोद्विषतोजन्तस्यमुम् रिविंदतेननस्यअयस्यशितीस्याच्छावादि जनेपजयतीतिजनमेजयः
वातशुनीतिलशर्द्धेषु अज्येहृनदजहाम्पः खश् वातमजाःमृगाः स्थितानअयस्यहृस्वः
शुनिंधयः तिलंतुदः शर्द्धजहामाषाः नासिकास्तनयोर्ध्माधेटोः स्तनेःधेट् नासिकायाध्म
श्चेतिवक्तव्यम् स्तनंधयः नासिकंधमः हितानास्तनंधयी नाडीमुष्ट्योश्चध्माधेटोःखश् नाडिंध

मः नाडिंधयः मुष्टिंधमः मुष्टिंधयः उदि कूले रुजिवहोः उत्पूर्वाभ्यां रुजिवहिभ्यां कूले कर्मण्यु
पपदे खश् स्यात् कूलमुद्रुजः कूलमुद्वहः वहाभ्रे लिहः वहः स्कंधः तेन लेढीति वहंलिहो
गौः अभ्रंलिहो वायुः परिमाणे पचः प्रस्थंपचा स्थाली खारिंपचः कटाहः मितनखे च मि
तंपचा ब्राह्मणी नखंपचा यवागूः विध्वरुषोस्तुदः विधुंतुदः अरुंतुदः असूर्यललाट
योर्दृशितपोः असूर्यमित्यसमर्थसमासः दृशिना नञः संबंधात् असूर्यंपश्याः
ललाटंतपः सूर्यः प्रियवशे वदः खच् प्रियंवदः वशंवदः गमेः सुपि वाच्यः मितंग
मो हस्ती विहायसो विह च खच्च डिद्वा वाच्यः विहंगमः विहंगः भुजंगमः भुजंगः
द्विषत्परयोस्तापेः खच् खचि परे णावुपधाया ह्रस्वः द्विषंतं परं वा तापयति द्विषंतपः

परंतपः वाचियमोव्रते वाक्शब्देउपपदेयमेःखच्स्यात् वाचंयमपुरंदरौच वाक्पुरोरमं
तत्वेनिपात्यतेवाचंयमोमौनव्रती व्रतेकिं अशक्तत्वादिना वाचंयच्छतिवाग्यामः पूःसर्व
योर्दारिसहोः परंदारयतीतिपुरंदरः सर्वंसहः भगंदारयतीतिभगंदरः इतिकथंवाक्कल
कात् सर्वकूलाभ्रकरीषेषुकषः कूलंकषानदी अभ्रंकषोवायुः करीषंकषावात्या मेघ
र्तिभयेषुकृञः मेघंकरः ऋतिंकरः भयंकरः भयशब्देनतदंतविधिः अभयंकरः
क्षेमप्रियमद्रेऽणाच एष्वकृञोऽणाचात्खच् क्षेमंकरः क्षेमकारः प्रियंकरः प्रियकारः म
द्रंकरः मद्रकारः कथंतर्हिअल्पारंभाः क्षेमकराइति कर्मणःशेषत्वविवक्षायांपचाद्यच् प
वेगणायरभूयपरस्मादय आशितेभुवःकरणभावयोःखच आशितोभवत्यनेनेतिआशिते

भवओदनः आशितस्यभवने आशितंभवः संज्ञायांभृतृवृजिधारिसहितपिदमः खच् वि
श्वंविभर्तीतिविश्वंभरः आशितस्यभवने आशितंभवः संज्ञायांभृतृवृजिधारिसहितपिद
मः खच् विश्वंविभर्तीतिविश्वंभरः रथंतरंसाम पतिंवराकन्या शत्रुंजयोहस्ती युगंधरः
पर्वतः शत्रुंसहः शत्रुंतपः अरिंदमः गमश्च सुतंगमः अंतात्यंताध्वदूरपारसर्वानंते
षुडः गमे अंतगः सर्वत्रपन्नयोर्वाच्यम् सर्वत्रगः पन्नंपतितंगच्छतीतिपन्नगः उ
रसोलोपश्च उरसागच्छतीत्युरगः सुदुरोरधिकरणे सुखेनगच्छत्यत्रसुगः दुर्गः
अन्यत्रापिदृश्यतेइतिवाच्यं ग्रामगः डेच विहायसोविहादेशोवाच्यः विहगः
आशिषिहनः शत्रुंवध्यात् शत्रुहः आशिषिकिं शत्रुघातः दारावाहनोणंतस्यचटःसं

ज्ञायां दारुशब्देऽस्मात् पूर्वोक्तेनैरणादेशोऽस्य दार्वाघातः चारोवा चार्वाघातः कर्मणि
समि च कर्मणि समि च कर्मण्युपपदे सपूर्वोक्तेन हन्तेरक्वेत्यर्थः वर्णान् संहन्तीति
वर्णसंघातः वर्णसंघाटः पदसंघाटः पदसंघातः अपेःक्लेशतमसोः अपिपूर्वोद्ध
तेडः अन्नाशीरर्थे मिदे क्लेशापहः पुत्रः तमोपहः सूर्यः कुमारशीर्षयोर्णिनिः कु
मारघाती शिरसः शीर्षभावो निपात्यते शीर्षघाती लक्षणे जायापत्योष्टक् हन्तेष्ट
क् लक्षणवति कर्तरि जायाघ्नो ना पतिघ्नी स्त्री अमनुष्यकर्तृके च जायाघ्नस्तिलः
कालकः पतिघ्नी पाणिरेखा पित्तघ्नं घृतं अमनुष्ये ति किं आखुघातः शूद्रः अ
श्वघ्न वध्ये बलभद्रः प्रलम्बघ्नः शत्रुघ्नः कृतघ्नः इत्यादि मूलविभुजादित्वात्सिद्धं वो

म॰सि॰
को॰
११४
114

रथ्यातो नगररथ्यातो वा हस्तीनिवाङ्कलकादगाः शाक्तोहस्तिकपादयोः हेतेष्टक् मनुष्य
कर्तृकार्थमिदं हस्तिघ्नो ना कपाटघ्नश्चोरः कवाटीतिपाठांतरे पाणिघ्नताडघौ शिल्पि
नि हेतेष्टक्टिलोपो घत्वं च निपात्यते पाणिताडयोरुपपदयोः शिल्पिनि किं पाणिघा
तः ताडघातः राजघ्नउपसंख्यानं राजोनेहेनिराजघ्नः आढ्यसुभगस्थूलपलितनग्ना
यप्रियेषुच्व्यर्थेष्वच्वौ कृञः करणे ख्युन् एषुच्व्यर्थेष्वच्व्यंतेषु कर्मस्थपदेषु कृञः ख्यु
न् अनाढ्यमाढ्यं कुर्वंत्यनेन आढ्यंकरणं अच्वौ किं आढ्यीकुर्वंत्यनेन कर्तरि भुवः
खिष्णुच्खुकञौ आढ्यादिषुच्व्यर्थेषुनेषु भवतेरेतौ स्तः अनाढ्यः आढ्यो भवति आढ्यं
भविष्णुः आढ्यंभावुकः सन्नत्विषदुहयुजविद्भिदछिदजिनीराजामुपसर्गेऽपि क्विप् एभ्य ११४

क्विबुपसर्गेसत्यसतिचसुप्युपपदेद्युसत् सदिद्युतेतिस्त्रिषः उपनिषत् अंडसूः प्रसूः मि
त्रद्विट् मित्रध्रुक् प्रध्रुक् गोधुक् अश्वयुक् प्रयुक् वेदवित् निर्वित् इत्यादि अग्रग्रा
माभ्यांनयतेर्णावाच्यः अग्रणीः भजेर्ण्विः सुप्युपसर्गेचोपपदेभजेर्ण्विःस्यात् अर्धभा
क् प्रभाक् अदोनन्नेविट्स्यात् आमे अन्नीत्यामात् सस्यात् अनन्नेतिकिं अन्नादः
क्रव्येचअरेर्विट् पूर्वेणसिद्धेवचनं वासरूपेतिप्राप्ताण् वाधनार्थं क्रव्यात् आमसं
स्मभक्षकः इहन्-कषुष्यस्य कामंइच्छायामन्येभ्योऽपिदृश्यंते मनिप्क्वनिप्वनिप्विचप्ते
प्रत्ययाःधातोःस्युः नेड्वशिकृति वशादेःकृतइण्न सुशर्माप्रातरित्वा विड्वनोरन्
नासिकस्यात् विजायतइतिविजावा ओणृअपनयने अवावा रोहरेड्सुगण क्विप्

चेऽग्रयमपि दृश्यते उखास्रत् पर्णध्वत् वाहभ्रट् अनःपदान्तस्येति नेत्वं स्यादुपस
र्गस्थान्निमित्तान्नसस्येत्युक्तेः प्राण आशासः क्वावुपधाया इत्वं वाच्यम् आशीः इत्वोत्वे गीः
पूः मोनो धातोः प्रतान् प्रशान् गमः क्वौ अनुनासिकलोपः अगगत् गमादीनामिति
वक्तव्यम् परीतत् संयत् ऊः ऊङ्गमादीनामितिवक्तव्यं लोपश्च अग्रेगूः अग्रेगूः स्थः
कश्च चात् क्विप् शंस्थः शंस्थाः सुप्यजातौ णिनिस्ताच्छील्ये अजात्यर्थे धातोर्णिनिस्ता
च्छील्ये द्योत्ये उष्णभोजी शीतभोजी अजातौ किं ब्राह्मणानामंत्रयिता नाच्छील्ये किं उ
ष्णं भुंक्ते मनः सुपि मन्यतेर्णिनिः दर्शनीयमानी आत्ममाने खश्च स्वकर्मके मनने
वर्त्तमानान्मन्यतेः सुपि खश्चात् णिनिः पंडितमात्मानं मन्यते पंडितंमन्यः इत्यपका

चोम् प्रत्ययवच्च इजंतादेकाचोऽम् स्यात् स चाविभक्तिवदंतेपरे श्रीनोमशासेः गांमन्यः
वाम् शासेः स्त्रियंमन्यः ह्रींमन्यः न नरंमन्यः भुवंमन्यः श्रियमात्मानंमन्यते श्रिम
न्यंकुले लाघवकारप्रयोगाच्छ्रीशब्दस्य ह्रस्वः मममोरभावश्च भूते अधिकारोऽयंवर्त्त
मानेलडितियावत् करणेयजः करणेउपपदेभूतार्थाद्यजेर्णिनिःकर्त्तरि सोमेनेष्टवा
न्सोमयाजी कर्मणिहनः पितृव्यघाती पापकर्मस्वपपदेषूद्दिष्टेभूते क्विप्स्यात् ब्रह्म
भ्रूणवृत्रेषु क्विप् स्यात् ब्रह्महा भ्रूणहा वृत्रहा क्विप्चेत्येवसिद्धे ब्रह्मादिष्वेव क्वि
बेवेति द्विविधनियमार्थमिदं इतिभाष्यं एवमग्रेपि सुकर्मपापमंत्रपुण्येषुकृञः
सुकृत् कर्मकृत् पापकृत् मंत्रकृत् पुण्यकृत् सोमेसुञः सोमसुत् अग्नौचेः अग्निचि

त् कर्मण्यग्न्याख्यायां श्येनइवचितःश्येनचित् कर्मणीनिविक्रियः कर्मण्युपपदेविपूर्वात्
क्रीणातेरिनिःकुत्सितग्रहणंकर्त्तव्यं सोमविक्रयी घृतविक्रयी दृशेःक्वनिप् कर्मणिभू
तेत्येवपारंदृष्टवान् पारदृश्वा राजनियुधिकृञः क्वनिप् युधिरंतर्भावितण्यर्थः राजानंयो
धितवान्राजयुध्वा राजकृत्वा सहेच सहयुध्वा सहकृत्वा सप्तम्यांजनेर्डः तत्पुरुषेकृ
तिबहुलंङेरलुक् सरसिजं सरोजं उपसर्गेचसंज्ञायां प्रजा अनौकर्मणि अनुपूर्वाज्ज
नेःकर्मण्युपपदेडः पुमांसमनुरुध्यजाता पुमनुजा अन्येष्वपिदृश्यते अजः द्विजः
ब्राह्मणजः अपिशब्दः सर्वोपाधिव्यभिचारार्थः तेनधात्वंतरादपि कारकांतरेष्वपि
क्वचित् परितःखाता परिखा पंचम्यामजातौ जातिशब्दवर्जितेपंचम्यंतेजनेर्डःसंस्का

रुजः अदृष्टृजः क्तक्तवतू निष्ठा षैनो निष्ठामेत्सोस्तः निष्ठा भूतार्थवृत्तेर्धातोर्निष्ठा स्यात्
नञ्तयोरेवेति भावकर्मणोः क्तः कर्त्तरि कृदिति कर्त्तरि क्तवतुः उक्ता विनौ स्नातस्तया वि
स्तः विध्वंसितवान् निष्ठायामण्यदर्थाभावकर्मणीति ततोऽन्यत्र निष्ठायां क्षियो दीर्घस्या
त् क्षियो दीर्घात् दीर्घात् निष्ठातस्य नः क्षीणवान् भावकर्मणोस्तु क्षितः कामो मया
ऋणोर्णउवङ्गावेवाच्यः तेन पक्वाचत्वान्नेह ऋणीतः रदाभ्यां निष्ठातो नः पूर्वस्य च दः र
दाभ्यां परस्य निष्ठातस्य नो निष्ठापेक्षया पूर्वस्य धातोर्दस्य च शॄ शीर्णः भिन्नः छिन्नः
संयोगादेरातो धातोर्यण्वतः यण्वत्संयोगादेरादन्तान्निष्ठातस्य नः द्राणः म्लानः
ल्वादिभ्य एकविंशते लूञादिभ्यः प्राग्वत् लूनः ज्या ग्रहिज्या हलः अङ्गावयवाद्धलः

परेयत्संप्रसारणेतदंतस्यांगस्यदीर्घः जीनः दुग्वोर्दीर्घश्च दुगतौ दूनः गूनः पूञोःविनाशे
पूनायवाःअविनष्टाइत्यर्थः पूतमन्यत् सिनोतेर्ग्रासकर्मकर्तृकस्य सिनोग्रासः ग्रासेतिकिं
सितापाशेन सूकरी कर्मकर्तृकेतिकिं सिनोग्रासोदेवदत्तेन ओदितश्चप्राग्वत् भुजो
भुग्नः टुओश्वि श्वीदितोनिष्ठायां श्यायतेरीदितश्चनिष्ठायामित्यनेन शूनः श्वादयओदितउक्तं
सूङ् सूनः द्रवमूर्तिस्पर्शनयोः श्यः द्रवस्य मूर्तौकाठिन्ये स्पर्शेचार्थेश्येङःसंप्रसारणंनिष्ठा-
यां श्येपास्पर्शे श्येङोनिष्ठातस्यनोऽस्पर्शार्थे शीनंघृतं असंस्पर्शेकिं शीतंजलं द्रवमूर्तिस्पर्शयोरिति
किं संश्यानोवृश्चिकः शीतात्संकुचितइत्यर्थः प्रतेश्चसंप्रसारणं निष्ठायां प्रतिशीनः विभाषा
भ्यवपूर्वस्यतथाअभिश्यानंघृतं अभिशीनं अवश्यानो अवशीनोवृश्चिकः अवस्थितविभाषे ११८

यं तेनेह न समवस्थानः अंचोनपादाने निष्ठातस्य नः यस्य विभाषा यस्य क्वचिद्विभाषयेड्वि
हितस्तस्तो निष्ठायाइण्न उदितो वेति क्त्वायां वेट्त्वादिह नेट् समक्नः अनपादाने किं उदक्त
मुदकं कूपात् दिवोविजिगीषायां च्छ्वोःशूडनुनासिकेच द्यूनः विजिगीषायांतुद्यूतं निर्वाणो
वातोऽवातइति छेदः निःपूर्वाद्वातेर्निष्ठातस्य णत्वंस्याद्वातश्चेत्कर्त्ता न निर्वाणोऽग्निर्मुनिर्वा वा
तेतु निर्वातोवातः शुषःकः निष्ठातस्य शुष्कः पचोवः पक्वः क्षायोमः क्षामः स्त्यःप्रपूर्व
स्य प्रात्स्त्यःसंप्रसारणंनिष्ठायां प्रास्त्योऽन्यतरस्यां निष्ठायांतस्य मोवा प्रस्तीनः प्रात्किंस्त्या
नः अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः एतेनिपात्यंते क्तवत्वेकदेशस्यापीदंनिपातनमि
ष्यते फुल्लःक्षीबितः प्रकृशितः प्रोल्लाघितः उत्फुल्लसंफुल्लयोरुपसंख्यानं नुदविदों

दत्राघ्राह्रीभ्योन्यतरस्यां त्राणः त्रातः घ्राणः घ्रातः ह्रीणः ह्रीतः निष्ठातस्य नः नुन्नः नुत्तः
विन्नः वित्तः उंदी श्वीदितोर्निष्ठायां श्वयतेरीदित्वन्निष्ठयाइण्न उन्नः उत्तः इत्यादि
नध्याख्यापृमूर्छिमदां पञ्चभ्यो निष्ठातस्य नो न ध्यातः ख्यातः पूर्त्तः राल्लोपः क्नौ क्नौफला
दावक्रुनासिकादौ च प्रत्यये मूर्त्तः मत्तः वित्तो भोगप्रत्यययोः विदतेर्निष्ठायां तस्य निपा
तोयं भोग्ये प्रतीते चार्थे वित्तं धनं वित्तः पुरुषः अनयोः किं विन्नः भित्तं शकलं भिन्नम
न्यत् ऋणमाधमर्ण्ये ऋतमन्यत् स्फायः स्फी निष्ठायां स्फीतः इण्निष्ठायां निरःकुषो नि
ष्ठायां इट् यस्य विभाषेति षेधे प्राप्ते पुनर्विधिः निष्कुषितः वसतिक्षुधोरिट् आभ्यां क्त्वा
निष्ठयोर्नित्यमिट् उषितः क्षुधितः अंचेः पूजायाम् पूजार्थादंचेः क्त्वानिष्ठयोर्नित्यमिट् ११८

ग्रपितः गतोस्तु मुक्तः लुभो विमोहने क्त्वानिष्ठयोरिट् नतु गार्ध्ये लुभितः गार्ध्ये तु लुब्धः
क्लिशः क्त्वानिष्ठयोः इड्वा क्लिशितः क्लिष्टः पूङश्च क्त्वानिष्ठयोरिड्वा पूङः क्त्वा च निष्ठा च सेट् किन्न
स्यात् पवितः पूतः क्त्वाग्रहणमुत्तरार्थं नोपधादित्यत्र हि क्त्वैव संबध्यते निष्ठा शीङ्स्विदि॰
मिदिक्ष्विदिधृषः सेट् किन्न शयितः शयितवान् आदिकर्मणि निष्ठा वक्तव्या आदिकर्मणि
क्तः कर्तरि च चाद्भावकर्मणि विभाषा भावादिकर्मणोः भावे आदिकर्मणि च आदितो नि॰
ष्ठाया इड्वा प्रस्वेदितश्चैत्रः प्रस्वेदितं तेन ञिष्विदा इत्यादिरयं न गृह्यते शीङ्साहचर्यात्
स्विद्यतेस्तु स्विदित इत्येव ञिमिदा ञिक्ष्विदा दिवादी प्रमेदितः प्रमेदितवान् प्रक्ष्वेदितः प्र
क्ष्वेदितवान् प्रधर्षितः धर्षितं तेन सेट् किं प्रस्विन्नः स्विन्नं तेनेत्यादि मृषस्तितिक्षायां

म॰सि॰ सेट्‌निष्ठा किन्नमर्षितः क्षमायांकिं अपमर्षितेवाक्यं अविस्पष्टमित्यर्थः उदुपधाद्भावादिकर्म
कौ॰ णोरन्यतरस्यां उदुपधात्परोभावादिकर्मणोःसेण्निष्ठावाकिन्न द्योतितं द्युतितं मुदितं मो
११९ 119 दितं मोदितं साधुना प्रद्युतितः प्रद्योतितः प्रमुदितःसाधुः उदुपधात्किं विदितं भा
वेत्यादिकिं रुचितंकार्षापणंसेट्‌किं कुष्टं शाब्दिकरणोऽभ्य प्रवेक्ष्यते नेह गुप्यतेर्गोपि
ते निष्ठायांसेटिणेर्लोपः भावितः भावितवान्‌ दृढःस्थूलबलयोः स्थूलेबलव
तिचनिपात्यते दधातेर्हिःतादौकिति हितं दोदद्घोः घुसंज्ञस्य दान्तस्य तादौकि
ति चर्त्वं दत्तः गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च एभ्यःकर्त्तरि
क्तःस्याद्भावकर्मणोश्च गतोगतः गतोग्रामः ग्लानः सः लक्ष्मीमाश्लिष्टोहरिः शेषमधि ११९

शयितः यतिस्सतिमास्यामिति किमिति वैकुंठमधिष्ठितः शिवमुपासितः हरिदिनमुपोषितः
राममनुजातः गरुडमारूढः विश्वमनुजीर्णः पक्षे प्राप्राप्तागा तेनेत्यादि क्तोधिकरणेच
ध्रौव्यगतिप्रत्यवसानार्थेभ्यः पक्षोधिकरणेक्तः चाद्यथाप्राप्तं ध्रौव्ये स्थितं मुकुंदस्था
सितमिदमिदं यातंरमापतेः भुक्तमेतदनंतस्यमुद्युगोप्योदिहृद्भवः पक्षेआसेरकर्मकत्वा
त्कर्त्तरिभावेच आसितोमुकुंदः आसितंतेन गत्यर्थेभ्यः कर्मणिकर्तरिच रमापतिरिदंया
तः तेनेदंयातंभुजेःकर्मणि अनेनतेनेदंभुक्तं वर्त्तमानेइत्यधिकृत्य मीतःक्तः ञिष्विदा क्ष्वि
ष्वः ञिइंधी इद्धः मतिबुद्धिपूजार्थेभ्यश्च राज्ञोमतः इष्टः बुद्धः विदितः पूजितः अर्चितः च
कारोनुक्तसमुच्चयार्थः शीलितः रक्षितः क्षांतः आक्रुष्टो जुष्टः इत्यादि नपुंसकेभावेक्तः

म·सि·
कौ·
१२·
120

क्तौवत्वविशिष्टेभावेकालेसामान्येक्तः अस्तिते हसिते सुयजोर्ङ्वनिप् सुनोतेर्यजेश्च ड्वनिप्स्या
त् भूते सुत्वा यज्वा जीर्यतेरतृन् भूतइत्येव जरन् जरंतौ वासरूपन्यायेननिष्ठापिजीर्णो
जीर्णवान् छंदसिलिट् लिटःकानज्वा क्वसुश्च भूतसामान्येछंदसिलिट् तस्यकानच्क्व
सुर्वास्तः तङानावात्मनेपदं चक्राणः सोम्य जगन्वान् कवयस्तु चाङ्गलकाल्लोकेपि प्रयुं
जते तेनतस्थिवांसंनगारोपकंठेश्रेयांसिसर्वा एवपिजग्मुषस्तत्पादि वस्वेकाजाद्घसां
कृतद्वित्वानामेकाचामादंतानांघसेश्चवसोरिट्स्यान्नान्येषां आदिवान् आशिवान्
ददिवान् जक्षिवान् पपौकिंवभूवान् भाषायांसदवसश्रुवः सदादिभ्योभूतसामान्ये
भाषायांलिड्वास्यात्तस्यचनित्यंक्वसुः निषेदुषीमासनबन्धधीरः अध्यूषुषस्तामभवन् १२·

जनस्य भुक्तवान् उपेयिवाननाश्वानन्नूचानश्च एतेनिपात्यन्ते उपपूर्वादिणो लिटोक्वसुनो
न्नादेशश्च यत्र परत्वादुत्तुसहचरस्तत्र अलंकरिष्णुः ग्लाजिस्थश्च ग्स्नुः गिदयंतेन क्ङित् तेन
स्थर्द्धत्वेन ग्लास्नुः गित्वान्नगुणः जिष्णुः स्थास्नुः चाक्षुवः भूकः क्तिनीत्यत्रगाकारप्रश्ले
षान्नेह भस्नुः त्रसिगृधिधृषिक्षिपेः क्नुः त्रस्नुः गृध्नुः धृष्णुः क्षिप्नुः शमित्यष्टाभ्यो घिन्
ण् उकार उच्चारणार्थ इति काशिकानुवर्त्य इति भाष्ये तेन शमिनितरा शमिनीतरेत्य
त्र उगितश्चेति ह्रस्वविकल्पः नचैवं शमीशमिनावित्यादौ नुम् प्रसंगः कृद्ग्रहण
मात्रस्य फलेनानामेव तद्विधानात् नोदात्तोपपदे नोदात्तोपदेशस्येति वृद्धिनिषेधः
शमीतमीत्यादि संपृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिपपरिरट्

परिचट्परिट्दहपरिमुहदुषद्विषद्रुहदुहयुज्याक्रीडविविचत्यजरजभजातिचरापचरामुषाभ्या
हनश्च घिनुण्स्यात् संपर्की अनुरोधी आयामी आयासी परिसारी संसर्गी परिदेवी
संज्वारी परिक्षेपी परिराटी परिवादी परिदाही परिमोही दोषी द्वेषी द्रोही दोही योगी
आक्रीडी विवेकीत्यागी रागी अतिचारी अपचारी आमोषी अभ्याघाती वौकषलस
कत्थस्रम्भ विकाषी विलासी अपेचलषः वाह्वो अपलाषी चलनशब्दार्थादकर्मका
द्युच् चलनार्थाच्चयुच्स्यात् चलनार्थाच्छब्दार्थाच्चयुच्स्यात् चलनः चोपनः कंपनः शा
ब्दनः रवणः अकर्मकात्किंपठिताविद्या अनुदात्तेतश्चहलादे अकर्मकाद्युच् वर्त्तनः
वर्द्धनः वर्द्धनः अनुदात्तेतःकिंभविता हलादेःकिंएधिता अकर्मकात्किंवसितावस्त्रं निंद

हिंसक्लिशखादविनाशपरिक्षिपपरिरटपरिवादिव्याभाषासूयो वुञ् निंदकः हिंसकः दिवि
क्रुशोश्चोपसर्गे आदेवकः आक्रोशकः उपसर्गे किं देवयिता क्रोष्टा लषपतपदस्थाभूवृ
षहनकमगमशृभ्यः उकञ् लाषुकः पातुकः जल्पभिक्षकुट्टलुंटवृङः षाकन् जल्पाकः
सनाशंसभिक्ष उः चिकीर्षुः आशंसुः भिक्षुः स्थेशभासपिसकसो वरच् स्थावरः ईश्वरः
भास्वरः यश्च यङः यातेर्यङंताद्वरच् अतो लोपः तस्याचः परस्मिन्निति स्थानिवद्भावे प्राप्ते
न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु परस्य चरमावयवे द्वि
र्वचनादौ च कर्तव्ये परनिमित्तोजादेशो न स्थानिवत् इति यलोपप्रति स्थानिवत्त्वनिषेधा
त् लोपो व्योर्वलि इति यलोपः अल्लोपस्य स्थानिवत्त्वमाश्रित्याल्लोपपवरे लुप्तेन स्थानिवत् या

म॰ सि॰
कौ॰
१२२
122

यावरः भ्राजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः क्विप् विभ्राट् भाः धूः विद्युत् ऊर्क् पूः दृशिग्रहणा
त्पापकर्षणाज्जुवनेनदीर्घः जूः ग्रावस्तुत् क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणांदीर्घोऽसंप्रसारणं
च वक्तीतिवाक् पृच्छतीतिप्राट् आयतंस्तौतीत्यायतस्तूः कटंप्रवतेकटप्रूः जूरुक्तः श्रयति
हरिंश्रीः कृतिगमिजुहोतीनांद्वेच दिद्युत् जगत् जुहोतेर्दीर्घश्च जुहूः ध्यायतेःसंप्रसारणं
च धीः भुवःसंज्ञांतरयोः मित्रभूर्नामकश्चित् प्रतिप्रसंभ्योडुःसंज्ञायां पभीभुवोडुः विभु
र्व्यापकः प्रभुःस्वामी संभुर्जनिता संज्ञायांतु विभूर्नामकश्चित् मितद्र्वादिभ्य उपसंख्यानं
शंभुः धःकर्मणिष्ट्रन् कर्मण्यर्थे धात्री जनन्यामलकीवसुपत्स्वयमात्रेषु दाम्नीशसयुयुज
स्तुतुदसिसिचमिहपतदशनहःकरणे दावादेःष्ट्रन्करणेऽर्थे दान्त्यनेनदात्रंनेत्रं तितुत्रतथ १२२

सि हमरकेषु पृषोदरादीनामिति पत्र शस्त्रं योक्त्रं योत्रं स्तोत्रं तोत्रं सेत्रं सेक्त्रं मेढ्रं पत्रं दंष्ट्रा
नद्धी हलसूकरयोः पुवः पूङः पूञोः करणे ष्ट्रन् नच्चेकरणे हलसूकरयोरभिधेययोः हलस्य
सूकरस्य वा पोत्रं मुखमित्यर्थः अर्त्तिलूधूसूखनसहचर इत्रः अरित्रं लवित्रं धवित्रं स
वित्रं खनित्रं सहित्रं चरित्रं पुवः संज्ञायां पवित्रं कृवापाजिमिस्वदिसाध्यशूभ्य उण् करो
तीति कारुः वायुः पायुर्गुदं जायुरौषधं मायुः पित्तं स्वादुः साध्नोति परकार्यमिति साधुः आ
शुः शीघ्रं हरिमितयोर्द्रुवः द्रुगतौ अस्मात् हरिमितयोरुपपदयोः कुः सचडित् हरिभि
र्द्रूयते हरिद्रुर्वृक्षः मितं द्रवति मितद्रुः समुद्रः शतधा द्रवतीति शतद्रुः नदीभेदः श्रेङूदंभजे
वृक फेल्ल कर्कंधू शिपिविष्टते अत्र प्रत्ययो निपात्यते शमेर्ढः वाहुलकादित्त्वेनाढस्य णत्वादेशा

म॰ सि॰
को॰
१२३
123

डुड्डुन भवति शंठः स्यात्सिगोपमौकमेरठः कमठः कच्छपेपुंसिभांडभेदेनपुंसकमितिमेदनी
रमेर्वृद्धिश्च रामठं हिंगुः श्रामेःखः शेखः कणोषः कंठः ञमेतान्डः ञमितिप्रत्याहारः दं
डोस्त्रीलगुडेपिस्यादित्यमरः रंडामूषिकपर्ण्यांचविधवायांच योषितिइतिमेदनी खेडो
स्त्रीशाकलेनेत्रविकारमणिभेदयोरितिमेदनी मनज्ञाने मेडः पेचागुलेशाकभेदे स्त्री
वेतवस्मृतीनितिमेदनी पतिचेडाभ्यामालज्ञ पातालेनागलोकेस्याद्धिवेरेवडवानले
इतिमेदनी चेडालोमान्नेगः प्रज्ञादित्वादण् चांडालोपीस्युज्वलदत्त स्तत्र कुलालवरु
डकर्मारनिषादचेडालमित्रामित्रेभ्यश्छंदसीति चांडालोपीस्युज्वलदत्त स्तत्र कुलाल
वरुडकर्मारनिषादचेंडालमित्रामित्रेभ्यश्छंदसीतिचंडालशब्दात्स्वार्थे अण्णाविदयना १२३

वार्त्तिकेनतन्नाशेणाचसह विरोधात गनगामेध्योऽंगा अग्नः पुरोडाशः भजः कितनुट
च भजोगनकित्साक्नस्यनङ्ग अंगाःखङ्गा लिषृस्मातः स्मृणातेर्ईलश्च स्रुगो मर्त्निलश्च
ऊरस्थदिन्तभायावापदियदिनीमोमन् पप्पस्वनर्टशभ्योमन अर्मस्वद्रवोगाः स्तोमः
सोमः हेमः सर्मोगमन्ते धर्मःदेमे ऊष्माले दोमे भाम आदित्यःयामः वामःशोभन
डुष्टयोःपद्मे पद्मोरोगराजः नेमः अवते ष्टिलोपश्च मनप्रत्ययस्यायंहिलोपो नप्रकृ
तेः अन्यप्यादिदिलेषद्मयात ज्वरत्वरस्रिविविस्रिमवामुपधायाश्च पधाम्नुयथाबका
कारयोरूहङ्कौफलादावन्तनासिकादौचप्रत्यये अत्रक्कितीतिनानुवर्त्तते अवतेष्ट
निकृते ओतदितिदर्शनात स्वराद्विपाठादव्ययत्वे अवतीतिओम प्रसेराच ग्रासः अवि

म॰ सि॰
कौ॰
१२४
124

क्षिविसिभ्युषिभ्यः कित् कुमे नगरे स्तुमेरश्मिः सिमः सर्वः प्रथममग्निसमीपयोः घर्मः
घृणातेर्निपातनोयं ग्रीष्मः ग्रसतेर्निपातनोयं अस्मृभुषिलदिकणिखदिविशिभ्यः क्सन्
अस्मः भुक्षः स्याद्धन्तसूर्ययोः लक्ष्मापल्लिभेदः फलेच कण्वेपापे खड्गविक्षे कनिमुहु
षितन्विराजिधन्विद्युप्रतिदिवः यौतीतियुवा वृषाऽध्वः तक्ष्णा राजा धन्वामरुः धन्वे
प्रणाशनेच मघवाम्यर्यः प्रतिदीव्यन्प्रत्यतिदिवादिवसः उषिकुषिगार्तिभ्यस्थ
न् ओष्ठः कोष्ठः गाथा अर्थः पातृतुदिवचरिचिसिचिभ्यस्थक् पीथोरविः चूतं
पीथं तीर्थं शास्त्राध्वरे तेत्रापाथोपाथ्यायमे त्रिष्ठ अवतारर्षिजन्तुष्ठाभः त्रीरन्तः सच
विष्णुत्मितिविष्वः तथोग्निः उक्थं सामवेदः रिकथं वाङ्गलकादश्चोरपि रिक्थ

घस्रःकृशं धनं च वस्तु ग्लानुदिभ्यांडौः ग्लौः नौः द्विवचनं डौरित्येव ग्लौकरोति छन्नेजेनद्गति

सिद्धे नियमार्थमिदं उणादिप्रत्ययोन्तञ्चेन पवेति गमेर्डोः गौः नादिवेबलीवर्दकिरण

ऋतुभेदयोः स्त्रीत्वस्याहिशिभारसोभसौचसूर्वभावपि न्यस्त्रियोःस्वर्गवज्रोवरश्मिदृग्बा

णलोमसुवाग्जलकात्मुतेरपि द्योः द्यौःस्त्रीस्वर्गान्तरिक्षयोः रातेर्डैः राः भ्रमेश्च डूः भ्रूः दंदेर्न

लोपश्च चाद्रुच्चश्रोदनः गमेर्गश्च वाचन्तु गमने कृपृवृजिमंदिनिधाञः क्युः किरणः

पुरणः समद्रः वृजेनमन्तरिक्षे मेदने स्नोत्रे निधने जलनाशयोः धृषेधिषचसंज्ञायां धि

षणोगुरुः धिषणाधीः नप्तनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमातृ पितृ दुहितृ प

नेतृत्वतृजेनानिपात्यन्ते नप्ता इत्यादि सावसे र्ऋन स्वसा यतेर्वृद्धिश्च याता भार्यास्त्वथा

म.सि.
कौ.
१२५
125

न्स्वर्गस्ययान्तरःस्युःपरस्परे नञिचनंदेः ननंदतीतिननंदा इदवृद्धिर्नानुवर्त्तते इत्येके ननां
न्दा ननस्वसा पत्युर्ननंदा ननांदिनी च सा इति शब्दार्णवः दिवेर्ऋः देवा देवरौ देवरः नयतेर्डि
द्व नानरौ नानरः अर्चिशुचिहुसृपिछादिछर्दिभ्य इसि अर्चिः ज्वाला शोचिर्दीप्तिः
हविः सर्पिः इस्मन्त्रन्क्विषु च छादेर्ह्रस्वः स्यात् छदिः पटलं छर्दिः वमनव्याधिः बृंहे
र्नलोपश्च बर्हिः नांशुशास्त्रयाणाः द्युतेरिसिन्नादेश्च जः ज्योतिः जनेरुसिः जनुर्जन
नं अर्त्तिपॄवपियजितनिधनितपिभ्यो नित् अरुः परुः ग्रंथिः वपुः यजुः तनुः तनुषी
तनेऽपि धनुरस्त्रियां तपुः सूर्याग्निशत्रुषु एतेर्णिच्च आयुः आयुषी चक्षेः शिच्च चक्षुः
बहुलमन्यत्रापि आचक्षुः मुहेः किच्च मुहुः रक्षये पानीविषिभ्यः पः पायुस्सादात्मा

नमितिपात्यं नयोगागमयः पुरुषः नेपः पुरोहितः वेष्पः पानीयं स्तवो दीर्घश्च स्तूपः समुच्छ्रा
यः स्तम्भ्योनिच्च चान्तिच्च स्तूपः वाङ्गलकाटुक्रेसूर्पः कृपुभ्यां च ऊर्वेर्निमेङ्कास्मिन्निति
ज्रूपः पुर्वेन्तिवधेनिअस्मिन्नग्रसमितियूपो यत्तलेभः खष्पशिल्पशष्पबाष्परूपपर्पत
ल्पाः सप्तैतेपप्रत्ययान्तानिपात्यन्ते स्तनिहृषिपुषिगदिमदिभ्योणेरित्नुच अयामन्तेति
णयादेशः स्तनयित्नुः पोषयित्नुः गदयित्नुः तर्षयित्नुः मदिरा अशेःसरः अक्षरं
वसेश्च वत्सरः संपूर्वाच्चित् संवत्सरः परिवत्सरः कृभृशलिकलिगर्दिभ्योभच् कर
भः शरभः शलभः कलभः गर्दभः ऋषिवृषिभ्यांकित् ऋषभः वृषभ रासिवल्लि
भ्यां च रासभः वल्लभः नियोमिः नेमि अर्त्तेरूच्च ऊर्मिः भुवः कित् भूमिः अशेर्नि

म· सि· कौ· १२९ 126

नलोपश्च अग्निः वहि श्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित् वह्निः श्रेणिः श्रोणिः योनिः द्रो
णिः ग्लानिः हानिः तूर्णिः पातेर्डतिः पतिः सूङः क्रिः सूरिः पंडितः अदिशदिभूशु
भिभ्यः क्रिन् अद्रिः शद्रिः शर्करा भूरि प्रचुरं शुभ्रिर्ब्रह्म वलिमलितनिभ्यः कयन् व
लयः मलयः तनयः माछाशसिभ्यो यः माया छाया सस्यं वञ्जलकास्त्वेदक्षिणावामयोः
जनेर्यक् ये विभाषा जन्यं ग्रह्यं जाया सर्वधातुभ्य इन् पचिरग्निः तुडिः तुडिः वलिः क
टिः यष्टिः काशातरुगतिकाशिः पतिः मल्लिः केलिः मसीपरिणामे मसि वीथिः नेदिः
कलिः हरिर्विष्णावहाविन्द्रे भेके सिंहे हये रवौ चंद्रे कीले तु वेगे च यमे वाते च कीर्त्तितः
इगुपधात्कित् कृषिः ऋषिः शुचिः लिपिः मनेरुच्च अतः मुनिः जनिघसिभ्यामिण् १२९

जनिर्जननं चाम्निर्भेदमग्निश्च अच्चः रविः पविः कविः तरिः अरिः अलिः कुंडिके
ध्यानेलोपश्च कुंडिः कपिः ईषेःक्तः ईषत्तः कृषेर्वर्णोनवस्मात् कृत्स्नः दाभाभ्यांनुः
दानुर्दीना भानुः विषेःकिच्च विष्णुः सितनिजनिगामिमसिसच्यवधाजक्रुशाभ्यस्तु
न् सेतुः नेतुः जंतुः गंतुः मस्तुर्दधिमंडे सक्तुः गेतुः धातुः क्रोष्टा अविन्हृल्हन
त्रिभ्यईः अवीर्नारी रजस्वलातरीः स्तरीः तंत्रीः पापोःकित्वेद्वेच यवीपयीस्याम्भो
मस्तूर्यचोः वातप्रमीः निपातेनायं लक्षेमुट्च लक्ष्मीः सर्वधातुभ्योमनिन् कर्म
चर्म भस्म जन्म शर्म वृंहेर्नोच्च नोनकारस्यअकारः ब्रह्मततेनतपोवेदः ब्रह्माचि
प्रःप्रजापतिः नामन्सीमन्व्योमन्रोमन्लोमन्पाप्मन्ध्यामन्सञ्चामीनिपात्ये

म॰ सि॰ कौ॰ १२७ 127 ने सानिभ्यांमनिन् मनिशो साम सामनी आत्म हनिमसिभ्यांभिकन् हेमिकाहेम
योषिति मक्षिका गिरउडच् गरुडः अटदभसेदिः शारन्दरहृदयज्ञलयोः भसद्ज
चने त्यजितनियजिभ्योडित् त्यद् तद् यद् एतेस्त एतद् युष्मसिभ्यांमतिक् त्व अ
हं इंदेःकमिन्नलोपश्च इदं कायतेर्डिमिः किम् सर्वधातुभ्यः ष्ट्रन् वस्त्रं अस्त्रं शास्त्रं
अमिचिमिदिशसिभ्यःक्त्रः अन्त्रं चित्रं मित्रं शस्त्रं पुवोर्ह्रस्वश्च पुत्रः स्त्यायतेर्ड्रट्
स्त्री सूचेःस्मन् सूक्ष्मं पातेर्डुमसुन् पुमान् वसेस्तिः वस्तिर्नाभेरधोहृद्योः शावसेः
स्वस्तिः वौतसेः वितस्तिः सर्वधातुभ्योऽसुन् चेतः सरः पयः अशोर्देवनेयुट् दे
वनेस्तैतोयशः उञ्छेर्वलेवलोपश्च ओजः श्रयतेः स्वांगेशिरःकिच्च श्रयतः शिर् १२७

ग्रादेशोसन्नकिच्च शिरः अग्नेर्नरुच्च उरः अरंजिभ्यांकित् भुवः रजः वसेर्णित् वासोवस्त्रे
चंदेरादेश्चकः छंदः पतिवचिभ्यांसुट्च पत्त्रसीत्रस्नैतोपचैवचेतहृदयं नञ्जिहन
पहश्च अनेहा विधाञोवेधच वेधाचंद्रे माङोडित् चंद्रमाः उषःकित् उषः क्लिशः प्र
णः सर्वैरपसुर्वोदसिः प्रायेणायं अप्सिन्नप्सरसः वक्षेःकनसिः उशना अदिभुवोडु
तच अद्भुतं गुधेरूमः गोधूमः त्वहेःक्रोदलोपश्च तूणं उदिचेर्डैसिः उच्चैः नौदी
र्घश्च नीचैः सञ्जोग्रण्यक् शूस्वश्च यत्नत्ययः श्रुण्पं शुद्धिहृणानरेजलो सर्वपदान
लोपश्च उदरे डिलत्वेमंदः चोदात्तः अजलचदिनुयातोर्मुट्‌सचोदात्तः मृत्वं अ
मेस्सन् अंसः महेःखो महं मखः नहेर्हलोपश्च नखः शीङोह्रस्वश्च शिखा माङ्

कुवोमयच मयूखः जनेष्टन्लोपश्च जटा क्लिशेरलकारस्यलोपः केशः फलेरितच्चा
देश्चपः पलितं कृञादिभ्यःसंज्ञायांवुन् करकः कटकः नरकं नारकोपिचेतिद्विरूपको
शः चीकयतेराद्यंतविपर्ययश्च कीचकः जनेररष्टच जठरं हर्यतेकन्यन्हिरच् हिरण्यं
कृञःपासः कर्पासः विल्वादित्वात्कार्पासं उर्णोतेर्डः कुणोदधाते यंतन्तुच धाम्नं
चतेरुरन् चत्वारः प्राततेररन् प्रातः अमेस्तुट् अंतः दहेर्गोलोदश्चनः गप्रत्ययेथाति
रंत्यसलोपोदश्चनः नगः हन्तेरच् घुरच् घोरं तरतेड्रिः त्रयः ग्रहेर्निः ग्रहणिः प्रथेरम
च् प्रथमः चरेश्चचरमः मंगेरलच् मंगलं उणादयोबहुलं प्रतेवर्त्तमानेसंज्ञायांबहु
लंस्युः केचिदविहिताश्चप्युक्ताःसंज्ञासुधातुरूपाणिप्रत्ययाश्चततःपरे कार्याद्विद्याद

न्वंथमेतच्छास्त्रमृणाविद्यु तुमुन्ण्वुलौ क्रियायां क्रियार्थायां क्रियार्थायां क्रियायामुपपदे
धातोरेतौस्तः भोक्तुं व्रजति भोजको याति कृष्णं द्रष्टुं याति कृष्णं दर्शको याति कालसमयवेलासु तुमुन्
कालसमयवेलासु वा भोक्तुं भावे सिद्धावस्थापन्ने धात्वर्थे वाच्ये धातोः घञ् पाकः अक
र्तरि च कारके संज्ञायां कर्तृभिन्ने कारके घञ् रजिचभावकरणयोः रंजेर्नलोपः रागः
अनयोः किं रज्यत्यस्मिन्निति रंगः निवासचितिशरीरोपसमाधानेष्वादेश्च कः घञ् चिनोते
र्घञादेश्च कः उपसमाधानं राशीकरणं निकायः आकायः कायः गोमयनिकायः एर
च् इवर्णान्तादच् चयः ॠदोरप् ॠवर्णान्तादुवर्णान्तादप् करः गरः शरः पवः लवः स्तवः
यवः घञर्थे कविधाने प्रस्थः विघ्नः द्विनः क्रिः अयंभावादौ ड्वितः क्त्रिः मम् नित्यं क्त्रिप्रत्ययान्ता

त्रेमम्निर्वृत्तेर्थे पाकेननिर्वृत्तंपक्त्रिमं डुवप् उप्त्रिमं ट्वितोथुच् अयमपिभावे टुवेपृवेपथुः ट्व
यथुः यजयाचयतविच्छप्रच्छरक्षोनङ् यज्ञः याञ्चा यत्नः विश्नः प्रश्नः रक्ष्णः स्वपोनन्
स्वप्नः उपसर्गेघोःकिः प्रधिः उपाधि अन्तर्द्धिः कर्मण्यधिकरणेच कर्मण्युपपदेघोःकिःस्या
दधिकरणेच कर्मण्युपपदेघोःकिःस्यादधिकरणेर्थे जलानिधीयंतेस्मिन्निति जलधिः
स्त्रियांक्तिन् स्त्रीलिंगेभावादौक्तिन् घञोपवादः कृतिः स्तुतिः ऋल्वादिभ्यःक्तिन्निष्ठाव
द्वक्तव्यः तेननत्वेकीर्णिः गीर्णिः लूनिः धूनिः पूनिः संपदादिभ्यःक्विप् संपत् विपत्
आपत् क्तिन्नपिच कृञःशः चात्क्तिन् प्रकरणेप्रक्रियाकृतिः इच्छा इषेःनिपातोयं अ
प्रत्ययात् प्रत्ययांतेभ्योधातुभ्यःस्त्रियामकारप्रत्ययः चिकीर्षापुत्रकाम्या गुरोश्चहलः गु

हमतोहलंतात स्त्रियामप्रत्ययः ईहा ऊहा षिद्भिदादिभ्योऽङ् ज षज्रहशोङ्गिणः जरा
त्रपूष् त्रपाभिदा विदारणपर्याये भित्तिरन्या छिदा मृजा कृपेः संप्रसारणं च कृपा आ
तश्चोपसर्गे अङ् स्यात् प्रदा उपदा ण्यासश्रन्थो युच् अस्यापवादः कारणा हारणा आ
सना श्रन्थना रोगाख्यायां ण्वुल् बहुलम् प्रच्छर्दिका प्रवाहिका विचर्चिका क्वचिन्न शि
रोर्तिः धात्वर्थनिर्देशे ण्वुल् वक्तव्यम् आसिका इक्श्तिपौ धातुनिर्देशे पचिः पचतिः वर्णा
त्कारः निर्देशे इत्येव अकारः ककारः रादिफः रेफः नपुंसके भावे क्तः ल्युट् च हसितं ह
सनं करणाधिकरणयोश्च ल्युट् अन्नमानी पुंसि संज्ञायां घः प्रायेण छादेर्घे अद्व्युपस
र्गस्य द्विप्रभृत्युपसर्गहीनस्य छादेर्ह्रस्वो घे दन्तच्छदः आकुर्वन्त्यस्मिन्निति आकरः अवेस्तॄ

योर्थेज अवतारः अवस्तारोजवनिका हलश्च हलन्ताद्घञ्घापवादः रमंतेयोगिनो
स्मिन्निति रामः अपमृज्यतेनेनव्याध्यादिकमपामार्गः विमार्गः ईषद्दुःसुषुकृच्छ्राकृ
च्छ्रार्थेषुखल् एषुडुःखलस्यार्थेषूपपदेषुखल् तयोरेवेति भावेकर्मणिचकृञेडुः
करःसुकरोभवता अव्ययेकृञ्ईषत्करः सुकरः आतोयुच् खलोपवादः ईषत्पानः सुपानः
सोमोभवता दुष्पानः आवश्यकाधमर्ण्ययोर्णिनिः अवश्यंकारी शतंदायी कृ
त्याश्च यथायातो अवश्यंसेव्योहरिः शतंदेयं क्विच्क्रौञ्चसंज्ञायां धातोःक्विच्क
अस्यायशिशिषिसंज्ञायां वानिर्वायुः शिवोदेयाद्देनैषिषवदत्तः अलंखल्वोःप्रतिषेध
योः प्राचांक्त्वा प्राचामिति पूजार्थं प्रतिषेधयोरलंखल्वोरुपपदयोः क्त्वादेदश्योः अलं १३

दत्त्वा सुमास्येतीत्वं पीत्वा खल्वलं खल्वोः किं माकार्षीः प्रतिषेधयोः किं अलंकारः समा
नकर्तृकयोः पूर्वकाले समानकर्तृकयो र्धात्वर्थयोः पूर्वकाले विद्यमानाद्धातोः क्त्वा स्यात्
क्त्वा अव्ययकृतो भावे भुक्त्वा व्रजति द्वित्वमतंत्रं स्नात्वा भुक्त्वा पीत्वा व्रजति नक्त्वा सेट् सेट्
क्त्वा किन्न शयित्वा सेट् किं कृत्वा रलो व्युपधाद्धलादेः संश्च इवर्णोवर्णोपधाद्धलादेरलंता
त्परौ क्त्वासनौ सेटौ वा कितौ स्तः द्युतित्वा द्योतित्वा लिखित्वा लेखित्वा व्युपधात्किं वर्तित्वा
रलः किं सेवित्वा हलादेः किं एषित्वा सेट् किं भुक्त्वा उदितो वा उदितः परस्य क्त्वा इड्वा शमि
त्वा देवित्वा द्यूत्वा दधातेर्हिः हित्वा जहातेश्च क्त्वि हित्वा हाङस्तु हात्वा समासेनञ्पूर्वे क्त्वो
ल्यप् अव्ययपूर्वपदेऽनञ्समासे क्त्वो ल्यबादेशः नञ् प्रकृत्य अनञ् किं अकृत्वा अव्ययपू

म॰सि॰
कौ॰
१३१
131

वेंपदात्किं परमङ्कृत्वा वाल्लपि अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपः सच
अवस्थितः तेनमांतानितांवा मांतानितांवनादीनांनितं आगमय आगत्य प्रहत्य तत्यपि
मुमास्थितीत्वं प्रदाय प्रमाय उपायेत्यादि आभीक्ष्ण्येणमुल्च यानःपुनर्योगोतेक्त्वाविषये
णमुलक्त्वाच नित्यवीप्सयोः आभीक्ष्ण्येवीप्सायांचयोतेसपदस्यद्वित्वंस्यात् आभीक्ष्ण्यंपतिङन्ते
ष्वव्ययसंज्ञककृदन्तेषुच पचतिपचति स्मारंस्मारंनमतिशंभुं स्मृत्वास्मृत्वावाणाथंर भो
ज्ञे २ अन्यथैवंकथमित्थंसुसिद्धाप्रयोगश्चेत् एवकृञोणमुलस्यात् सिद्धाप्रयोगोऽस्यएव
वेभ्यःतमेवेतदुहात्स् मर्थत्वात्प्रयोगानर्हइत्यर्थः अन्यथाकारं एवंकारं इत्थंकारंभुंक्ते इत्थं
भुङ्क्तइत्यर्थः सिद्धेतिकिंशिरोन्यथाकृत्वा भुङ्क्ते यावतिविंदजीवोः यावद्वेदंभुंक्ते या १३१

वल्लभते तावद्दिमित्यर्थः यावज्जीवमधीते निमूलसमूलयोः कषः कर्मण्युपपदे कषादिषु यथा
विध्यनुप्रयोगः यस्मात्प्रत्ययः स एवानुप्रयोक्तव्यः निमूलकाषं कषति समूलकाषं
कषति निमूले समूले कषतीत्यर्थः शुष्कचूर्णरूक्षेषु पिषः एषु कर्मसूपपदेषु णमुल् स्या
च्छुष्कपेषं शुष्कं पिनष्टीत्यर्थः चूर्णपेषं रूक्षपेषं समूलाकृतजीवेषु हन्कृञ्ग्रहः कर्मणी
त्येव समूलघातं हन्ति अकृतकारं करोति जीवग्राहं गृह्णाति जीवन्तं गृह्णातीत्यर्थः कर
णे हनः पादघातं पादेन हन्तीत्यर्थः स्नेहने पिषः स्निह्यते येन तस्मिन्करणे पिषेर्णमुल्
उदपेषं पिनष्टि उदकेन पिनष्टीत्यर्थः हस्ते वर्तिग्रहोः हस्तार्थे करणे हस्तवर्तं वर्तयति
करवर्तं हस्तेन गुडिकां करोतीत्यर्थः हस्तग्राहं गृह्णाति करग्राहं स्वे पुषः करणे इ

म॰सि॰
कौ॰
१३२
132

त्येव स्वरूपग्रहणं तेन स्वरूपे पर्याये विशेषे च ग्रहणम्॥ स्वपोषं पुष्णाति धनपोषं गोपो-
षं समासत्तौ तृतीयासप्तम्यौ प्रायेणोक्तम्॥ संनिकर्षे केशाग्राद्द्व्यंगुल्यं ते हलाग्राद्द्व्यंगुल्यं ह-
लेन गृहीता संयोगेन स्वत्यये कृतोः क्ताणम्॥ म्लवन्नः कृत्स्न म्लवतः कृत्वा मुल्वतः कारं
म्लवतोभय म्लवतोभावम् इतिकृत्यक्रिया॥ प्रातिपदिकार्थलिंगपरिमाणवचनमात्रे
प्रथमा नियतोपस्थितिकः प्रातिपदिकार्थः मात्रशब्दस्य प्रत्येकं प्रयोगः प्रातिपदिका-
र्थमात्रे लिंगमात्राद्याधिक्ये परिमाणमात्रे संख्यामात्रे च प्रथमा स्यात् प्रातिपदिकार्थमा-
त्रे उच्चैः नीचैः कृष्णः श्रीः ज्ञानं लिंगमात्रे तटः तटी तटं परिमाणमात्रे द्रोणो व्रीहिः द्रो-
णरूपं यत् परिमाणं तेन परिच्छिन्नो व्रीहिरित्यर्थः वचनं संख्या एकः द्वौ बहवः संबो- १३२

थनेच प्रथमा हेराम कर्त्तुरीप्सिततमंकर्म कर्त्तुःक्रिययाप्तुमिष्टतमंकारकंकर्मसंज्ञंस्या
त् कर्मणिद्वितीया अनुक्ते हरिंभजति अभिहितेतुकर्मणिप्रातिपदिकार्थमात्रइति
प्रथमैव अभिधानंचप्रायेण तिङ्कृत्तद्धितसमासैः तिङ्हरिःसेव्यते कृत्लक्ष्म्यासे-
वितःहरिः तद्धितःशतेनक्रीतः शत्यः शतिकः समासः प्राप्तआनंदोयंप्राप्तानंदः क्व
चिन्निपातेनाभिधाने क्रमादमुंनारदइत्यबोधिसः अकथितंच अपादानादिविशेषै
रविवक्षितंकारकंकर्मसंज्ञंस्यात् दुह्याच्पच्दंड्रुधिप्रछिचिञ्ब्रूशासुजिमथ्मुषां प
यायुक्कर्मयुक्स्यादकथितंतथास्यान्नीहृकृष्वहां गांदोग्धिपयः बलिंयाचतेवसुधां त
डुलानोदनंपचति गर्गान्शतंदंडयति व्रजमवरुणद्धिगां माणवकंपंथानंपृछति

वृक्षमवचिनोति फलानि माणवकं धर्मं ब्रूते शास्ति वा शतं जयति देवदत्तं सुधां क्षीरनिधिं
मथ्नाति देवदत्तं शतं मुष्णाति ग्राममजां नयति हरति कर्षति वहति वा अर्थनिबंधनेयं
संज्ञा बलिं भिक्षते वसुधां माणवकं धर्मं भाषते अभिधत्ते वक्तीत्यादि अकर्मकधातु
भिर्योगे देशः कालो भावो गंतव्योऽध्वा च कर्मसंज्ञक इति वाच्यम् कुरून्स्वापयति मासमा
स्ते गोदोहमास्ते क्रोशमास्ते गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि क
र्त्ता स णौ गत्यर्थानां शब्दकर्मकाणामकर्मकाणां चाणौ यः कर्त्ता स णौ कर्म स्यात् श
त्रूनगमयत् स्वर्गं वेदार्थं स्वानवेदयत् आशयच्चामृतं देवान् वेदमध्यापयद्विधिं आ
सयत्सलिले पृथ्वीं यः स मे श्रीहरिर्गतिः नीवह्योर्न नाययति वाहयति वा भारं भृत्येन

न नियन्तृकर्तृकस्य वहेर् निषेधः वाहयति रथं वाहान् सूतः आदिखाद्योर्न आदयति

खादयति वा अन्नं बटुना भक्षेरहिंसार्थस्य न भक्षेरहिंसार्थस्य न भक्षयत्यन्नं बटुना

अहिंसार्थस्य किं भक्षयति बलीवर्दान् सस्यं जल्पतीति प्रभृतीनामुपसंख्यानं जल्पति भाष य

ति पुत्रं देवदत्तः दृशेश्च दर्शयति हरिं भक्तान् शब्दायतेर्न शब्दाययति देवदत्तेन हृ

क्रोरन्यतरस्यां हृक्रोर्णौ कर्ता सर्वो वा कर्म स्यात् हारयति कारयति भृत्येन भृत्यं वा

कटं अभिवादिदृशोरात्मनेपदे वेति वाच्यम् अभिवादयते दर्शयते देवं भक्तो वा भक्तं

वा अधिशीङ्स्थासां कर्म अधिपूर्वाणामेषामाधारः कर्म स्यात् अधिशेते अधिति

ष्ठते अध्यास्ते वा वैकुण्ठं हरिः अभिनिविशश्च अभिनीत्येतत्संघातपूर्वस्य विशतेरा

म॰ सि॰
कौ॰
१३४
134

थारः कर्मसंज्ञा स्यात् अभिनिविशते सन्मार्गं कश्चिन्न पापेऽभिनिवेशः उपान्वध्याङ्वसः
उपादिपूर्वस्य वसतेराधारः कर्मसंज्ञा स्यात् उपवसति अनुवसति अधिवसति आवसति
वा वैकुण्ठे हरिः अभुक्त्यर्थस्य तु न वने उपवसति उभसर्वतसोः कार्याधिगुपर्यादिषु
त्रिषु द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते उभयतः कृष्णं गोपाः सर्वतः कृष्णं धि
क् कृष्णाऽभक्तं उपर्युपरि लोकं हरिः अध्यधि लोकं अधोऽधो लोकं अभितः परितः
समयानिकषाहाप्रतियोगेऽपि अभितः कृष्णं ग्रामं समया निकषा हा कृष्णाभक्तं
तस्य शोच्यन्तरत्वमर्थः ऋते कृष्णं वुभुक्षितं न प्रतिभाति किंचित् अन्तरान्तरेण युक्ते आभ्यां
योगे द्वितीया स्यात् अन्तरा त्वां मां हरिः अन्तरेण हरिं न सुखं कर्मप्रवचनीया इत्यधिकृ १३४

त अनुर्लक्षणे लक्षणे द्योत्येनुः कर्मप्रवचनीयसंज्ञः गत्युपसर्गसंज्ञापवादः कर्मप्रवचनीययु
क्ते द्वितीया एतेन योगे द्वितीया स्यात् जपमनु प्रावर्षत् हेतुभूतजपोपलक्षितं वर्षण
मित्यर्थः तृतीयार्थे अनुरुक्तसंज्ञः नदीमन्ववसिता सेना नद्या सह संबद्धेत्यर्थः हीने
अनुरुक्तसंज्ञा अनु हरिं सुराः षित्ववयने लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिप
र्यनवः एष्वर्थेषु विषयभूतेषु प्रत्यादयः उक्तसंज्ञाः स्युः लक्षणे वृक्षं प्रति पर्यनु वा वि
द्योतते विद्युत् इत्थंभूताख्याने भक्तो विष्णुं प्रति पर्यनु वा भागे लक्ष्मीर्हरिं प्रति पर्यनु
वा हरेर्भाग इत्यर्थः वीप्सायां वृक्षं वृक्षं प्रति सिंचति एषु किं परिषिंचति अभिरभा
गे भागवर्जे लक्षणादौ अभिरुक्तसंज्ञः हरिमभिवर्तते भक्तो हरिमभि देवं देवमभिसिं

वति अभागे किं यदत्रममाभिस्यात्तद्दीयतां सुःपूजायां अतिरतिक्रमणे च चात्पूजायामिति
इत्युक्तसंज्ञः सुअतिदेवान्कृष्णः कालाध्वनोरत्यन्तसंयोगे २।३।५ द्वितीया मासंकल्याणी मा
समधीते मासंगुडधानाः क्रोशंकुटिलानदी क्रोशमधीते क्रोशंगिरिः अत्यन्तसंयोगे
किं मासस्यद्विरधीते क्रोशस्यैकदेशेपर्वतः स्वतंत्रःकर्त्तेति कर्तृसंज्ञा साधकतमंकर
णं क्रियासिद्धौप्रकृष्टोपकारकंकरणसंज्ञंस्यात् कर्तृकरणयोस्तृतीया अनभिहि
तेकर्त्तरिकरणे चतृतीयास्यात् रामेणबाणेनहतोवाली प्रकृत्यादिभ्यउपसंख्यानं प्र
कृत्याचारुः प्रायेणयाज्ञिकः गोत्रेणगार्ग्यः समेनैतिविषमेणेति द्विद्रोणेनधान्यंक्री
णाति पंचकेनपशून्गृह्णाति सुखेनदुःखेनयातीत्यादि दिवःकर्मच दिवःसाधकत

मेकर्मसंज्ञंस्यात् वाकरणसंज्ञं अथेतरद्दान्वादीमति सहयुक्तेऽप्रधाने सहार्थेनयुक्तेऽप्रधानेतृती
या पुत्रेणसहागतः पिता एवंसाकंसार्द्धंसमंयोगेपि विनापितद्योगेतृतीया वृद्धोयूनेतिनिर्देशा
त् येनांगविकारः येनांगेनविकृतेनांगिनोंगविकारोलक्ष्यतेततस्तृतीया अक्ष्णाकाणः अक्षि
णैवेत्यिकाणत्वविशिष्टइत्यर्थः अंगविकारःकिं अक्षिकाणमस्य अपवर्गेतृतीया अपवर्गः
~~फलप्राप्तिस्तस्यांद्योत्यायांत्वविशिष्टइत्यर्थः अंगविकारःकिं अक्षिकाणमस्य अपवर्गेतृतीया~~
~~अपवर्गःफलप्राप्तिस्तस्यांद्यो~~त्यायांकालाध्वनोरत्यंतसंयोगेतृतीयास्यात् अह्नाक्रोशेनवा
नुवाकोधीतः हेतौ हेत्वर्थेतृतीयास्यात् द्रव्यादिसाधारणे निर्व्यापारसाधारणेचहेतावेक
रणत्वेनक्रियामात्रविषये व्यापारवितनेच दंडेनघटः पुण्येनदृष्टोहरिः इत्थंभूतलक्षणे किं

म॰सि॰ चित्तप्रकारेणाज्ञस्यलक्षणोन्तृतीयास्यात् जटाभिस्तापसः जटाज्ञाप्यतापसत्वविशिष्ट इत्यर्थः संज्ञो
कौ॰ न्यतरस्यांकर्मणि संज्ञःपूर्वस्यजानातेःकर्मणितृतीया पित्रापितरंवासंजानीते कर्मणायमभिप्रै
१३५ तिससंप्रदानं दानस्यकर्मणायमभिप्रैतिससंप्रदानसंज्ञः चतुर्थीसंप्रदाने पत्येशेते कर्मणः
136 करणसंज्ञासंप्रदानस्यचकर्मसंज्ञा पशुंरुद्रायददातीत्यर्थः परिक्रयणेसंप्रदानमन्यतरस्यां
नियतकाले भृत्यासीकरणंपरिक्रयणं तस्मिन्साधकतमंकारकंसंप्रदानसंज्ञंवा शतेनश
तायवापरिक्रीतः तादर्थ्येचतुर्थीवाच्या मुक्तयेहरिंभजति उत्पातेनज्ञापितेच वातायकपि
लाविद्युत् आतपायचलोहिता पीतावर्षायविज्ञेयादुर्भिक्षायसिताभवेत् १ नमःस्वस्तिस्वाहा
स्वधालंवषड्योगाच्चएभिर्योगेचतुर्थी हरयेनमः प्रजाभ्यःस्वस्ति अग्नयेस्वाहा पितृभ्यःस्व १३५

या अलमिति पर्याप्तार्थग्रहणं तेन दैत्येभ्यो हरिरलं प्रभुः समर्थः शक्त इत्यर्थः वषडिंद्राय इत्या
दि ध्रुवमपायेऽपादाने अपायो विश्लेषस्तस्मिन्साध्येऽवधिभूतमपादानं अपादाने पंचमी
ग्रामादायाति धावतोऽश्वात्पततीत्यादि जनिकर्तुः प्रकृतिः जायमानस्य हेतुरपादानं स्यात्
ब्रह्मणः प्रजाः प्रजायंते ल्यब्लोपे कर्मण्यधिकरणे च प्रासादात्प्रेक्षते आसनात्प्रेक्षते प्रासा
दमारुह्य आसने उपविश्य प्रेक्षत इत्यर्थः विभाषा गुणेऽस्त्रियां गुणे हेतावस्त्रीलिंगे पंचमी वा
स्यात् जाड्याज्जाड्येन वा बद्धः गुणे किं धनेन कुलं अस्त्रियां किं बुद्ध्या मुक्तः विभाषेति योगवि
भागादगुणेऽस्त्रियां च क्वचित् धूमादग्निमान् नास्ति घटोऽनुपलब्धेः पृथग्विनानानाभि
स्तृतीयान्यतरस्यां एभिर्योगे तृतीया स्यात्पंचमी द्वितीये च पृथग्रामेण रामाद्रामं वा एवं विना

म॰ सि॰
कौ॰
१३७
137

नाना अन्याराद्दितरर्त्तेदिक्शब्दांचूत्तरपदाजाहियुक्ते पंचमी इतरग्रहणं प्रपंचार्थं अन्योभिन्न इ
तरो वा कृष्णात् आराद्वनात् ऋते कृष्णात् पूर्वो ग्रामात् दिशि दृष्टो शब्दो तेन संप्रति देशकालवृ
त्तिना योगेपि भवति चैत्रात्पूर्वः फाल्गुनः प्राक् प्रत्यग्वा ग्रामात् आचूदक्षिणा ग्रामात् आहि द
क्षिणाहि ग्रामात् अपपरी वर्जने कर्मप्रवचनीयौ स्तः आङ् मर्यादावचने आङ् मर्यादायामुक्तसं
ज्ञः वचनग्रहणादभिविधावपि पंचम्यपाङ्परिभिः एतैः कर्मप्रवचनीयैर्योगे पंचमी अपहरेः
परिहरेः संसारः परिरत्र वर्जने अपि साहचर्यात् लक्षणादौ हरिं परि आमुक्तेः संसारः आसकला
द्ब्रह्म प्रतिः प्रतिनिधिप्रतिदानयोः एतयोरर्थयोः कर्मप्रवचनीयः प्रतिनिधिप्रतिदाने च यस्मा
त् अत्र कर्मप्रवचनीयैर्योगे पंचमी प्रद्युम्नः कृष्णात् प्रति यच्छति माषान् षष्ठी शेषे कारकप्रातिप १३७

दिकार्थव्यतिरिक्तः स्वस्वामिभावादिः शेषस्तत्र षष्ठी स्यात् राज्ञः पुरुषः कर्मादीनामपि संबंधमात्र
विवक्षायां षष्ठ्येव सतां गतं सर्पिषो जानीते मातुः स्मरति एधोदकस्योपस्कुरुते भजे शंभोश्चर
णयोः फलानां तृप्तः कर्तृकर्मणोः कृति कृद्योगे कर्तरि कर्मणि च षष्ठी कृष्णस्य कृतिः जग
तः कर्ता कृष्णः गुणकर्मणि वेष्यते नेताश्वस्य स्रुघ्नं स्रुघ्नस्य वा कृतिकिंतद्धिते मा भूत् कृतपूर्वी क
टं उभयप्राप्तौ कर्मणि उभयोः प्राप्तिर्यस्मिन् कृति तत्र कर्मण्येव षष्ठी स्यात् मयाममसेव्याहरिः
क्तस्य च वर्तमाने वर्तमानार्थक्तस्य योगे षष्ठी स्यात् न लोकेत्यस्यमाणनिषेधस्यापवादः
राज्ञां मतो बुद्धः पूजितो वा अधिकरणवाचिनश्च क्तस्य योगे षष्ठी स्यात् इदमेषां यातं गतं
भुक्तं वा नलोकाव्ययनिष्ठाखलर्थतृनाम् एषां प्रयोगे षष्ठी न स्यात् लादेशाः । कुर्वन् कुर्वा

आश्चर्ययोगे वा दोहोऽगोपेन
कृत्यानां कर्तरि वा षष्ठी स्यात्

वृ° १८८

म.सि.
को.
१३८
138

णः दृष्टिंहरिः हरिंदिदृक्षुः अलंकरिष्णुर्वा उक्तदैत्यान्घातकोहरिः कर्मणिनिषेधः लक्ष्याका
मुकोहरिः अव्ययं जगत्सृष्ट्वा कामिष्टा दैत्यान्हतवान्विष्णुः विष्णुनाहत्वाहताः खलर्थ ई
षत्करः प्रपंचोहरिणा तृनितिप्रत्याहारः शानन्शानचाविति लटःशत्रादारभ्यतृनोनकारात्
शानच् सोमंपचमानः चानश् आत्मानंमंडयमानः शतृ वेदमधीयन् तृन् कर्त्तालोकान्
द्विषः शतुर्वा मुरस्यमुरंवाद्विषन् सर्वोयंकारकषष्ठ्याःप्रतिषेधः शेषषष्ठीतुस्यादेव ब्रा
ह्मणस्यकुर्वन् नरकस्यजिष्णु अकेनोर्भविष्यदाधमर्ण्ययोः योगेषष्ठीन सतःपालकोवत
रति व्रजंगामीशतंदायी निमित्तपर्यायप्रयोगेसर्वासांप्रायदर्शनं किंनिमित्तंवसति के
ननिमित्तेन कस्मैनिमित्तायेत्यादि एवंकिंकारणं कोहेतुः किंप्रयोजनमित्यादिप्रायग्रह १३८

णात्सर्वमात्रः प्रथमाद्वितीयेनसहः ज्ञानेननिमित्तेनहरिःसेव्यः ज्ञानायनिमित्तायेत्यादि षष्ठ्यतस
र्थप्रत्ययेन दिक्शब्देतिपंचम्यापवादः ग्रामस्यदक्षिणतःपुरःपुरस्तात् उपरिउपरिष्टात् एनपा
द्वितीया एनपेतियोगविभागात्षष्ठ्यपि दक्षिणेनग्रामंग्रामस्यवा एवमुत्तरेणदूरान्तिकार्थैः
षष्ठ्यन्यतरस्यां एतैर्योगेषष्ठीस्यात्पंचमीच दूरंनिकटंवाग्रामस्यग्रामाद्वा दिवस्तदर्थस्य द्यू
तार्थस्यक्रयविक्रयरूपव्यवहारार्थस्यदिवःकर्मणिषष्ठी शतस्यदीव्यति तदर्थस्यकिं ब्राह्मणं
दीव्यतिस्तौतीत्यर्थः विभाषोपसर्गे शतस्यशतंवाप्रदीव्यति आधारोधिकरणं कर्तृकर्मद्वा
रातन्निष्ठक्रियायाआधारः कारकमधिकरणसंज्ञंस्यात् सप्तम्यधिकरणेच अधिकरणेस
प्तमीस्यात् चकाराद्दूरान्तिकार्थेभ्यः औपश्लेषिकोवैषयिकोभिव्यापकश्चेत्याधारस्त्रिधा

कटेष्वास्ते स्थाल्यांपचति मोक्षेइच्छास्ति सर्वस्मिन्नात्मास्ति वनस्यदूरेअन्तिकेवादूरांतिकार्थेभ्यद्
तिविभक्तित्रयेणसहचतस्रोत्रविभक्तयःफलिताः क्तस्येन्विषयस्यकर्मण्युपसंख्यानं अधीती
व्याकरणे साध्वसाधुप्रयोगेच साधुकृष्णोमातरि असाधुर्मातुले निमित्तात्कर्मयोगेच सा
धुकृष्णोमातरि असाधुर्मातुले निमित्तात्कर्मयोगेचसप्तमी निमित्तमिहफलं योगःसंयोग
समवायात्मकः चर्मणिद्वीपिनंहन्तिदंतयोर्हंतिकुंजरं केशेषुचमरींहंतिसीम्निपुष्कलको
हतः हेतुः तृतीयाप्राप्ता सीमांडकोशः पुष्कलकोगंधमृगः योगविशेषेकिं वेतनेनधा
न्यलुनाति १ यस्यचभावेनभावलक्षणं यस्यक्रिययाक्रियांतरंलक्ष्यतेततःसप्तमी गोषुदु
ह्यमानासुगतः षष्ठीचानादरे अनादराधिक्ये भावलक्षणे षष्ठीसप्तम्यौस्तः रुदतिरुदतोवा १३९

प्राव्राजीत् रुदंतेपुत्रादिकमनादृत्यसंन्यस्तवानित्यर्थः स्वामीश्वराधिपतिदायादसाक्षिप्रतिभू
तैश्च एतैःसप्तभिर्योगेषष्ठीसप्तम्यौस्तः गवांगोषुवास्वामी गवांगोषुवाप्रसूतः गाएवानुभवि
तुंजातइत्यर्थः आयुक्तकुशलाभ्यांचासेवायां आभ्यांयोगेषष्ठीसप्तम्यौस्तः आयुक्तःकुश
लोवाहरिपूजने हरिपूजनस्यवा आसेवायांकिं आयुक्तोगौः शकटेईषद्युक्तइत्यर्थः
यतश्चनिर्द्धारणं जातिगुणक्रियासंज्ञाभिःसमुदायादेकदेशस्यपृथक्करणंयतस्ततःषष्ठी
सप्तम्यौस्तः नृणांनृषुवाब्राह्मणःश्रेष्ठः गवांगोषुवाकृष्णागौर्बहुक्षीरा गच्छतांगच्छत्सुवाधाव
न्शीघ्रः छात्राणांछात्रेषुवामैत्रःपटुः पंचमीविभक्ते विभागोविभक्तंनिर्धार्यमाणस्यय
त्रभेदएवतत्रपंचमी माथुराःपाटलिपुत्रकेभ्यआढ्यतराः साधुनिपुणाभ्यामर्चायांसप्त

स्यप्रतेः आभ्यां योगे सप्तमी स्यादर्चायां न तु प्रतेः योगे मातरि साधुर्निपुणो वा अर्चायां किं निपुणो
राज्ञो भृत्यः इह तत्वकथनेन तात्पर्यं अप्रत्यादिभिरिति वक्तव्यम् साधुर्निपुणो वा मातरं प्रतिपर्य
नु वा प्रसितोत्सुकाभ्यां तृतीया च आभ्यां योगे तृतीया स्याच्चात्सप्तमी प्रसित उत्सुको वा हरि
णा हरौ वा अधिरीश्वरे स्वस्वामिसंबंधेऽधिः कर्मप्रवचनीयः यस्मादधिकं यस्य चेश्वरवच
नं तत्र सप्तमी अत्र कर्मप्रवचनीययुक्ते सप्तमी उपपरार्द्धे हरेर्गुणाः परार्द्धादधिका इत्यर्थः
ऐश्वर्ये तु स्वस्वामिभ्यां पर्यायेण सप्तमी अधिभुवि रामः अधिरामे भूः इति विभक्त्यर्थाः ॥०॥
समासः पंचधा तत्र समसनं समासः स च विशेषसंज्ञाविनिर्मुक्तः केवलसमासः प्रथमः
प्रायेणोत्तरपदार्थप्रधानस्तत्पुरुषस्तृतीयः
प्रायेण पूर्वपदार्थप्रधानोऽव्ययीभावो द्वितीयः तत्पुरुषभेदः कर्मधारयः कर्मधारयभेदो द्वि

पराप्यन्वबहुव्रीहिश्चतुर्थः प्रायेणोभयपं

सः प्रायेणान्यपदार्थप्रधानो द्वंद्वः पंचमः समर्थः पदविधिः पदसंबंधी यो विधिः समर्थाश्रितो
बोध्यः प्राक्कडारात्समासः कडाराः कर्मधारये इत्यतः प्राक् समास इत्यधिक्रियते सहसुपा स
हेति योगो विभज्यते सुबंतं समर्थेन समस्यते योगविभागस्येष्टसिद्ध्यर्थत्वात्कतिपयतिङंतो
त्तरपदोयं समासः स च छंदस्येव पर्यभूषत् अनुव्यचलत् सुपा सुप्सुपा सह वा समस्यते स
मासत्वात् प्रातिपदिके प्रातिपदिकत्वे सुपो लुक् परार्थाभिधानं वृत्तिः कृत्तद्धितैकशेषसना
द्यंताधातुरूपाः पंच वृत्तयः वृत्त्यर्थावबोधकं वाक्यं विग्रहः स च लौकिकाऽलौकिकश्च द्विधा
तत्र पूर्वं भूतः इति लौकिकः पूर्व अम् भूत सु इत्यलौकिकः पूर्वं भूतः भूतपूर्वः भूतपूर्वे
चरडिति निर्देशात् पूर्वनिपातः इवेन वा समासो विभक्त्यलोपश्च वागर्थाविव वागर्थाविव

जीमूतस्येवभवतिप्रतीके इतिकेवलसमासः अव्ययंविभक्तिसमीपसमृद्ध्यर्थाभावात्ययासंप्र
तिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसंपत्तिसाकल्यांतवचनेषु विभक्त्यर्था
दिषुवर्त्तमानमव्ययंसुबंतेनसहनित्यंसमस्यते प्रायेणाविग्रहोनित्यसमासः प्रायेणास्व
पदविग्रहोवा विभक्तौ हरिङि अधि इतिस्थिते प्रथमानिर्दिष्टंसमासउपसर्जनंसमा
सशास्त्रेप्रथमानिर्दिष्टमुपसर्जनंस्यात् उपसर्जनंपूर्वं समासेउपसर्जनंप्राक्प्रयोज्यं
इत्यधेःप्राक्प्रयोगः सुपोलुक् एकदेशविकृतस्यानन्यत्वात् प्रातिपदिकसंज्ञायांस्वाद्युत्प
त्तिः अव्ययीभावश्चेत्यव्ययात्सुपोलुक् अधिहरि अव्ययीभावश्चनपुंसकेस्यात् गाःपाती
तिगोपाः तस्मिन्नधिगोपं नाव्ययीभावादतोमपंचम्याः अदंतादव्ययीभावात्सुपोनलुक्

तस्यपंचमीविनाग्रमादेशः कुंभस्यसमीपंउपकुंभं तृतीयासप्तम्योर्बहुलं अदंतादव्ययीभावा
त्तृतीयासप्तम्योर्बहुलमम्भावः उपकुंभं उपकुंभेन उपकुंभे उपकुंभं बहुलग्रहणात्
सुमद्रमुन्मत्तगंगमित्यादौसप्त म्याः नित्यमम्भावः मद्राणांसमृद्धिःसुमद्रंयवनानां
व्यृद्धिर्दुर्यवनं मक्षिकाणामभावोनिर्मक्षिकं हिमस्यात्ययोतिहिमं निद्रासंप्रतिनयु
ज्यतेइत्यतिनिद्रं हरिशब्दस्यप्रकाशः इतिहरि विष्णोःपश्चादनुविष्णु योग्यतावीप्सा
पदार्थानतिवृत्तिसादृश्यानियथार्थाः रूपस्ययोग्यमनुरूपं अर्थमर्थंप्रतिप्रति
र्थं शक्तिमनतिक्रम्ययथाशक्ति अव्ययीभावेचाकाले सहस्यसः स्यादव्ययीभावेन
तुकाले हरेःसादृश्यंसहरि कालेतुसहपूर्वाह्णं ज्येष्ठस्यानुपूर्व्येणेत्यनुज्येष्ठं चक्रेण

युगपत्सचक्रं सदृशःसख्या ससखि क्षत्राणांसंपत्तिःसक्षत्रं तृणमप्यपरित्यज्य सतृणं अ
ग्निग्रंथपर्यंतमधीतेसाग्नि यथासादृश्ये असादृश्येएवयथाशब्दःसमस्यते तेनेह न
यथा हरिस्तथा हरः यावदवधारणे यावंतःश्लोकाःतावंतोऽच्युतप्रणामाः यावच्छ्लोकं
सुप्प्रतिनामात्रार्थे शाकस्यलेशःशाकप्रति विभाषाअधिकारोयं अपपरिबहिरं
चवःपंचम्याः अपविष्णुसंसारः अपविष्णोः परिविष्णु परिविष्णोः बहिर्वनंबहि
र्वनात् प्राग्वनात् तिष्ठद्गुप्रभृतीनिचएतानिनिपात्यंते तिष्ठंतिगावोयस्मिन्काले
सतिष्ठद्गुदोहनकालः पारेमध्येषष्ठ्यावा पारमध्यशब्दौषष्ठ्यंतेनसहसमस्येते
एदंतत्वंचानयोर्निपात्यते पारेगंगं गंगापारे मध्येगंगं गंगामध्यं महाविकल्पे

नवाक्यमपि संख्यावंश्येन वंश्योद्विधा विद्यया जन्मना च तत्र भवो वंश्यः तद्वाचिना स
ह संख्या समस्यते द्वौ मुनी वंश्यौ द्विमुनि व्याकरणस्य त्रिमुनि विद्यातद्वतामभेदविवक्षा
यां त्रिमुनिव्याकरणं एकविंशतिभारद्वाजं नदीभिश्च नदीभिः संख्या वा समस्यते स
माहारे चायमिष्यते पंचगंगं द्वियमुनं अन्यपदार्थे च संज्ञायां अन्यपदार्थे विद्यमानं सु
बंतं नदीभिः सह नित्यं समस्यते विभाषाधिकारेऽपि वाक्येन संज्ञानवगमादिह नित्यसमा
सः उन्मत्तगंगं नाम देशः लोहितगंगं तद्धिताः आ पंचमसमाप्तेरधिकारोयं अव्ययी
भावे शरत्प्रभृतिभ्यः शरदादिभ्य टच् स्यात् स्यात्समासान्तोऽव्ययीभावे शरदः समीपं उप
शरदं प्रतिविपाशं शरद् विपाश् अनस् मनस् उपानह् दिव् हिमवत् अनडुह् दि

शादृश विश चेतस् चतुर् त्यद् तद् यद् कियत् जरायाःजरसच् उपजरसं अनश्च अन्नंता
दव्ययीभावाट्टच्स्यात् नस्तद्धिते नांतस्य भस्य टेर्लोपस्तद्धिते उपराजं अध्यात्मं नपुंसका
दन्यतरस्यां अन्नंतंयत्क्लीबंतदंतादव्ययीभावाट्टज्वास्यात् उपचर्मं झयः झयंतादव्ययीभा
वाट्टज्वा उपसमित् उपसमिधं नदीपौर्णमास्याग्रहायणीभ्यवाटच् उपनद उपनदीत्यादि
गिरेश्चसेनकस्य गीर्यंतादव्ययीभावाट्टज्वा सेनकग्रहणंपूजार्थं उपगिरं उपगिरि प्रति
परिसमनुभ्योक्ष्णः इत्यप्रमदे अक्ष्णः परंपरोक्षं अतएवसमासःपरोक्षेलिडितिनिपातना
त्परस्यौकारः इत्यादि इत्यव्ययीभावः तत्पुरुषः अधिकारोयं प्राक्बहुव्रीहेः द्विगुश्चतत्पु
रुषसंज्ञः द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैः द्वितीयांतंश्रितादिप्रकृतिकैः सु

वैनैसहवासमभ्यस्तेन कृतेसंस्थितः कृतसंस्थितः इत्यादि तृतीयातत्कृतार्थेन गुणवचनेनार्थेन च सह प्रा
ग्वत् शंकुलया खंडः शंकुलाखंडः धान्येनार्थो धान्यार्थः तत्कृतेनेति किं अक्ष्णा काणः पूर्वस
दृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः तृतीयांतमेभिः प्राग्वत् मासपूर्वः मातृसदृशः
पितृसमः ऊनार्थः माषोनं कार्षापणं माषविकलं वाक्कलहः आचारनिपुणः गुडमिश्रः
आचारश्लक्ष्णः अवरस्योपसंख्यानं मासावरः अन्नेन व्यंजनं संस्कारकद्रव्यवाचके तृती
यांतमन्नेन सह प्राग्वत् दध्ना उपसिक्त ओदनो दध्योदनः भक्ष्येण मिश्रीकरणे गुडेन मिश्राः
धानाः गुडधानाः गुडधानाः कर्तृकरणे कृता बहुलं कर्तरि करणे च तृतीयांतं कृदंतेन बहुलं प्रा
ग्वत् हरित्रातः नखभिन्नः कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं नखनिर्भिन्नः कृतादि काष्ठैः

म॰ सि॰
कौ॰
१४४
144

पचतितरां चतुर्थीतदर्थार्थबलिहितसुखरक्षितैः चतुर्थ्यंतानार्थायययत्तद्वाचिनार्थादिभिश्च
तर्थ्येनप्राग्वत् यूपायदारु यूपदारुः तदर्थेनप्रकृतिविकारभावएवेष्टं तेनेह न रंधनायस्था
ली अश्वघासादयस्तु षष्ठीतत्पुरुषाः अर्थेन नित्यसमासो विशेष्यलिंगता चेति वक्तव्यं द्वि
जायायं द्विजार्थः सूपः द्विजार्थेयं यवागूः द्विजार्थाय यवागू भूतबलिः गोहितं गोसुखं गोर
क्षितं पंचमीभयेन चौराद्भयं चौरभयं स्तोकांतिकदूरार्थकृच्छ्राणि क्तेन पंचम्याः स्तोकादि
भ्यः अलुगुत्तरपदे स्तोकान्मुक्तः अल्पान्मुक्तः अंतिकादागतः अभ्याशादागतः दूरादाग
तः कृच्छ्रादागतः षष्ठी सुवेतेनप्राग्वत् राज्ञःपुरुषो राजपुरुषः याजकादिभिश्च षष्ठी
तेसमस्यते वक्ष्यमाणस्यापवादः ब्राह्मणयाजकः देवपूजकः याजकपूजकपरिचारक १४४

परिवेषकस्नातकाध्यापकोत्साहकोद्धर्त्तकहोतृपोतृभर्तृरथगणकपतिगणकानि गुणान्तरेण
तरप्लोपश्चान्तरत्वंन यद्गुणवाचिनेनसमासः सर्वेषांश्वेततरः सर्वश्वेतः सर्वेषांमहत्तरः
सर्वमहान् ननिर्धारणे षष्ठीसानसमस्यते नृणांद्विजःश्रेष्ठः पूरणगुणसुहितार्थसद
व्ययतव्यसमानाधिकरणेन पूरणाद्यर्थैः सदादिभिश्चषष्ठीनसमस्यते सतांषष्ठः
काकस्यकार्ष्ण्यं सुहितार्थास्तृप्त्यर्थाः फलानांसुहितःसत् द्विजस्यकुर्वन्कुर्वाणोवा
ब्राह्मणस्यकृत्वा सर्वान्नरसाहचर्यात्कृत्यनेत्वव्ययमेवगृह्यतेतेनतद्व परीत्यादिसिद्धंब्राह्म
णस्यकर्त्तव्यं तत्तकस्यसर्पस्य क्तेनचपूजायां मतिबुद्धिसूत्रेणविहितोयःक्तस्तदंतेनषष्ठी
नसमस्यते राज्ञांमतोबुद्धःपूजितोवा अधिकरणवाचिनाच क्तेनषष्ठीनसमस्यते इदमे

म॰ सि॰
कौ॰
१४५
145

षामासितंगतंभुक्तंवा कर्मणिच उभयप्राप्तौकर्मणीतियाषष्ठीसानसमस्यते आश्चर्योगवां
दोहो ऽगोपेन तृजकाभ्यांकर्त्तरि कर्त्तर्यर्थेतृजकाभ्यांषष्ठ्यानसमासः अपांस्रष्टा वज्रस्यभ
र्त्ता ओदनस्यपाचकः कर्त्तरिच कर्त्तरिषष्ठ्याअकेननसमासः भवतःशायिका पूर्वा
पराधरोत्तरमेकदेशिनैकाधिकरणे अवयविनासहपूर्वादयःसमस्यंते एकत्वसंख्या
विशिष्टश्चेदवयवीषष्ठीसमासापवादः पूर्वंकायस्यपूर्वकायः अपरकायः एकदे
शिनाकिं पूर्वंनाभेःकायस्य एकाधिकरणेकिं पूर्वंछात्राणां अर्द्धंनपुंसकं समांशवा
च्यर्द्धशब्दोनित्यंक्लीबेप्राग्वत् अर्द्धंपिप्पल्या अर्द्धपिप्पली एकविभक्तावषष्ठ्यंतवचन
मित्युपसर्जनसंज्ञाभावात् ह्रस्वोनक्लीबोकिंग्रामार्द्धः द्रव्यैकत्वएव अर्द्धंपिप्पलीनां द्वि

तीयतृतीयचतुर्थतुर्याण्यन्यतरस्यां एतान्येकदेशिना सह प्राग्वत्तद्वा द्वितीयं भिक्षायाः द्विती
यभिक्षा एकदेशिना किं द्वितीयं भिक्षाया भिक्षुकस्य अन्यतरस्यां ग्रहणमप्राप्तविभाषार्थं पूरणगु
णेति निषेधं बाधित्वा पक्षे षष्ठीसमासः भिक्षाद्वितीयं प्राप्तापन्ने च द्वितीयया पक्षे द्विती
याश्रितेति समासः प्राप्तो जीविकां प्राप्तजीविकः जीविकाप्राप्तः आपन्नजीविकः जीवि
कापन्नः इहैव सूत्रे द्वितीयया अ इति स्थित्वा अकारोपि विधीयते तेन जीविकां प्राप्ता स्त्री प्रा
प्तजीविका आपन्नजीविका कालाः परिमाणिना परिच्छेद्यवाचिना सुबन्तेन सह का
लाः समस्यन्ते मासो जातस्य यस्य स मासजातः सप्तमी शौण्डैः सप्तम्यन्तं शौण्डादिभिः प्राग्व
त् अक्षेषु शौण्डः अक्षशौण्डः शौण्ड धूर्त कितव व्याड प्रवीण संवीतान्तर अधि पटु पण्डित

म.सि.
कौ.
१४८
146

ऊपालचपञ्चकपालानि द्वितीया तृतीयेत्यादियोगविभागादन्यत्रापि द्वितीयादीनांप्रयो
गवशात्समासोज्ञेयः दिक्संख्येसंज्ञायां विशेषणं विशेष्येण बहुलमित्येवसिद्धेसंज्ञाया
मेवेतिनियमार्थंसूत्रं पूर्वेषुकामशमी पूर्वेषुकामशमी सप्तर्षयः सप्त
र्षयः तेनेह न उत्तरावृक्षाः पंचब्राह्मणाः तद्धितार्थोत्तरपदसमाहारेच तद्धितार्थेवि
षयेउत्तरपदेचपरतःसमाहारेचवाच्येदिक्संख्येप्राग्वत् पूर्वस्यांशालायांभवःपूर्वाशा
लाइतिसमासेजातेजाते सर्वनाम्नोवृत्तिमात्रे पूर्वंप्रवत् दिक्पूर्वपदादसंज्ञायांञः
अस्माद्भवाद्यर्थेञस्यादसंज्ञायां तद्धितेष्वचामादेः ञितिणितिचप्रत्ययेतद्धिते अचामादे
रचोवृद्धिःस्यात् यस्येतिच पौर्वशालः पूर्वाशालाप्रियायस्येतित्रिपदेबहुव्रीहौकृतेप्रि १४८

याशब्दे उत्तरपदेशब्दे योऽसत्पुरुषः तेनशालाशब्दे प्राकारउदात्तः पूर्वशालाप्रियः दिक्समा
हारेनाम्न्यनभिधानात् षण्णांमातॄणामपत्यंषाण्मातुरः मातुरुत्संख्यासंभद्रपूर्वायाइ
ति वक्ष्यमाणेनाण् पंचगावोधनंयस्येतित्रिपदेबहुव्रीहौ द्वंद्वतत्पुरुषयोरुत्तरपदेनित्यसमा
सवचनेगोरतद्धितलुकि गोनान्तात्तत्पुरुषाट्टच्स्यात् समासांतोनतद्धितलुकि पंचगवधनः
संख्यापूर्वोद्विगुः तद्धितार्थेत्युक्तःसंख्यापूर्वोद्विगुःस्यात् द्विगुरेकवचने द्विग्वर्थःसमाहारेए
कवत्स्यात् सनपुंसके समाहारेद्विगुर्द्वंद्वश्चनपुंसकेस्यात् पंचानांगवांसमाहारःपंचगवं वि
शेषणंविशेष्येणबहुलं भेदकंभेद्येनसमानाधिकरणेनबहुलंप्राग्वत् नीलमुत्पलं नीलोत्प
लं बहुलग्रहणात्क्वचिन्नित्यं कृष्णसर्पः क्वचिन्नरामोजामदग्न्यः अपरस्यार्द्धेपश्चभावोवक्तव्यः

म॰सि॰
कौ॰
१४७
147

अपरस्यासावर्द्धश्चपश्चार्द्धः सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः सह समस्यंते सद्वैद्यः आन्महतः स
मानाधिकरणजातीययोः महावैयाकरणः तत्पुरुषसमानाधिकरणः कर्मधारयः पुंवत्कर्मधार
यजातीयदेशीयेषु कर्मधारयेजातीयदेशीययोश्चपरतोभाषितपुंस्कात्परऊङभावोयस्मिंस्त
थाभूतं पूर्वंपुंवत् पूरणीप्रियादिष्वप्राप्तः पुंवद्भावोविधीयते महतीमहानवमीकृष्णच
तुर्दशी महाप्रियापूज्यमानैःकिं उत्कृष्टोगौः पंकादुद्धृतइत्यर्थः उपमानानिसामान्यव
चनैः उपमानोपमेयैकधर्मवचनैरुपमानानिसमस्यंते घनश्यामः उपमितंव्याघ्रादि॰
भिःसामान्याप्रयोगे पुरुषोव्याघ्रइवपुरुषव्याघ्रः सामान्याप्रयोगेकिं पुरुषोव्याघ्रइवशूरः
शाकपार्थिवादीनामुत्तरपदलोपश्च शाकप्रियःपार्थिवः शाकपार्थिवः देवपूजको १४७

ब्राह्मणः देवब्राह्मणः मयूरव्यंसकादयश्च एतेनिपात्यंते मयूरोव्यंसकः मयूरव्यंसकः व्यंसको
धूर्त्तः उदक्चावाक्च उच्चावचं निश्चितेचप्रचितेच निश्चप्रचं नास्तिकिंचनयस्यसोऽकिं
चनः आख्यातमाख्यातेनक्रियासातत्ये अश्नीतपिवतेत्येवंसततं यत्राभिधीयते साश्नीत
पिवता पचतभृज्जता खादतमोदता नास्तिकुतोपिभयंयस्यसोऽकुतोभयः अन्योराजाराजा
ज्ञांतरं चिन्मात्रं नञ्स्वरूपाप्राग्वत् नलोपोनञः नञोनस्यलोपः उत्तरपदेअब्राह्मणः तस्मा
न्नुडचि लुप्तनकारान्नञ उत्तरपदस्याजादेर्नुट् अनश्वः नैकधेत्यादौतुनशब्देनसहसु
पेतिसमासः कुगतिप्रादयः एतेसमर्थेननित्यंसमस्यंते कुत्सितःपुरुषः कुपुरुषः कुर्या
दयश्च्व्यंताडाजंताश्चक्रियायोगेगतिसंज्ञास्युः उररीकृत्य उरीकृत्य शुक्लीकृत्य पटपटा

म॰सि॰
कौ॰
१४८
148

कृत्य कारिकाशब्दस्योपसंख्यानं कारिकाक्रिया कारिकाकृत्य अनुकरणंचानितिपरं व्याद्
कृत्य अनितिपरंकिं खाडितिकृत्वानिरष्ठीववत् आदराअनादरयोःसदसती सत्कृत्य असत्
कृत्य भूषणेऽलं अलंकृत्य भूषणेकिं अलंकृत्वौदनंगतःपर्याप्तमित्यर्थः अनुकरणमि
त्यादि त्रिसूत्रीस्वभावात्कृञ्विषया अंतरपरिग्रहे अंतर्हत्य मध्येहत्वेत्यर्थः अपरिग्रहेकिं
अंतर्हत्वागतः हत्वापरि गृह्यगतइत्यर्थः कणेमनसीश्रद्धाप्रतीघाते कणेहत्यपयः पि
बति मनोहत्य कणेशब्दःसप्तमीप्रतिरूपकोनिपातोऽभिलाषातिशयेवर्त्तते मनःश
ब्दोप्यत्रैव पुरस्कृत्य अस्तंच अस्तमितिमोलमव्ययंगतिसंज्ञं अस्तंगत्य अदृश्यगत्यर्थ
वदेषु अव्ययमित्येव अच्छगत्य अच्छोद्य अभिमुखंगत्वा उक्त्वाचेदित्यर्थः अव्ययं १४८

किं जलमध्ये गच्छति अदोनुपदेशे अदःकृत्य अदःकृत्वा परं प्रत्युपदेशेप्रत्युदाहरणं तिरोंत
र्द्धौ तिरोभूय विभाषाकृञि तिरःकृत्य तिरस्कृत्य तिरःकृत्वा तिरस्कृत्वा उपाजेन्वाजे एतौकृ
ञिवागतिसंज्ञौ उपाजेकृत्य अन्वाजेकृत्य उपाजेकृत्वा अन्वाजेकृत्वा दुर्बलस्यबलमाधाये
त्यर्थः अनत्याधानेउरसिमनसी मनसिकृत्वा मनसिकृत्य निश्चित्येत्यर्थः अत्याधानमुप
श्लेषः तत्रन उरसिकृत्वापाणिंशेते मध्येपदेनिवचनेच एतेकृञियोगेगतिसंज्ञावास्युरनत्याधा
ने मध्येकृत्य मध्येकृत्वा पदेकृत्य पदेकृत्वा निवचनेकृत्वा निवचनेकृत्य वाचंनियम्ये
त्यर्थः नित्यंहस्तेपाणावुपयमनेकृञि उपयमनेविवाहः स्वीकारमात्रमित्यन्ये पाणौकृत्य
हस्तेकृत्य प्राध्वंबंधने प्राध्वमित्यव्ययं प्राध्वंकृत्य बंधनेनानुकूलंकृत्वेत्यर्थः प्रार्थनादिना

त्वनुकूलकरणे। प्राध्वंकृत्वा जीवकोपनिषदावौपम्ये जीविकामिवकृत्वाजीविकाकृत्य उपनि
षदमिवकृत्वा उपनिषत्कृत्य औपम्येकिं जीविकांकृत्वा प्रादिग्रहणमगत्यर्थं कुपुरुषः अ
त्रवार्त्तिकानि प्रादयोगताद्यर्थेप्रथमया प्रगतआचार्यः प्राचार्यः अत्यादयःक्रांताद्यर्थे
द्वितीयया अतिक्रांतोमालामितिविग्रहे एकविभक्तिचापूर्वनिपाते विग्रहेयन्नियतविभ
क्ति केनतदुपसर्जनं नतुतस्यपूर्वनिपातः गोस्त्रियोरुपसर्जनेयोगोशब्दः स्त्रीप्रत्ययांत
चतदंतस्यप्रातिपदिकस्यह्रस्वः अतिमालः अवादयःक्रुष्टाद्यर्थेतृतीयया अवक्रुष्टः
कोकिलया अवकोकिलः पर्यादयोग्लानोध्ययनायपर्यध्ययनः निरादयःक्रांताद्यर्थे
पंचम्याः निष्क्रांतःकौशांब्यानिष्कौशांबिः तत्रोपपदंसप्तमीस्थं उपपदमतिङ् उपपदं

त्वेनेसमर्थेननित्यंसमस्यते अतिङन्तश्चसमासः कुंभंकरोतीतिकुंभकारः अतिङ्किं
माभवान्भूत् माङिलुङितिसप्तमीनिर्देशान्माङुपपदं तथाचगतिकारकोपपदानांकृद्भिः
सहसमासवचनेप्राक् सुबुत्पत्तेः माश्री अश्वक्रीतीकच्छपीत्यादि अमैवाव्ययेन अमैवचेत्तु
ल्यविधानेयदुपपदंतदेवाव्ययेनसहसमस्यते स्वादुंकारं स्वादुमित्रिणमुलितिणमुल् ने
ह कालसमयवेलासुतुमुन् कालःसमयोवेलावाभोक्तुं अमैवेतिकिं अग्रेभोजं अग्रेभुक्त्वा
विभाषाग्रेप्रथमपूर्वेष्वितिक्त्वाणमुलौ अमाचान्येनचतुल्यविधानमेतत् तृतीयप्रभृती
न्यन्यतरस्यां उपदंशस्तृतीयायामित्यादीन्युपपदान्यमेनाव्ययेनसहवासमस्यंते मूलके
नोपदंशंभुंक्तेमूलकोपदंशं उपदंशस्तृतीयायामितिणमुल् क्त्वाचतृतीयाप्रभृतीन्युपप

म॰ सि॰
कौ॰
१५॰
150

दाग्नि क्षोनेनसहवासमसंते उच्चैःक्षत्य उच्चैःक्षत्वा अव्ययेयथाभिप्रेताख्यानेकृञः क्षाण
णामलोऽग्नि क्षाणमलोनतत्पुरुषस्यांगुलेःसंख्याव्ययादेः संख्याव्ययादेरंगुल्यंतस्यतत्पु
रुषस्यद्यंगुलम् निर्गतमंगुलिभ्योनिरंगुलम् अहः सर्वैकदेशसंख्यातपुण्याच्चरात्रेः
एभ्योरात्रेरच्स्यात् चात्संख्याव्ययादेः अहर्ग्रहणंद्वंद्वार्थं रात्राह्नाहाःपुंसि एतेपुंस्येव
अहश्चरात्रिश्चअहोरात्रः सर्वरात्रः पूर्वरात्रः संख्यातरात्रः पुण्यरात्रः संख्यापूर्वंरात्रं
क्लीबं द्विरात्रं अतिरात्रः राजाहःसखिभ्यष्टच् एतदंतात्तत्पुरुषाट्टच्स्यात् परमराजः
अतिराजा ह्रेमहनीभूतोह्यहीनः कृष्णसखः अह्नष्टखोरेव टिलोपः उत्तमाहः नात्मत्र
अह्नोह्नएतेभ्यः सर्वादिभ्योहन्शब्दस्याह्नादेशःसमासांतेपरे अह्नोदंतात् अदंतपूर्वपद १५॰

स्याद्गोनस्याणः सर्वाह्नः नसंख्यादेः समाहारे अह्नोऽह्नादेशो न संख्यादेरिति निसृष्टार्थं द्वयोर
ह्नोः समाहारः द्व्यहः त्र्यहः उत्तमेकाभ्यां च अह्नोऽह्नादेशो न उत्तमशब्दोऽन्त्यार्थः पुण्यशब्दसा
ह पुण्यसुदिनाभ्यामह्नः क्लीबत्वं चेष्टं पुण्याहं सुदिनाहं एकाहः अग्राख्यायामुरसः टच्
अश्वानामुरः इवअश्वोरसं ग्रामकौटाभ्यां तक्ष्णः ग्रामतक्षः कौटतक्षः अतेः
शुनः अतिश्वो वाराहः उपमानादप्राणिषु आप्राणिविषयकोपमानवाचितः शुनष्टच् आ
कर्षः श्वेव आकर्षश्वः उत्तरमृगपूर्वाच्च सक्थ्नः चादुपमानात् उत्तरसक्थं पूर्वसक्थं फल
कमिव सक्थि फलकसक्थं नावो द्विगोः द्विनावं अर्द्धाच्च अर्द्धनावं खार्याः प्राचो द्विगोर
र्द्धाच्च खार्या वेष्टा द्विखारं द्विखारि अर्द्धखारी द्वित्रिभ्यामञ्जलेः टज्वास्याद्द्विगौ द्व्यञ्जलि द्व्यञ्जलं

म॰सि॰ ब्रह्माणोजानपदाख्यायो ब्रह्मंतात्तत्पुरुषाटच् सुराष्ट्रेब्रह्मासुराष्ट्रब्रह्मः ऊमहद्भ्यामन्यतर
कौ॰ स्यां ऊब्रह्मा ऊब्रह्मः महाब्रह्मा महाब्रह्मः ग्रान्महतःसमानाधिकरणजातीययोः महाप्र
१५१ कारो महाजातीयः द्यष्टनःसंख्यायामबहुव्रीह्यशीत्योः ग्रात्स्यात् द्वादश ग्रष्टादश ग्रब
151 हुव्रीह्यशीत्योः किं द्वित्राः द्व्यशीतिः प्राक्शतादित्यनुवृत्तेर्नेह द्विशतं द्विसहस्रं त्रेस्त्रयः त्रि
शब्दस्यत्रयस्स्यात् पूर्वविषये त्रयोविंशतिः विभाषाचत्वारिंशत्प्रभृतौसर्वेषां द्यष्टनोस्त्रे
ग्रप्राग्वत्केवाचत्वारिंशदादौपरे द्विचत्वारिंशत् द्वाचत्वारिंशत् अष्टचत्वारिंशत् ग्रष्टाच
त्वारिंशत् त्रिचत्वारिंशत् त्रयश्चत्वारिंशत् एवंपंचाशत् षष्टिसप्ततिनवतिषु परवल्लिंगं
द्वंद्वतत्पुरुषयोः एतयोःपरपदस्येवलिंगंस्यात् कुक्कुटमयूर्याविमे मयूरीकुक्कुटाविमो ग्र १५१

ई पिप्पली द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु न पंचसु कपालेषु संस्कृतः पंचकपालः पुरोडा
शः प्राप्तो जीवकः आपन्नजीवकः अलंकुमार्यै अलंकुमारिः अतएव ज्ञापकात्समासः निष्को
शाम्बिः पूर्ववदश्ववडवौ द्विवचनेत्र अश्ववडवौ अश्ववडवान् अश्ववडवैः अपथं नपुंसके
तत्पुरुषश्चेत्येव अन्यत्र तु अपथो देशः कृतसमासान्तग्रहणान्नेह अपंथाः अकारान्तरपदो द्वि
गुः स्त्रियां इष्टः पंचफली आचितो वा पंचषट्वं पंचषट्वी पात्राद्यन्तस्य न पंचपात्रं त्रिभु छाया
बाहुल्ये छायान्तस्तत्पुरुषो नपुंसकं स्यात् पूर्वपदार्थबाहुल्ये इक्षूणां छाया इक्षुच्छायं सभा
राजामनुष्यपूर्वा राजपर्यायपूर्वोऽमनुष्यपूर्वश्च सभान्तस्तत्पुरुषो नपुंसकं स्यात् इनसभं
ईश्वरसभं पर्यायस्यैवेष्यते नेह राजसभा चन्द्रगुप्तसभा अमनुष्यशब्दो रूढ्या रक्षः पि

म॰ सि॰ कौ॰ १५२ 152

शाखादीनाह रक्षःसभे पिशाचसभे विभाषासेनासुराछायाशालानिशानां एतदंतस्तत्पुरुषः क्लीवेवास्यात् ब्राह्मणसेना यवसुरं यवसुरा कुड्यछाया कुड्यछायं गोशाले गोशाला श्वनि शं श्वनिशा तत्पुरुषोनञ्कर्मधारयइत्यनवृत्तेर्नेह दृढसेनोराजा असेना परमसेना इत्यादि अशालाच संघातार्थायासभातदंतस्तत्पुरुषःक्लीवेस्यात् स्त्रीसभं स्त्रीसंघातइत्यर्थः अशाला शालाकिंधर्मसभाधर्मशालाइत्यर्थः अर्द्धर्चाःपुंसिक्लीवेचस्युः अर्द्धर्चं अर्द्धर्चः एवंध्वजतीर्थशरीरमंडपयूपदेहांकुशपात्रसूत्रपात्रादयः सामान्येनपुंसकं मृदुपचति प्रातःकमनीयं इतितत्पुरुषः ॥०॥ शेषोबहुव्रीहिरधिकारोयंप्राग्द्वंद्वात् अनेकमन्यपदार्थे अनेकंप्रथमांतमन्यपदार्थेवर्तमानेवासमस्यते सबहुव्रीहिः सप्तमीविशेषणेनबहुव्रीहौ सप्तम्यं १५२

नेविशेषणंचवहुव्रीहौसर्वस्मात् हलंदंतात्सप्तम्यःसंज्ञायां हलंतादंदंताच्चसप्तम्याअलुक् नवि
मारः युधिष्ठिर वनेकसेरुकः अरण्येतिलकः अमूर्द्धमस्तकात्स्वांगादकामे मूर्द्धमस्तकाभ्यामद
लंतादंदंताच्चसप्तम्याअलुक् कामभिन्नेउत्तरपदे उरसिलोमा कंठेकालः अकामेकिं मुखेकामः
अमूर्द्धमस्तकात्किं मूर्द्धशिखः मस्तकशिखः अतएवज्ञापकात्व्यधिकरणपदोवहुव्रीहिः प्रा
प्तमुदकंयंग्रामंप्राप्तोदकोग्रामः ऊढरथोनड्वान् उपहृतपशूरुद्रः उद्धृतौदनास्थाली पीतां
वरोहरिः वीरपुरुषकोग्रामः प्रादिभ्योधातुजस्यवाच्योवोत्तरपदलोपश्च प्रपतितपर्णः प्रपर्णः
नञोस्त्यर्थानांवाच्योवोत्तरपदलोपः अविद्यमानपुत्रः अपुत्रः स्त्रियाःपुंवद्भाषितपुंस्कादनूङ् समा
नाधिकरणेस्त्रियामपूरणीप्रियादिषु उक्तपुंस्कादनूङ् ऊङोभावोयत्रतथाभूतस्यस्त्रीवा चकशब्द

स्यपुंवाचकस्येव रूपं स्यात्समानाधिकरणे न तु पूरण्यां प्रियादौ च परतः गोस्त्रियोरिति ह्रस्वः चित्रगुः
रूपवद्भार्यः अनूङ् किं वामोरूभार्यः भाषितपुंस्कात् किं गंगाभार्यः समानाधिकरणे किं कल्याण्या
माता स्त्रियां किं कल्याणी प्रधानं यस्य स कल्याणीप्रधानः पूरण्यां तु अपूरणीप्रमाण्योः पूर
णार्थप्रत्ययान्तं यत्स्त्रीलिंगं तदन्तात्प्रमाण्यन्ताच्च बहुव्रीहेरप् स्यात् कल्याणी पंचमी यासां रात्री॰
णां ताः कल्याणीपंचमा रात्रयः स्त्री प्रमाणी यस्य स स्त्रीप्रमाणः पुंवद्भावनिषेधोऽप्प्रत्ययश्च प्रधान
पूरण्यामेव रात्रिः पूरणी वाच्या चेत्तदोक्तोदाहरणे पूरणी मुख्या अन्यत्र तु नद्यृतश्च नद्युत्तरप
दादृदन्तोत्तरपदाच्च बहुव्रीहेः कप् वाच्या चेत्तदोक्तोदाहरणे पूरणी मुख्या अन्यत्र तु नद्यृतश्च नद्यु
त्तरपदादृदन्तोत्तरपदाच्च बहुव्रीहेः कप् पुंवद्भावः केऽणः केपरेऽणो ह्रस्वः इति प्राप्ते न कपि क १५३

विपरेतनद्वन्द्वः कल्याणीपंचमीकाः पक्षाः अत्रतिरोहितावयवभेदस्यपदस्यान्यपदार्थतयाता
त्रिरप्रधाने बहुकर्त्तृकः अप्रियादिषुकिं कल्याणीप्रियः प्रिया मनोज्ञा कल्याणी सुभगा
दुर्भगा भक्तिः सचिवा स्वसा कान्ता क्षान्ता समा चपला दुहिता वामा अबला तनया
मामान्येनपुंसके दृढंभक्तिर्यस्यसदृढभक्तिः स्त्रीत्वविवक्षायांतु दृढाभक्तिः तसिलादिष्व
कृत्वसुजन्तेषुस्त्रियाः पुंवत्स्यात् यतस्तो तरपतमपौ चरट्जातीयरौ कल्पदेशीयरौ रूप
पपाशपौ थाल् तिल्थ्यनौ पञ्चस्त्रियाः गुणवचनस्यकिं कर्त्रीभावः कर्त्रीत्वे पुंवत् बह्वी
षु बहुत्ववद्भवतस्त्यादि त्वतलोर्गुणवचनस्य शुक्लायाभावः शुक्लत्वं शुक्लता भस्याढेत
द्धिते हस्तिनीनांसमूहोहास्तिकं अग्रेढकिं रौहिणेयः कक्कटादीनामेण्डादिषु काक्कुटाण्डं स्र

स.सि.
कौ.
१५४
154

गपदं स्वगाहीरं काकप्णवः क्यङ्मानिनोश्च पुंवत् एनीवाचरति एतायते श्येनीवाचर
ति श्येतायते दर्शनीयां मन्यते दर्शनीयमानिनी नकोपधायाः स्त्रियाः पुंवत् पाचिकाभार्यः
रसिकाभार्यः मद्रिकायते मद्रिकामानिनी पाकाभार्यायस्य स तद्धितवुग्रहणान्नेह पाक
भार्यः संज्ञापूरण्योश्च न पुंवत् दत्ताभार्यः पंचमीभार्यः वृद्धिनिमित्तस्य च तद्धितस्यारक्त
विहितायावृद्धिस्तद्धेतुर्यस्तद्धितोरक्तविकारार्थस्तदंतस्त्रीनपुंवत् सुकेशीभार्यः स्वांगा
त्किं पटुभार्यः ईतः किं अकेशभार्यः मानिनीवक्तव्ये सुकेशमानिनी जातेश्च न पुंवत् शू
द्राभार्यः संख्ययाऽव्ययासन्नादूराधिकसंख्याः संख्येये संख्येयार्थया संख्ययाऽव्ययादयः
समस्यंते स बहुव्रीहिः बहुव्रीहौ संख्येये डजबहुगणात् संख्येये यो बहुव्रीहिस्तस्माड् १५४

यस्मात् समासांतः दशानां समीपे ये संति ते उपदशाः नवएकादश वेत्यर्थः संख्ययाव्ययासन्नदूरष—
वाच्यः निर्गतानि त्रिंशतो निस्त्रिंशानि वर्षाणि चैत्र— निर्गतस्त्रिंशतोंगुलिभ्यो निस्त्रिंशतोंगु
लिभ्यो निस्त्रिंशः खड्गः अबहुगणात्किं उपबहवः उपगणाः तिविंशतेर्डिति विंशतेर्भस्य
तिशब्दस्य लोपो डिति आसन्नविंशाः अदूरत्रिंशाः अधिकचत्वारिंशाः द्वौ वा त्रयो वा द्वित्राः
दिङ्नामान्यन्तराले दिशां नामान्यन्तराले वाच्ये प्राग्वत् दक्षिणस्याः पूर्वस्याश्च दिशोन्तराले दक्षि
णपूर्वा तत्र तेनेदमिति सरूपे सप्तम्यन्ते ग्रहणविषये सरूपपदे तृतीयान्ते च प्रहरणविषये उ
द्दत्युद्धमित्यर्थे समस्यते कर्मव्यतिहारे द्योत्ये स बहुव्रीहिः अन्येषामपि दृश्यते इचि कर्मव्यति
हारे बहुव्रीहौ पूर्वपदांतस्य दीर्घः केशेषु २ गृहीत्वा इदं युद्धं प्रवृत्तं केशाकेशि दंडैर्दंडैश्च प्रह

त्येवंयुद्धंप्रवृत्तंदंडादंडि मुष्टीमुष्टि तेनसहेतितुल्ययोगे तुल्ययोगेवर्त्तमानेसहेत्येतत् तृतीया
तेनप्राग्वत् वोपसर्जनस्य बहुव्रीहेरवयवस्यसहस्यसः स्याद्वा पुत्रेणसहसपुत्रः सहपुत्रो
वागतः प्रकृत्याशिषि सहशब्दः प्रकृत्यास्यादाशिषि स्वस्तिराज्ञे सहपुत्राय सहामात्या
य अगोवत्सहलेष्वितिवक्तव्यम् सगवे सवत्साय सहलाय बहुव्रीहौसक्थ्यक्ष्णोः
स्वांगात्षच् स्वांगवाचिसक्थ्यक्ष्यंताद्बहुव्रीहेःषच् दीर्घसक्थः जलजाक्षी स्वांगात्किं दी
र्घसक्थिशकटं स्थूलाक्षावेणुयष्टिः अक्ष्णोऽदर्शनादितिवक्ष्यमाणोच द्वित्रिभ्यांषमूर्द्धः
द्विमूर्द्धः त्रिमूर्द्धः अंतर्बहिर्भ्यांचलोम्नः अप्स्यात् अंतर्लोमः बहिर्लोमः पादस्यलोपोऽह
स्त्यादिभ्यः हस्त्यादिवर्जितादुपमानात्परस्यपादस्यलोपः व्याघ्रस्येवपादावस्यव्याघ्रपात्

अहस्त्यादिभ्यः किं हस्तिपादः कुसूलपादः संख्यासुपूर्वस्य पादस्य लोपः द्विपात् सुपात्
उद्विभ्यां काकुदस्य लोपः उत्काकुत् विकाकुत् पूर्णाद्विभाषा पूर्णकाकुदः सुहृद्दुर्हृ
दौ मित्रामित्रयोः सुदुर्भ्यां हृदयस्य हृद्भावो निपात्यते सुहृन्मित्रं दुर्हृदमित्रः नेतुर्नक्षत्रे अ
ब्वक्तव्यः मृगो नेता यासां ता रात्रीणां ताः मृगनेत्रा रात्रयः पुष्यनेत्रा अञ्नासिकायाः संज्ञायां
नसं चास्थूलात् नासिकान्ताद्बहुव्रीहेरच् नासिकाशब्दस्य नसं प्राप्नोति न स्थूलपूर्वपदा
त् संज्ञायाम् गः पूर्वपदस्थान्निमित्तान्नस्य णः स्यात् संज्ञायां न तु गकारव्यवधाने द्रुरिव
नासिका यस्य द्रुणसः खुरखराभ्यां वा नस् खुरणाः खरणाः पक्षे अजपीष्यते खुरणसः
अस्थूलात्किं स्थूलनासिकः खरणसः उपसर्गाच्च उन्नसः वेर्ग्रो वक्तव्यः विगता नासिका यस्य विग्रः ख्यश्च विख्यः न

नञ्दुःसुभ्योहलिसक्थ्योरन्यतरस्यां अहल् अहलः अहलिः असक्थः असक्थिः एवंदुःसुभ्यां
शक्त्योरितिपाठांतरम् अशक्तः अशक्तिः नित्यमसिच्प्रजामेधयोः नञ्दुःसुभ्यएवअप्रजाः
दुःप्रजाः सुप्रजाः अमेधाः दुर्मेधाः सुमेधाः धर्मादनिचकेवलात् केवलात् पूर्वपदाद्योध
र्मशब्दस्तदंताद्बहुव्रीहेरनिच् कल्याणधर्मा केवलात् किंपरमः स्वोधर्मोयस्येतित्रिपदेव
हुव्रीहौमाभूत् इच्कर्मव्यतिहारे केशाकेशि मुशलामुशलि प्रसंभ्यांजानुनोर्ज्ञुः प्रज्ञुः
संज्ञुः ऊर्ध्वाद्विभाषा ऊर्ध्वज्ञुः ऊर्ध्वजानुः धनुषश्च धनुरंतस्यबहुव्रीहेरनङादेशः शार्ङ्गध
न्वा वासंज्ञायां शतधन्वा शतधनुः जायायानिङ् जायांतस्यबहुव्रीहेर्निङादेशः लोपोव्यो
र्वलि युवतिर्जायायस्ययुवजानिः गंधस्येदुत्पूतिसुसुरभिभ्यः उद्गंधिः पूतिगंधिः सुगंधिः सु

रभिगंधिः उपमानाच्च पद्मस्येवगंधोयस्यपद्मगंधिः वयसिदंतस्यदतृ संख्यासुपूर्वस्यैव द्विद
न् चतुर्दन् सुदन् अग्रांतशुद्धशुभ्रवृषवराहेभ्यश्च वा कुड्मलाग्रदंतः कुड्मलाग्रदन् उरःप्रभ
तिभ्यः कप् व्यूढोरस्कः प्रियसर्पिष्कः अर्थान्नञः अनर्थकं नञः किं अपार्थकं इनः स्त्रियां
इन्नंताद्बहुव्रीहेः कप् बहुदंडिकानगरी अनिनस्मन्ग्रहणान्यर्थवताचानर्थकेन च तदंतविधि
प्रयोजयंति बहुवाग्मिका शेषाद्विभाषा अनुक्तसमासांताच्छेषाधिकारस्थाद्बहुव्रीहेः कब्वा
महायशस्कः महायशाः अनुक्तेत्यादि किं व्याघ्रपात् आपोन्यतरस्यां कपि ह्रस्वः बहुमालकः
न संज्ञायां शेषादिति प्राप्तः कप् न विश्वेदेवा अस्य विश्वदेवः ईयसश्च ईयसंतोत्तरपदान्न कप्
न बहुः श्रेयांसोस्य बहुश्रेयान् गोस्त्रीति प्राप्ते ईयसो बहुव्रीहेर्नेति वाच्यं बहुश्रेयसी बहुव्रीहेः किं

म. सि.
कौ.
१५७
157

अतिश्रेयसि वेदितेभ्रातः पूजार्थंभ्रात्रेनान्तकप् प्रशस्तोभ्राताअस्यप्रशस्तभ्राता सभ्राता वेदिते
किं मूर्खभ्रातृकः सर्वनामसंख्ययोः बहुव्रीहौपूर्वनिपातः सर्वश्वेतः द्विशुक्लः संख्यायाःअल्पी
यस्याः द्वित्राःद्वंद्वेच द्वादश वाप्रियस्य गडुप्रियः प्रियगडुः गड्वादेःपरासप्तमी गडुकंठः क्वचि
न्न वहेगडुः निष्ठांते बहुव्रीहौपूर्वंस्यात् कृतकृत्यः जातिकालसुखादिभ्यःपरानिष्ठा सारंगजग्धी
मासजातः सुखजातः वाहिताग्न्यादिषु आहिताग्निः अग्न्याहितः आकृतिगणोयं इतिबहु
व्रीहि ॥ चार्थेद्वंद्वः अनेकं सुबंतं चार्थेवर्तमानंवासमस्यते सद्वंद्वःसमुच्चयान्वाचयेतरे
तरयोगसमाहाराश्चार्थाः तत्रेश्वरंगुरुंचभजस्वेतिपरस्परनिरपेक्षस्यानेकस्यैकस्मिन्नन्वयः
समुच्चयः भिक्षामटगांचानयेति अन्यतरस्यानुषंगिकत्वेन्वाचयः अनयोरसामर्थ्यात्समा १५७

सेन धवखदिरौ छिंधीति मिलितानामन्वयः उतरेतरयोगः संज्ञापरिभाषं इति समाहारः
राजदंतादिषु परं पूर्वप्रयोगार्हं परं स्यात् दंतानां राजा राजदंतः धर्मादिष्वनियमः अ
र्थधर्मौ धर्मार्थौ दंपती जंपती जायापती जायायाः शब्दस्य जंभावो दंभावश्च वा निपात्य
ते आकृतिगणोयं द्वंद्वे घि पूर्वं स्यात् हरिहरौ अजाद्यदंतं ईशकृष्णौ अल्पाच्तरं शिवके
शवौ ऋतुनक्षत्राणां समानाक्षराणामानुपूर्व्येण हेमंतशिशिरवसंताः कृतिकारोहिण्यौ
समानाक्षराणां किं ग्रीष्मवसंतौ लघ्वक्षरं पूर्वं कुशकाशं अभ्यर्हितं च तापसपर्वतौ व
र्णानामानुपूर्व्येण ब्राह्मणक्षत्रियविट्शूद्राः भ्रातुर्ज्यायसः युधिष्ठिरार्जुनौ द्वंद्वश्च प्रा
णितूर्यसेनांगानां एषां द्वंद्व एकवत् पाणिपादं मार्दंगिकपाणविकं रथिकाश्वारोहं

अध्ययनतोविप्रकृष्टाख्यानां अध्ययनेनप्रत्यासन्नाख्यायेषांद्वंद्वएकवत् पदक्रमकं जाति
रप्राणिनां प्राणिवर्जजातिवाचिनांद्वंद्वएकवत् धानाशष्कुलि प्राणिनांतु विट्शूद्राः वि
शिष्टलिंगोनदीदेशोग्रामाः ग्रामवर्जनदीदेशवाचिनांभिन्नलिंगानांद्वंद्वएकवत् उध्य
श्चइरावतीचउध्येरावति गंगाशोणं कुरवश्चकुरुक्षेत्रंचकुरुकुरुक्षेत्रं क्षुद्रजंतवः एषांद्वं
द्वएकवत् यूकालिक्षं आनकुलात्क्षुद्रजंतवः येषांचविरोधःशाश्वतिकः प्राग्वत् अ
हिनकुलं गोव्याघ्रं काकोलूकमित्यादौ परत्वाद्विभाषावृक्षेतिप्राप्तेचकारेणबाध्यते
शूद्राणामनिरवसितानां अवहिष्कृतानांशूद्राणांद्वंद्वःप्राग्वत् तक्षायस्कारं ग्रामाद्ब
हिष्कृतानांचांडालमृतपाः गवाश्वप्रभृतीनिच यथोच्चारितानिसाधूनि दासीदासमि

स्मादि विभाषावृक्षमृगतृणधान्यव्यंजनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणां वृक्षा
दीनांसप्तानांद्वंद्वः अश्ववडवेत्यादि द्वंद्वत्रयंचप्राग्वत्तथा वृक्षादौविशेषाणामेवग्रहणं
प्लक्षन्यग्रोधं प्लक्षन्यग्रोधाः रुरुपृषतं रुरुपृषताः कुशकाशं कुशकाशाः व्रीहियवं
व्रीहियवाः दधिघृते दधिघृते गोमहिषं गोमहिषाः शुकबकं शुकबकाः अश्ववड
वं अश्ववडवौ पूर्वापरं पूर्वापरे अधरोत्तरं अधरोत्तरं अधरोत्तरे फलसेनावनस्पति
मृगशकुनिक्षुद्रजंतुधान्यतृणानां बहुप्रकृतिरेवद्वंद्व एकवदितिवाच्यं बदराणिचा
मलकानिचबदरामलकं नेकद्विप्रकृतौतुबदरामलके रथिकाश्वारोहावित्यादि नद
धिपयआदीनि नएकवत् दधिपयसी इध्माबर्हिषी निपातनाद्दीर्घः ऋक्सामे

म॰ सि॰
कौ॰
१५९
159

वाय्वनसे आनङ्ऋतो द्वंद्वे विद्यायोनिसंबंधिवाचिनामृदंतानां आनङ् स्यात् उत्तरपदे
परे होतापोतारौ मातापितरौ पुत्रेत्य नुवृत्तेः पितापुत्रौ देवताद्वंद्वे च उभयोत्तरपदे परे
आनङ् मित्रावरुणौ वायोः शब्दप्रयोगः प्रतिषेधः अग्निवायू वाय्वग्नी ईदग्नेः सोम
वरुणयोः देवताद्वंद्वे इत्येव अग्नि‍स्तुत्सोमसोमाः अग्नेः परेषां पषोसस्य षः स्यात् समा
से अग्निष्टुत् अग्निष्टोमः अग्नीषोमौ अग्नीवरुणौ इद्वृद्धौ वृद्धिमत्युत्तरपदे अग्नेरि
द्वादेशो देवताद्वंद्वे अग्नीमरुतौ देवतेअस्य आग्निमारुतं कर्म अग्नीवरुणौ देवते अ
स्य आग्निवारुणं देवताद्वंद्वे च इत्युभयपदवृद्धिः अलौकिके वाक्ये आनङ् मित्वेव
वाधित्वात् वृद्धौ किं अग्नेन्द्रः नेन्द्रस्य परस्येत्युत्तरपदवृद्धिप्रतिषेधः विष्णोन आग्ना १५९

वैश्वं दिवोद्यावा देवताद्वंद्वे उत्तरपदे द्यावाभूमी मातरपितरौ उदीचां उदीचांकिं
मातापितरौ द्वंद्वाच्चुदषहांतात्समाहारे चवर्गांतात् दषहांताच्च द्वंद्वात् टच् समाहारे वा
क्त्वचं त्वक्स्रजं शमीदृषदं वाक्त्विषं छत्रोपानहं समाहारेकिं प्रावृट्शरदौ इ
तिद्वंद्वः अथैकशेषः सरूपाणां विरूपाणामपि समानार्थानां वक्रदंडश्च कुटिल
दंडश्च वक्रदंडौ कुटिलदंडौ वृद्धोयूनातल्लक्षणश्चेदेवविशेषः यूनासहोक्तौ गोत्रंशि
ष्यते गोत्रयुवप्रत्ययमात्रकृतं चेत्तयोः कृत्स्नं वैरूप्यं स्यात् गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ
वृद्धः किं गर्गगार्ग्यायणौ यूनाकिं गर्गगार्ग्यौ कृत्स्नं किं गार्ग्यवात्स्यायनौ स्त्रीपुंव
च्च यूनासहोक्तौ वृद्धास्त्री शिष्यते तदर्थश्च पुंवत् गार्गीच गार्ग्यायणौचगार्ग्याः पुमान्स्त्रि

म॰ सि॰ कौ॰ १९ 160

याः स्त्रियाः सहोक्तौ पुमान् शिष्यते तल्लक्षण एव विशेषश्चेत् हंसी च हंसश्च हंसौ भ्रा

भ्रातृपुत्रौ स्वसृदुहितृभ्यां भ्राता च स्वसा च भ्रातरौ पुत्रश्च दुहिता च पुत्रौ नपुंस

कमनपुंसकेनैकवच्चास्यान्यतरस्याम् अक्लीबेन सहोक्तौ क्लीबं शिष्यते तच्च वा ए

कवत्स्यात्तल्लक्षण एव विशेषश्चेत् शुक्लः पटः शुक्ला पटी शुक्लं वस्त्रं तदिदं शु

क्लं तानीमानि शुक्लानि पिता मात्रा मात्रा सहोक्तौ पिता वा शिष्यते माता च पि

ता च पितरौ माता च पिता च पितरौ श्वशुरः श्वश्र्वा श्वश्र्वा सहोक्तौ श्वशुरो वा शि

ष्यते श्वशुरौ श्वश्रूश्वशुरौ त्यदादीनि सर्वैर्नित्यम् सर्वैः सहोक्तौ त्यदादीनि नित्यं शिष्य

न्ते स च देवदत्तश्च तौ त्यदादीनां मिथः सहोक्तौ यत्परं तच्छिष्यते स च यश्च यौ पूर्व १९

शेषापिसंहृष्यपनश्चनिभाषं सचयस्मिन्नौ सदादितः शेषेपुंनपुंसकतो लिंगवचनानि
सदादीनांशेषेसहविवक्षितेषुयःपुमान्यस्मिन्नपुंसकंतद्दोनलिंगप्रतिपादकानि
भवेति सचदेवदत्तस्मिन्नौ तञ्चदेवदत्ताचयज्ञदत्ताचयज्ञदत्ताचतानि ग्राम्यपशुसं
घेष्वतरुणेषुस्त्री पशुसहविवक्षायांस्त्रीशिष्यते गावइमाः ग्राम्येतिकिंरुरवइमे
पशुग्रहणंकिंब्राह्मणाः संघेषुकिं एतौगावौ अतरुणेषुकिं वत्साइमे अनेक
शफेष्वितिवाच्यम अश्वाइमे इतिएकशेषः उरकारव्यूः पद्यामानदे उरगाद्ये
नस्ससमासस्यअप्रत्ययोंतावयवः अतेयापूत्तदंतस्यनअर्हचः अन्तच वह्वचोव
ध्येतयेव नेह अन्तक्साम वह्वर्कसूक्तं विष्णोःपूः विल्लपुरं विमलापंसरः ह्येतरू

म॰ सि॰ कौ॰ १६१
161

पसर्गेभ्योप ईत् द्वीपं अंतरीपं प्रतीपं अवर्णांताद्वा प्रेपं प्रापं परेपं परापं ऊदनोर्दे
शे अनूपो देशः राजधुरा अक्षेव अक्षधूः दृढधूरक्षः सखिपथः रम्यपथो देशः
अच् प्रत्यन्ववपूर्वात्सामलोम्नः एतत्पूर्वात्सामलोमांतात्समासांतादच्स्यात् प्रतिसामं
अनुसामं अवसामं प्रतिलोमं अनुलोमं कृष्णोदक्पांडुसंख्यापूर्वाया भूमेरजिष्यते
कृष्णभूमः उदग्भूमः पांडुभूमः द्विभूमः त्रिभूमः प्रासादः संख्याया नदीगोदावरीभ्यां
च पंचनदं सप्तगोदावरं अजिति योगविभागादन्यत्रापि पद्मनाभः अक्ष्णोऽदर्शना
त् अचक्षुःपर्यायादक्ष्णोऽच् स्यात् समासांतः गवामक्षीव गवाक्षः अचतुरविचतुरसुच
तुरस्त्रीपुंसधेन्वनडुहृक्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिं १६१

दिवाहर्दिवसरजसनिश्श्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोप
शुनगोष्ठश्वाः अचेतापंचविंशतिर्निपात्यंते अपाभ्यांचतुरोऽजिष्यते त्रिचतुर्णांसमीपे
उपचतुराः ब्रह्महस्तिभ्यांवर्चसः अच् हस्तिवर्चसं ब्रह्मवर्चसं पल्यराजभ्यांचेतिवक्तव्यं
पल्यवर्चसं राजवर्चसं अवसमंधेभ्यस्तमसः अवतमसं संतमसं अंधतमसं अन्ववतप्ताद्र
हसः अनुरहसं अवरहसं तप्तरहसं प्रतेरुरसः सप्तमीस्थात् उरसः प्रतिप्रत्युरसं अनु
गवमायामे एतन्निपात्यतेदीर्घत्वे अनुगवंयानं घसचायामे इतिसमास ॥ ः ॥ उपस
र्गादध्वनः प्रगतोऽध्वानंप्राध्वोरथः नपूजनात् पूजनार्थात्परेभ्यःसमासांतानस्युः सु
राजा अतिराजा स्वतिभ्यामेव नेह परमराजः किमःक्षेपे कुत्सितोराजा किंराजा किं

म॰सि॰
कौ॰
१६२
162

संख्या किंगोः नञस्तत्पुरुषात् अराजा नत्पुरुषात्किं अपुरंशकटं पथोविभाषाअ
पथं अपंथाः नत्पुरुषादित्येव अपथोदेशः इतिसमासांताः अलुगुत्तरपदे इत्य
धि— ओजःसहोंभस्तमसस्तृतीयायाः अलुक् ओजसाकृतं इत्यादि अंजसउप
संख्यानम् अंजसाकृतं आत्मनश्चतृतीयाया अलुक् पूरणार्थे इति वक्तव्यम् पूर
णप्रत्ययांतेउत्तरपदेइत्यर्थः आत्मनापंचमः पूरणेकिं आत्मकृतं वैयाकरणा-
ख्यायांचतुर्थ्याः आत्मनश्चेव आत्मनेपदं आत्मनेभाषाः परस्यच परस्मैप
दं परस्मैभाषा हलदंतेतिडेरलुक् त्वचिसारः गवियुधिभ्यांस्थिरःसस्याः गवि
ष्ठिरः युधिष्ठिरः अरण्येतिलकः अत्रसंज्ञायामितिसप्तमीसमासः हृद्युभ्यांच १६२

हृदिस्पृक् दिविस्पृक् मध्याद्गुरौ मध्येगुरुः अंताच्च अंतेगुरुः अमूर्द्धमस्तकात्स्वांगादः
कामे कंठेकालः उरसिलोमा अमूर्द्धमस्तकात्स्वांगात्किं मूर्द्धशिखः मस्तकशिखः
अकामेकिं मुखेकामः तत्पुरुषेकृतिबहुलं स्तंबेरमः कर्णेजपः शयवासवासि
ष्वकालात् वालुक् खेशयः खशयः ग्रामेवासः ग्रामवासः ग्रामेवासी ग्रामवासी
षष्ठ्या आक्रोशे चौरस्यकुलं आक्रोशेकिं ब्राह्मणकुलं वाग्दिक्पश्यद्भ्योयुक्तिदंडह
रेषु षष्ठ्या अलुक् वाचोयुक्तिः दिशोदंडः पश्यतोहरः आमुष्यायणामुष्यपुत्रिकामु
ष्यकुलिकेति देवानांप्रियइतिच मूर्खेअन्यत्रदेवप्रियः शेपपुच्छलांगूलेषुशुनः शुनः
शेपः शुनःपुच्छः शुनोलांगूलः दिवश्चदासे दिवोदासः ऋतोविद्यायोनिसंबंधे

भ्यः होतुरंतेवासी होतुःपुत्रः पितुरंतेवासी विभाषास्वसृपत्योः ऋदंतात्षष्ठ्याअलुक्
वा स्वसृपत्योर्मातृपितृभ्यामन्यतरस्यां स्वसुःसस्यषःस्यात्समासे मातुःष्वसा मातुः
स्वसा पितुःष्वसा पितुःस्वसा ननांदुःपतिः ननांदृपतिः लुक्पक्षेतु मातृपितृभ्यां
स्वसा स्वसुःसस्यषःस्यात्समासे इत्यलुक्समासः ॥ घरूपकल्पचेलड्ब्रुवगोत्र
मतहतेषुङ्योनेकाचोह्रस्वः भाषितपुंस्काद्योङीप् तदंतस्यानेकाचोह्रस्वः घरूप
कल्पप्रत्ययेषु चेलडादिषु चोत्तरपदेषु ब्राह्मणितमा इत्यादि नद्याःशेषस्यान्यतर
स्यां ङ्यंतनद्याःङ्यंतैकाचस्तरबादिषु ह्रस्वोवा ब्रह्मबधूतरा ब्रह्मबंधुतरा स्त्रीतरा
स्त्रितरा कृन्नद्यान लक्ष्मीतरा उगितश्च विदुषीतरा ह्रस्वाभावपक्षेपुंवत् विद्वत्तरा १६३

पादस्य पदाज्यातिगोपहतेषु पादाभ्यामजतीति पदाजिः पदातिः अजतिभ्यां पादे चेति
णप्रत्ययः पदगः पदोपहतः पद्यत्यतदर्थे पादस्य पद तदर्थे यति पादौ विध्यन्ति पद्याः
विध्यत्यधनुषेति समासः यत् अतदर्थे किं पादार्थमुदकं पाद्यं पादार्घाभ्यां चेति यत्
उदकस्योदः संज्ञायाम् उदमेघः उत्तरपदस्य चेति वक्तव्यम् क्षीरोदः पेषंवासवाहन
धिषु च उदपेषं पिनष्टि उदवासः उदवाहनः उदधिर्घटः एकहलादौ पूरयितव्येऽन्य
तरस्यां उदकुम्भः उदककुम्भः एकेति किं उदकस्थाली पूरयितव्येति किं उदकपर्व
तः मन्थौदनसक्तुबिन्दुवज्रभारहारवीवधगाहेषु च उदमन्थः उदकमन्थः उदौदनः
उदकौदनः इको ह्रस्वोऽङ्यो गालवस्य इगन्तस्याङ्यन्तस्य ह्रस्वो वा उत्तरपदे ग्रामणिपुत्रः

द्रकः किं रमापतिः अज्ञः किं गौरीपतिः ष्यङः संप्रसारणं पुत्रपत्योस्तत्पुरुषे ष्यङंतस्य पूर्व
पदस्य संप्रसारणं पुत्रपत्योः परतः संप्रसारणस्य दीर्घः स्यादुत्तरपदे कौमुदगंध्यायाः
पुत्रः कौमुदगंधीपुत्रः कौमुदगंधीपतिः इष्टकेषीकामालानां चिततूलभारिषु इष्ट
कादीनां तदंतानां च चितादिषु ह्रस्वः स्यात् इष्टकचितं पक्वेष्टकचितं इषीकतूलं माल
भारी उत्पलमालभारी ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोव
चनबंधुषु समानस्य सः सज्योतिरित्यादि तीर्थे ये यादौ विवक्षिते समानस्य सः सतीर्थ्य
एकगुरुकः समानतीर्थे वसतीति यत्प्रत्ययः विभाषोदरे सोदर्यः समानोदर्यः दृग्दृ
शवतुषु सदृक् सदृशः दृक्षे चेति वक्तव्यम् सदृक्षः इदंकिमोरीश्की दृग्दृशवतुषु

षु ईदृक् ईदृशः कीदृक् कीदृशः दृक्षे च कीदृक्षः ईदृक्षः अषष्ठ्यतृतीयास्थस्यान्यस्य दुगा
शीराशास्थास्थितोत्सुकोतिकारकरागछेषु अन्यदाशी अन्यदाशा अन्यदास्था अन्य
दास्थितः अन्यदुत्सुकः अन्यदूतिः अन्यद्रागः अषष्ठ्यादिकिं अन्यस्यान्येनवाशीः
अन्याशीः कारकेछेचनार्थेनिषेधः अन्यस्यकारकोन्यकारकः अन्यस्यायमन्यदीयः
अर्थेविभाषा अन्यदर्थः कोःकत्तत्पुरुषेचि अजादावुत्तरपदे कुत्सितोश्वः कदश्वः क
दन्नं कदुष्णं तत्पुरुषेकिं कूष्ट्रोराजा त्रौच कत्त्रयः रथवदयोश्च कद्रथः कद्वदः तृणे
चजातौ कत्तृणं कापथ्यक्षयोः कापथं काक्षः ईषदर्थे काजलं विभाषापुरुषे कुपु
रुषः कापुरुषः कवंचोष्णे चात्का कोष्णं कवोष्णं कदुष्णं पृषोदरादीनियथोपदिष्टं

म॰सि॰
कौ॰
१६५
165

पृषदरं पृषोदरं तलोपः वारिवाहकोवलाहकः पूर्वपदस्यवः उत्तरपदादेश्चलत्वं भवेद्वर्णा

गमाद्धंसः सिंहोवर्णविपर्ययात् गूढोत्मावर्णविकृतेवर्णनाशात्पृषोदरं मतौवह्वचोनज

रादीनांदीर्घःस्यात् अमरावती अनजिरादीनांकिं अजरवती संज्ञायामित्येव नेह वल

यवती वह्वचःकिं व्रीहिमती शरादीनांच शरावती वले वलप्रत्ययेपूर्वस्यदीर्घःस्यात्

कृषीवलः उपसर्गस्यघञ्यमनुष्ये वहुलं परिपाकः परीपाकः अमनुष्येकिं निषा

दः नरेसंज्ञायां विश्वानरः मित्रेचर्षौ विश्वामित्रः घ्नुनोदंतदंष्ट्राकर्णाग्रंदवराहपु

च्छपदेषुदीर्घोवाच्यः स्यादंतः प्रतिरंतः शरेत्वसत्ताम्रकार्ष्णखदिरपीयूक्षाभ्योसंज्ञाया

मपिएभ्योवनस्यणत्वं प्रवणं विभाषौषधिवनस्पतिभ्यां दूर्वावणं शिरीषवणं शिरी

१६५

षवने हारस्मज पाभेव नेह देवदारुवने इरिकादिभ्यो वा इरिकावनं इरिकावणं वाहन
माहितात् आरोष्यवस्तुद्यतेतद्वाचिस्थान्निमित्ताद्वाहननस्य णः इक्षुवाहणं पानंदेशेपूर्व
पदस्थान्निमित्तात्परस्य णः क्षीरपानेयेषांते क्षीरपाणाः उशीनराः सुरापाणाः प्राच्याः वाभाव
करणयोः क्षीरपाने क्षीरपाणं प्रातिपदिकान्तनुमविभक्तिषु पूर्वपदस्थान्निमित्तात्प
रस्यपश्चस्थितनस्यनस्यणोवा माषवापिणौ व्रीहिवापाणि माषवापेण पक्षेमाषवापिना
वित्यादि कुमति च कवर्गवत्युत्तरपदेप्राग्वत् हरिकामिणौ हरिकामाणि हरिकामेण
पदव्यवायेपिणत्वेन माषकुंभवापेन अन्तर्हितइति आर्द्रगोमयेण शुष्कगोमये
ण पारस्करप्रभृतीनिचसंज्ञायाम् एतानिससुट्कानिनिपात्यन्ते पारस्करः किष्किंधा

म॰सि॰
कौ॰
१६६
166

तद्बृहतोः करपत्योश्चौरदेवतयोः सुट्तलोपश्च नात्पूर्वं चतेन दकारोपि विधेयः तद्बृहतो
र्दकारस्य तकारो लुप्यते करपत्योः सुट् चौरदेवतयोरिति समुदायोपाधिः तस्करः बृ
हस्पतिः प्रायस्य चित्तिः चित्तयोः प्रायश्चित्तिः प्रायश्चित्तं वनस्पतिरित्यादि आकृति
गणोयं इति लघुसमासप्रक्रिया श्रीरत्नचंद्रभक्तयत्नेनात्र समदिग्वह्निसागराः वेदसि
द्धिशिवादित्याद्यातचंद्रः प्रकीर्तितः १ समर्थानां प्रथमाद्वा इदं पदत्रयमधिक्रियते प्रा
ग्दिशः इति यावत् प्राग्दीव्यतोऽण् तेन दीव्यतीत्यतः प्रागणधिक्रियते अश्वपत्यादिभ्य
श्च पभ्योऽणास्यात् प्राग्दीव्यतीयेष्वर्थेषु अश्वपतेरपत्यादि तद्धितेष्वचामादेरिति
वृद्धिः आश्वपतं गाणपतं दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः प्राग्दीव्यतीयेष्वर्थेषु १६६

दितेरपत्यादित्यैः अदितेरादित्यस्यवाआदित्यः यणोमयोदेवाद्ये मयडितिपंचमी य
णइतिषष्ठी पत्येयस्यहितेहलोयमांयमिलोपोवास्यात् इतिअसतिलोपे दित्वेचस
ति त्रियंरूपं असतिलोपे हित्वलोपयो वी हियं हित्वभावेचलोपेसतिपक्षयं प्राजा
पत्यः पृथिव्याञाञौ पार्थिवा पार्थिवी देवायञञौ दैव्यं दैवं बहिषष्टिलोपोयञ्च
वाह्यः ईकक्चितिचतद्धिते अचामादेरचोवृद्धिः वाहीकः गोरजादिप्रसंगेयत् गोर
पत्यादिगव्यं उत्सादिभ्योऽञ् औत्सः इत्यपत्यादिविकारांतार्थाः साधारणाः प्रत्ययाः
स्त्रीपुंसाभ्यांनञ्स्नञौभवनात् धान्यानांभवने इत्यतः प्रागर्थेष्वाभ्यामेतौस्तः स्त्रैणः
पौंस्नः तस्यापत्यं षष्ठ्यंतात्कृतसंधेः समर्थादपत्येर्थेउक्ताः वक्ष्यमाणाश्चप्रत्ययावास्युः

ओर्गुणः उवर्णांतस्याभस्यगुणःस्यात्तद्धिते औपगोरितिवक्तव्येगुणोक्तिः संज्ञापूर्वकोविधिरनि
त्यइतिज्ञापयितुं नेह स्वायंभुवमित्यादिसिद्धिः उपगोरपत्यमौपगवः आश्वपतः दैत्यः औ
त्सः स्त्रैणः पौंस्नः अपत्यंपौत्रप्रभृतिगोत्रं अपत्यत्वेनविवक्षितंपौत्रादिगोत्रसंज्ञंस्यात्
एकोगोत्रे गोत्रेएकएवप्रत्ययःस्यात् उपगोर्गोत्रापत्यमौपगवः गर्गादिभ्योयञ् गोत्रा
पत्ये गर्गस्यगोत्रापत्यंगार्ग्यः वात्स्यः यञञोश्चगोत्रे यद्यञंतमञंतंचतदवयवयोर्लु
क् तत्कृतेबहुत्वेनतुस्त्रियां गर्गाः वत्साः गोत्रेऽलुगचि अजादौ प्राग्दीव्यतीयेविवक्षि
तेगोत्रप्रत्ययस्यालुक्स्यात् गर्गाणांछात्राः वक्ष्यमाणोवृद्धाच्छः अपत्यस्यतद्धितेना॰
तिहलःपरस्यापत्ययस्यलोपस्तद्धितेनत्वाकारे गार्गीयाः प्राग्दीव्यतः किं गर्गेभ्यःहिते

गार्गीयं अविकिं गर्गेभ्य आगतं रूप्यं जीवति तु वंश्ये युवा वंश्ये पित्रादौ जीवति पौत्रादेर्यदप
त्यं चतुर्थादि तद्युवसंज्ञं स्यात् गोत्राद्यून्यस्त्रियां यून्यपत्ये विवक्षिते गोत्रप्रत्ययान्तादेव प्र
त्ययः स्यात् स्त्रियां न युवसंज्ञा यञिञोश्च गोत्रे यौ यञिञौ तदन्तात् फक् आयनेयीनी
यियः फढखछघां प्रत्ययादीनां प्रत्यादेः फ स्य आयन् ढ स्य एय् ख स्य ईन् छ स्य ईय् घ स्य इय्
स्युः गार्ग्यस्य युवापत्यं गार्ग्यायणः अत इञ् अपत्येऽर्थे दाक्षिः बाह्वादिभ्यश्च औडुलो
मी लोम्नोऽपत्येषु बहुष्वकारो वक्तव्यः बाह्वादीञोऽपवादः उडुलोमाः आकृतिगणो
यं अनृष्यानन्तर्ये विदादिभ्योऽञ् ये त्वात्रानृषयस्तेभ्योऽपत्येऽन्यत्र तु गोत्रे विदस्य गो
त्रे वैदः वैदाः पौत्रः पौत्रौ यञञोश्चेति लुक् एते प्रवराध्यायप्रसिद्धे गोत्रे तेनेह न पौत्राः

म॰ सि॰
कौ॰
१६८
168

एवंदौहित्रादयः शिवादिभ्योऽण् अपत्ये शैवः गांगः ऋष्यंधकवृष्णिकुरुभ्यश्च ऋषि
भ्यःवासिष्ठः वैश्वामित्रः अंधकेभ्यःश्वाफल्कः वृष्णिभ्यः वासुदेवः कुरुभ्यः नाकुलः सा
हदेवःमातुरुत्संख्यासंभद्रपूर्वायाः संख्यादिपूर्वस्यमातृशब्दस्यउदादेशःस्यादण्प्रत्ययश्च
द्वैमातुरः षाण्मातुरः भाद्रमातुरः स्त्रीभ्योढक् स्त्रीप्रत्ययांतेभ्योढक् वैनतेयः कन्यायाः
कनीनच चादण् कानीनोव्यासः कर्णश्च राजश्वशुराद्यत् राज्ञोजातावेव येचाभा
वकर्मणोः यादौतद्धितेअन्प्रकृत्यास्यान्नतुभावकर्मणोः राजन्यःजातावेवेतिकिं त्व
न्यत्रत्वणिपरे राजनः श्वाशुर्यः क्षत्राद्घः क्षत्रियः जातावेव क्षात्रिरन्यः रेवत्या
दिभ्यष्ठक् ठस्येकः अंगात्परस्यठस्येकादेशः रैवतिकः गोत्रेकुंजादिभ्यश्च्फञ् ग्ला १६८

तस्मान्नरस्त्रियां यानवा चिभ्यश्च कुञ्जादिभ्य स्वार्थेभ्यः प्रत्ययः स्यात् कौञ्जायन्यः
कौञ्जायन्यौ बहुत्वे लुग्वक्तव्ये व्राध्यायन्यः नडादिभ्यः फक् गोत्रेऽप्येव नाडायनः
चारायणः अनन्तरोनादिः अश्वादिभ्यः फञ् गोत्रे आश्वायनः इतश्चानिञः इ
कारान्ताद्व्द्यचोपत्ये ढक् नतिञन्तात् दौलेयः नैधेयः आत्रेयः आत्रेयौ अत्रि
भृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च एभ्यो गोत्रप्रत्ययस्य तत्कृते बहुत्वे लुक् स्या
त् तस्त्रियां अत्रयः भृगवः कुत्साः वसिष्ठाः गोतमाः अङ्गिरसः शुभ्रादिभ्य
श्च ढक् स्यादपत्ये शौभ्रेयः कल्याण्यादीनामिनङ् स्यात् ढकि काल्याणिनेयः
बान्धकिनेयः कुलटाया वा इनङ् मात्रे विकल्पते ढकि नित्ये पूर्वेणैव कौलटि

म॰सि॰
कौ॰
१६५
169

नेयः कौलटेयः सतीभिक्षुकात्वकुलटा चटकायाऐरक् चटकादितिवाच्यम् प्रातिपदिकग्र
हणेलिंगविशिष्टस्यापिग्रहणमितिसिध्यति चटकस्यचटकायावाअपत्यंचाटकैरः स्त्रियाम
पत्येलुग्वक्तव्यः तयोरेवस्त्र्यपत्यंचटका गोधायाढ्रक् गौधेरः शुभ्रादित्वाड्ढक् गौधेयः क्षु
द्राभ्योवा अंगहीनाः शीलहीनाश्चक्षुद्रास्ताभ्योवाढ्रक् पक्षेढक् काणेरः काणेयः दा
सेरः दासेयः पितृष्वसुश्छण् अणोपवादः पैतृष्वस्रीयः ढकिलोपः पितृष्वसुरन्त्यलोपो
ढकि अतएवज्ञापकाड्ढक् पैतृष्वसेयः मातृष्वसुर्यदुक्तंतदस्यापिस्यात् मातृष्वस्री
यः मातृष्वसेयः कुलात्खः कुलीनः तदंतादपिउत्तरसूत्रेअपूर्वपदादितिलिंगात् आढ्य
कुलीनः अपूर्वपदादन्यतरस्यां यड्ढकञौ कुलादित्येव पक्षेखः कुल्यः कौलेयकः कुली १६५

नः कौलः महाकुलादञ्खञौ वाञ्च्ःप्रत्ययः माहाकुलः माहाकुलीनः दुष्कुलाड्ढक् वा पदे

वः दौष्कुलेयः दुष्कुलीनः स्वसुश्छः स्वस्रीयः भ्रातुर्व्यच्च चाद्धः भ्रातृव्यः भ्रात्रीयः मनोर्जा

तावञ्यतौ षुक्चसमुदायार्थाज्जातिः मानुषः मनुष्यः तद्धितेष्वचामादेः पूर्वपदस्य वाचे पूर्वहन्त्र्युतरा

ग्रामणि पद्यामणि तद्धिते नोऽकारलोपः तद्धिते नाहा। तिकादिभ्यः फिञ् तैकायनिः वृद्धिर्य

स्याचामादिस्तद्वृद्धं यस्य समुदायस्याचां मध्ये आदिरच् वृद्धिसंज्ञस्तस्मात् उदीचां वृद्धादगोत्रा

त् आम्रगुप्तायनिः प्राचामवृद्धात्फिन्बहुलं ग्लुचुकायनिः जनपदशब्दात् क्षत्रियादञ् जनपद

क्षत्रिययोर्वाच्यकादजनपदे पांचालः क्षत्रियसमानशब्दाज्जनपदात्तस्य राजन्यपत्यवत् पंचाला

नां राजा पांचालः पुरोरणवक्तव्यः पौरवः द्व्यच्मगधकलिंगसूरमसादण् द्व्यच् आंगः वांगः

म. सि.
कौ.
१७.
170

मागधी कालिंगः सौरमसः पांड्योर्ड्यण् पांड्यः वृद्धेत्कोशलाजादाञ्ञ्यङ् वृद्धात् आंवष्ठ्यः इत् आवं
त्यः कौशल्यः अजादस्यापत्यं आजाद्यः कुरुनादिभ्यो ण्यः कौरव्यः नैषध्यः तेतद्राजाः अजाद
यस्तद्राजसंज्ञास्युः तद्राजस्य बहुषु तेनैवास्त्रियां बहुष्वर्थेषु तद्राजस्य लुक् तत्कृते बहुत्वे न तु स्त्रि
यां पंचाला इत्यादि कंबोजाल्लुक् तद्राजस्य लुक् कंबोजः कंबोजौ कंबोजादिभ्य इति वक्तव्य
म् चोलः शकः केरलः यवनः अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे गोत्रे यावणिञौ
विहितौ अनार्षौ तदंतयोर्गुरूपोत्तमयोः प्रातिपदिकयोः स्त्रियां ष्यङादेशः कुमुदगंधस्य गो
त्रापत्यं स्त्री कौमुदगंध्या वाराह्या अनार्षयोः किं वाशिष्ठी वैश्वामित्री गुरूपोत्तमयोः किं औ
पगवी गोत्रे किं अहिच्छत्रे जाता आहिच्छात्री इत्यपत्याधिकारः तेन रक्तं रागात् कषायेण र १७.

क्तंवस्त्रंकाषायं माञ्जिष्ठं रागात्किं देवदत्तेनरक्तंवस्त्रं लाक्षारोचनात्ठक् लाक्षिकः रौचनि
कः शकलकर्दमाभ्यामुपसंख्यानं शाकलिकः कार्दमिकः नील्याअन् नील्यारक्तंनीलं पी
तात्कन् पीतकं हरिद्रामहारजनाभ्यामञ् हारिद्रं माहारजनं नक्षत्रेणयुक्तःकालः तिष्य
पुष्ययोर्नक्षत्राणियलोपः पुष्येणयुक्तंपौषमहः लुबविशेषे पूर्वेणविहितस्याणोलुप्
षष्टिदण्डात्मकस्यकालस्यावान्तरविशेषश्चेन्नगम्यते अद्यपुष्यः दृष्टंसमानेनेत्येववसिष्ठेन
दृष्टंवासिष्ठंसामः वामदेवाड्ड्यड्ड्यौ वामदेवेनदृष्टंवामदेव्यं परिवृतोरथः वस्त्रैःपरिवृ
तः वास्त्रोरथः तत्रोद्धृतममत्रेभ्यः शरावेषूद्धृतःशाराव ओदनः संस्कृतंभक्षाः सप्तम्यं
तादणस्यात्संस्कृतेर्थे यत्संस्कृतंभक्षाश्चेत्तेस्युः भ्राष्ट्रेषुसंस्कृताःभ्राष्ट्राःभक्षाः शूलोखा

म·सि·
कौ·
१७१
171

ष्ठन् अणोपवादः शूलेन संस्कृतं शूल्यं मांसं उख्यं दध्नष्ठक् दध्ना संस्कृतं दाधिकं सास्मिन् पौर्ण
मासीति इतिशब्दात् संज्ञायामिति लभ्यते पौषी पौर्णमासी अस्मिन् पौषो मासः सास्य देवता
इन्द्रो देवतास्येन्द्रं हविः पाशुपतं बार्हस्पत्यं त्यज्यमानद्रव्ये उद्देश्यविशेषो देवता मंत्रस्तु
त्याच्च ऐन्द्रो मंत्रः कस्येत् शब्दस्य इकारः स्यात् प्रत्ययसंनियोगेन यस्येति लोपात् परत्वादा
दिवृद्धिः को ब्रह्मा देवतास्य कायं हविः श्रीदेवतास्य श्रायं शुक्रात् घन् शुक्रियं सोमा
ट्ट्यण् सौम्यं वाय्वृतुपित्रुषसो यत् वायव्यं ऋतव्यं रीङृतः अकृद्यकारे सार्वधातुके परे
यकारे च्वौ च ऋतोङ्गस्य रीङादेशः यस्येति च पित्र्यं उषस्यं द्यावाशुनासीर मरुत्वद
ग्नीषोमवास्तोष्पतिगृहमेधाच्छ च चात् यत् द्यावापृथिवीयं शुनासीरीयं शुनासीर्यं १७१

महाराजप्रोष्ठपदाच्चञ् माहाराजिकं प्रौष्ठपदिकं देवताद्वंद्वे च उत्तरपदयोराद्यचोर्वृद्धिर्णितीति

तिकितिच आग्निमारुतं नेंद्रस्यपरस्यसोमेंद्रः परस्यवृद्धिं पैंद्रागनः दीर्घाच्चवरुणस्यनवृद्धिः

देवताद्वंद्वेचेत्यानङ् पेंद्रावरुणाः दीर्घात्किं आग्निवारुणीनङ्घ्रीह्वी पितृव्यमातुलमातामह

पितामहाः एतेनिपात्यंते पितुर्भ्रातापितृव्यः मातुर्भ्रातामातुलः मातुःपितामातामहः

पितुःपिताःपितामहः तस्यसमूहः काकानांसमूहःकाकं भिक्षादिभ्योण भिक्षाणांस

मूहोभैक्षं गर्भिणीनांसमूहोगार्भिणं इहभस्याढेइतिपुंवद्भावेकृते इनण्यनपत्ये इनपत्या

र्थेणिपरेइनप्रकृत्यास्यात् तेननस्तद्धितइतिटिलोपोन युवतीनांसमूहोयौवनं शार्ङ्गरवादञ्

डान्नादेश्च यौवनं गोत्रोक्षोष्ट्रोरभ्रराजन्यराजपुत्रवत्समनुष्याद्वुञ् ग्लुचुकायनीनांसमूहो

म॰ सि॰
कौ॰
१७२
172

ग्लौचुकायनकं औदकमित्यादि अपत्यस्येतियलोपेप्राप्तेप्रकृत्याके राजन्यमनुष्ययुवानः रा
जन्यकं मानुष्यकं वृद्धाच्चेतिवक्ष्यमाणे वार्द्धकं केदाराण्यञ्च चाद्वुञ् केदार्यंकैदारकं गणि
कायायञ्चवक्तव्यः गाणिक्यं ठञ्कवचिनश्च चात्केदारादपि कवचिनांसमूहः कावचिकं
कैदारिकं ग्रामजनबंधुभ्यस्तल् ग्रामता जनता बंधुता तलंतस्त्रियां गजसहायाभ्यांचेति
वक्तव्यम् गजता सहायता अह्नःखः क्रतौ अहीनः अचित्तहस्तिधेनोष्ठक् सुस्तक्तान्तात्
कः इस्उस्उक्तान्तदेतानारस्याठस्यकस्यात् साक्तुकं हास्तिकं धैनुकं केशाश्वाभ्यांयञ्छा
वन्यतरस्यां पदेठगणौ कैश्यं कैशिकं अश्वीयं आश्वं पाशादिभ्योयः पाश्या तृण्या ध
म्या वन्या वात्या खलगोरथात् खल्या गव्या रथ्या इनित्रकट्यचश्च खलादिभ्यः क्रमात्स्युः १७२

खलिनी गोत्रा रथकट्याखलादिभ्यश्चनिर्वक्तव्यः डाकिनी कुटुंबिनी आकृतिगणो
यम् तदस्यां प्रहरणमिति क्रीडायां णः दंडः प्रहरणमस्यां क्रीडायां दांडा मौष्टः घञः सा
स्यां क्रियेति ञः घञंतात्क्रियावाचिनः प्रथमांतादस्यामित्यर्थे स्त्रीलिंगे ञप्रत्ययः श्येन
तिलस्य पाते ञे अनयोर्मुमस्यात् ञप्रत्यये परे पातशब्दे उत्तरपदे श्येनंपाता मृगया तैलं
पाता स्वधा श्येनतिलस्य किं दंडपातोस्यां दंडपाता तिथिः तदधीते तद्वेद न य्वाभ्यां प
दांताभ्यां पूर्वौ तु ताभ्यामैच् पदांताभ्यां य्वाभ्यां परस्य न वृद्धिः किंतु ताभ्यां पूर्वौ क्रमा
दैचावागमौ स्तः व्याकरणमधीते वेत्ति वा वैयाकरणः क्रमादिभ्यो वुन् क्रमकः पदकः
शिक्षकः मीमांसकः क्रतूक्थादिसूत्रांताट्ठक् क्रतुविशेषवाचिनामेवेह ग्रहणं तेभ्यो

म॰सि॰
कौ॰
१७३
173

मुख्योर्थेभ्योवेदितविनत्प्रतिपादकग्रंथपरेभ्यस्तथ्येनदिग्राग्निष्टोमिकः वाजपेयिकः उक्थ
सामविशेषः तल्लक्षणपरोग्रंथविशेषोलक्षणयोक्थ्य तदधीतेवेदवाऔक्थिकः मुख्या
र्थान्नुक्थशब्दाद्गुणेनेष्यते नैयायिकः वार्त्तिकः लौकायतिकः सत्रांतान्ब्रकल्पा
देर्वैष्यते सौग्रहस्सूत्रिका त्रकल्पादेःकिंकाल्पसूत्रः विद्यालक्षणकल्पांताच्चेतिवक्त
व्यम् वायसविद्यिकः गौलक्षणिकः पारासरकल्पिकः अंगक्षत्रधर्मत्रिपूर्वाद्विद्यांता
न्नेतिवक्तव्यम् आंगविद्यः क्षात्रविद्यः धार्मविद्यः त्रिविधाविद्या त्रिविद्यातामधी
तेवेत्तिवात्रैविद्यः तदस्मिन्नस्तीतिदेशेतन्नाम्नि उदुंबरासंतस्मिन् देशे औदुंबरोदे
शः तेननिर्वृत्तं कुशांबेननिर्वृत्ताकौशांबीनगरी तस्यनिवासः शिवानांनिवासोदे १७३

षः शैवः अदूरभवश्च विदिशायाअदूरभवं वैदिशं वुञ्छण्कठजिलसेनिरढञ्ण्यययफ
क्फिञिञ्यञ्कक्ठकोरीहण कृशाश्वर्श्यकुमुदकाशतृणप्रेक्षाश्मसखिसंकाशवलप
क्ष कर्णसुतंगमप्रगदिन्वराहकुमुदादिभ्यः सप्तदशभ्यः सप्तदशक्रमात्स्युः चतुरर्थ्यां अ
रीहणादिभ्यो वुञ् आरीहणकं कृशाश्वादिभ्यश्छण् कार्शाश्वीयः
ऋश्यादिभ्यः कः ऋश्यकं कुमुदादिभ्यः ठच् कुमुदादिभ्यः ठच् कुमुदिकं काशादिभ्य
इलः काशिलः तृणादिभ्यः सः तृणसं प्रेक्षादिभ्य इनिः प्रेक्षी अश्मादिभ्यो रः अ
श्मरः सख्यादिभ्यो ढञ् साखेयं संकाशादिभ्यो ण्यः सांकाश्यं वलादिभ्यो यः वल्यं
पक्षादिभ्यः फक् पाक्षायणः पथः पंथच पांथायनः कर्णादिभ्यः फिञ् कार्णायनिः

सुतंगमादिभ्यइञ् सौतंगमिः प्रगदिनादिभ्योञ्यः प्रागद्यः वराहादिभ्यःकक् वा
राहकः कुमुदादिभ्यष्ठक कौमुदिकः जनपदेलुप् जनपदेवाच्येचातुरर्थिकस्यलुप् लुपि
युक्तवद्व्यक्तिवचने लुपिसतिप्रकृतिवत्लिंगवचनेस्तः पंचालानांनिवासोजनपदः पं
चालाः कुरवः अंगाः वंगाः कलिंगाः वरणादिभ्यश्च अजनपदार्थआरंभः वरणानाम
मदूरभवंनगरंवरणाः आकृतिगणोयं शर्करायावा अस्माच्चातुरर्थिकस्यलुप्स्यात् ठ
कछौच शर्करायाएतौस्तः कुमुदादौवराहादौचपाठ सामर्थ्यात्पक्षेठचकको वाग्रहण
सामर्थ्यात्पक्षेऔत्सर्गिकोणः नतस्यलुब्विकल्पः षड्रूपाणि शर्करा शार्करं शार्करिकं
शार्करीयं शार्करिकं शार्करकः नद्यांमतुप् चातुरर्थिकः इक्षुमती कुमुदनडवेतसेभ्योड्म १७४

त्प्रकयः मतोर्मस्य वः कुमुद्वान् नड्वान् माडुपधायाश्च मतोर्वोयवादिभ्यः मवर्णावर्णान्ता
न्मवर्णावर्णोपधाच्चयवादिवर्जात् परस्य मतोर्मस्य वः वेतस्वान् नडशादाड्वलच् नड्वलः शा
द्वलः शिखाया वलच् शिखावलं नगरं उत्करादिभ्यश्छः उत्करीयः नडादीनां कुक्च न
डकीयं क्रुंचा ह्रस्वत्वं च क्रुंचकीयः तक्षन्नलोपश्च तक्षकीयः इति चातुरर्थिकाः शेषे अपत्या
दिचतुरर्थ्यंतादन्योर्थः शेषस्तत्राणादयः स्युः चक्षुषा गृह्यते चाक्षुषं रूपं श्रावणः शब्दः
औपनिषदः पुरुषः दृषदि पिष्टा दार्षदाः उलूखले क्षुण्णः औलूखलो यावकः अश्वैरुह्य
ते आश्वो रथः चतुर्भिरुह्यते चातुरं शकटं चतुर्दश्यां दृश्यते चातुर्दशो राक्षसः तस्य विकार इ
त्यतः प्राक् शेषाधिकारः राष्ट्रावारपाराद्घखौ आभ्यां घखौ राष्ट्रे जातादिः राष्ट्रियः अवा

म॰सि॰ रपारीणः अवारपाराद्विगृहीतादपि विपरीताच्चेति वक्तव्यम् अवारीणः पारीणः पारावारीणः
कौ॰ इह प्रकृतिविशेषात् घादयः ष्ठ्यल्पान्ताः प्रत्ययाः उच्यन्ते तेषां जातादयोर्थविशेषाः समर्थवि
१७५ 175 भक्तयश्च वक्ष्यन्ते ग्रामाद्यखञौ ग्राम्यः ग्रामीणः नद्यादिभ्यो ढक् नादेयं माहेयं वाराण
सेयं दक्षिणापश्चात्पुरसस्त्यक् दाक्षिणात्यः पाश्चात्यः पौरस्त्यः द्युप्रागपागुदक्प्रतीचो य
त् दिव्यं प्राच्यं अपाच्यं उदीच्यं प्रतीच्यं अव्ययात्त्यप् अमेहक्वतसित्रेभ्य एव अमात्यः इ
हत्यः क्वत्यः ततस्त्यः तत्रत्यः त्यब्नेर्ध्रुव इति वक्तव्यम् नित्यः निसो गते ह्रस्वात्तादौ त
द्धिते ह्रस्वादिणः सस्य षः तादौ तद्धिते निर्गतो वर्णाश्रमेभ्यो निष्ट्यः चण्डालादिः अरण्या
न्मः आरण्याः सुमनसः दूरादेत्यः दूरेत्यः उत्तरादाहञ् औत्तराहः ऐषमोह्यःश्वसोन्य १७५

नरसा पञ्चत्वन्नापदेवदमाणोमुग्रुलो पञ्चमत्वं पञ्चमत्वनेश्वत्वं स्वत्वने ह्यत्व ह्यत्व
ने पदेषोवस्तिकेवत्वने वृद्धाच्छः शालीयः शालायाभवः त्यदादीनिच वृद्धिसंज्ञानिस्युः
तदीयः वानामधेयस्य वृद्धिसंज्ञा देवदत्तीयः देवदत्तः भवतष्ठक्छसो वृद्धाभवतष्ठतो वृत्तः
भावत्कः सितिच तद्धितेपूर्वपदेस्यात् जवत्वे भवदीयः वृद्धादियमनुवृत्तेः शवंतादणोवभा
वतः काश्यादिभ्यष्ठञ्ञिठौ इकारउच्चारणार्थः काशिकी काशिका वैदिकी वैदिका
आपदादिपूर्वपदात्कालोतात् आपदादि आकृतिगणः आपत्कालिकी आपत्कालि
का धन्वयोपधाद्वुञ् धन्वविशेषवाचिनोयकारोपधाच्चदेशवाचिनोवृद्धाद्वुञ्स्यात् ऐ
रावतेधन्वः ऐरावतकः सांकाश्यकांपिल्यशाष्ट्रीवुञ्छणादिसूत्रेणएयानो सांकाश्य

म॰सि॰
कौ॰
१७५
176

कः कौपिलकः नगरात्कुत्सनप्रावीण्ययोः कुत्सिते प्रवीण्ये च जातादौ प्रत्ययार्थे नगरशब्दाद्वु
ञ् स्यात् नागरकश्चौरः शिल्पीवा एतयोः किं नागराः ब्राह्मणाः अरण्यान्मनुष्ये वुञ् स्या
त् वैयपसंख्यानिकणस्यापवादः पथ्यध्यायन्यायविहारमनुष्यहस्तिष्विति वक्तव्यं आ
रण्यकः पंथा अध्यायो न्यायो विहारो मनुष्यो हस्ती वा गर्त्तोत्तरपदाच्छः देवगर्त्तीयं वृ
कगर्त्तीयं गहादिभ्यश्च गहीयः युष्मदस्मदोरन्यतरस्यां खञ्च चाच्छः पक्षेऽण् युव
योर्युष्माकं वायं युष्मदीयः अस्मदीयः तस्मिन्नणि च युष्माकास्माकौ युष्मदस्मदोरे
तावादेशौ स्तः यौष्माकीणः अस्माकीनः यौष्माकः आस्माकः तवकममकावेकव
चने एकार्थवाचिनोर्युष्मदस्मदोरेतावादेशौ स्तः खञि अणि च तावकीनः मामकीनः

तावकः मामकः छेत्प्रत्ययोत्तरपदयोश्च मपर्यंतयोरनयोरेकार्थवाचिनो त्वमौ स्तः
प्रत्यये उत्तरपदे च त्वत्पुत्रः त्वदीयः मत्पुत्रः मदीयः मध्यान्मः मध्यमः अःसांप्रतिके
मध्यशब्दादकारप्रत्ययः स्यात्सांप्रतिकेऽर्थे उत्कर्षापकर्षहीनो मध्यो वैयाकरणः मध्ये
दारु नातिह्रस्वत्वेनातिदीर्घमित्यर्थः द्वीपादनुसमुद्रं यञ् समुद्रसमीपे यो द्वीपस्त
द्विषयात् द्वीपशब्दाद्यञ्स्यात् द्वैप्यं द्वैप्या कालाट्ठञ् कालवाचिभ्यष्ठञ्स्यात् मा
सिकं सांवत्सरिकं अव्ययानां भमात्रे टिलोपः सायंप्रातिकः पौनः पुनिकः कथं तत्
र्हि प्रातर्वरसूत्तमसो निषद्वये इति कालिदासः अनुदिनो घसत्रागेति भारविः समा
नकालीनं प्राक्कालीनमित्यादि च अपभ्रंशा एवैते इति प्रामाणिकाः तत्र यात इति

म.सि.
कौ.
१७७
177

यावत्कालाधिकारः आह्वेशारदः ठञ् ऋतोरण्णापवादः शारदिकंश्राद्धं विभाषारोगात
पयोः शारदिकः शारदोवारोगः आतपोवा निशाप्रदोषाभ्यांचावाठञ् नैशिक नैश
प्रादोषिकः प्रादोषं श्वसस्तुट्च श्वसशब्दाट्ठञ् तस्यतुडाद्दारादीनांच पर्षांतव्
द्विरैजागमश्च शौवस्तिकं संधिवेलाद्यृतुनक्षत्रेभ्योऽण् संधिवेलायां भवंसांधिवेलं ग्रै
ष्मं नैषं संधिवेलासंध्या अमावास्यात्रयोदशी चतुर्दशी पंचदशीप्रतिपत् प्रावृष
एण्यः प्रावृषेण्यं वर्षाभ्यष्ठक् वर्षास्वसाधुवार्षिकं वासः सर्वत्राणतलोपश्च हेमंता
दणलोपश्च चकारात्पक्षेऽत्वण् हैमनं हैमंतं सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यः ट्युट्युलौ
तुट्च सायमित्यादिभ्यश्चतुर्भ्योऽव्ययेभ्यश्च कालवाचकेभ्यः ट्युट्युलौस्तः अनयोःतुट्च १७७

सायंतनं चिरंतनं प्राह्णप्रगयोरेदंतत्वंनिपात्यते प्राह्णेतनं प्रगेतनं दोषातनं दिवातनं चिरप
रुत्परारिभ्यस्त्नोवक्तव्यः चिरत्नं परुत्नं परारित्नं अग्रादिपश्चाड्डिमच् अग्रिमं आदिमं
पश्चिमं अन्ताच्च अन्तिमं विभाषापूर्वाह्णापराह्णाभ्यां आभ्यांट्युट्युलौवास्तस्तयोस्तुट्च पक्षे
ठञ् पूर्वाह्णेतनं अपराह्णेतनं पौर्वाह्णिकं आपराह्णिकं तत्रजातः सप्तमीसमर्थाज्जातइत्य
र्थेऽणादयोघादयश्चस्युः स्रुघ्नेजातः स्रौघ्नः राष्ट्रियः अवारीणपारीणइत्यादि प्रावृषष्ठप्
एण्यस्यापवादः प्रावृषिकः प्रायःभवः तत्रेत्येव स्रुघ्नेप्रायेण बाहुल्येन भवति स्रौघ्नः को
शाड्ढञ् कौशेयंवस्त्रं तत्रभवः स्रुघ्नेभवः स्रुघ्नेभवः स्रौघ्नः औत्सः राष्ट्रियः दिगादिभ्यो
यत् दिश्यं वर्ग्यं शरीरावयवाच्च दंत्यं कंठ्यं दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ् दार्तेयं कौ

म॰सि॰
कौ॰
१७८
178

द्रेयं कलशिर्ढक् तत्र भवं कालशेयं ग्रीवाभ्योऽण् च वाढञ् ग्रैवेयं ग्रैवं गंभीराञ्ञ्यः गंभीरे भवं गांभीर्यं अव्ययीभावाच्च परिमुखे भवं पारमुख्यं परिमुखादिभ्य एवेष्यते नेह औपकूलं अन्तः पूर्वपदाट्ठञ् अव्ययीभावादित्येव वेश्मनीत्यन्तर्वेश्म तत्र भवं आन्तर्वेश्मिकं आन्तर्गणिकं अध्यात्मादेष्ठञिष्यते अध्यात्मे भवं आध्यात्मिकं अनुशतिकादीनां च एषाम् उभयपदवृद्धिः जितिणितिकितिच आधिदैवकं आधिभौतिकं ऐहलौकिकं पारलौकिकं आकृतिगणोयं जिह्वामूलाङ्गुलेश्छः जिह्वामूलीयं अङ्गुलीयं वर्गान्ताच्च कवर्गीयं ततआगतः शुण्डिकादिभ्योऽण् ठगायस्थानेभ्यः शुल्कशालाया आगतः शौल्कशालिकः विद्यायोनिसंबंधेभ्यो वुञ् औपाध्यायकः पैतामहकः ऋतष्ठञ् भ्रा १७८

ञपवादः हौतृकं मातृकं भ्रातृकं पितुर्यच्च चाद्ठञ् रीङृतः यस्येतिचलोपः पित्र्यं पैतृकं
गोत्रादंकवत् विद्येभ्यश्चागतेवेदं गार्गं दाक्षं औपगवकं हेतुमनुष्येभ्योन्यतरस्यांरूप्यः स
मादागतंसमरूप्यं विषमरूप्यं पक्षेगहादित्वात्छः समीयं देवदत्तीयं देवदत्तरूप्यं म
यट्च समयं देवदत्तमयं प्रभवति तत इत्येव हिमवतः प्रभवति तत इत्येव हिमवतः प्र
भवति हैमवतीगंगा विदूरात्ञ्यः विदूरात्प्रभवतिवैदूर्योमणिः दंतमध्यायेण्यादलवत् न
तुनंडुलवत्सूर्द्धमथ नत्वर्थासंगतिः वालवायाद्धिप्रसौप्रभवतिविदूरेतुसंस्क्रियतेइतिचेत्
सत्यं अतएवसमाहितंभाष्ये वालवायोविदूरंवेतिवालवायशब्दःप्रत्ययंलभतेविदूरादेशो
चसूत्रेविपठितेनादेशोनानुरूपस्थानी आहितम्पते तत्गच्छति पथिदूतयोः स्रुघ्नंगच्छति

स·सि·
कौ·
१७९
179

स्रौघ्नः पथ्याः हतो वा अभिनिष्क्रामति द्वारं स्रुघ्नमभिगच्छति स्रौघ्नं कान्यकुब्जद्वारं अधिकृत्य
कृते ग्रंथे शारीरकमधिकृत्य कृतो ग्रंथः शारीरकीयः शारीरकं भाष्यमिति तु अभेदोपचा
रात् सोस्य निवासः स्रुघ्नो निवासोस्य स्रौघ्नः तेन प्रोक्तं पाणिनिना प्रोक्तं पाणिनीयं पाराश
र्यशिलालिभ्यां भिक्षुनटसूत्रयोः णिनिः स्यात् पाराशर्येण प्रोक्तं भिक्षुसूत्रमधीयते पारा
शरिणः भिक्षवः शिलालिना प्रोक्तं नटसूत्रमधीयते शैलालिनो नटाः कर्मंदकृशाश्वा
दिनिः तेनेत्येव कर्मंदेन प्रोक्तं भिक्षुसूत्रमधीयते कर्मंदिनो भिक्षवः कृशाश्विनो नटाः
उपज्ञाते पाणिनिनोपज्ञातं पाणिनीयं तस्येदं उपगोरिदमौपगवं समिधामाधाने षेण्यण् सा
मिधेन्यो मंत्रः सामिधेनी ऋक् रथाद्यत् रथ्यं चक्रं पत्रपूर्वादञ् पत्रवाहनं अश्वरथस्य

देश्राम्बरथे हलसीराट्ठक् हालिकं सैरिकं गोत्रचरणाद्वुञ् औपगवकं चरणा द्धर्माम्ना
यथोरितिवक्तव्यं काठकं संघांकलक्षणेष्वञ्यञिञामण् घोषग्रहणमपिकर्तव्यं अत्र वै
दः संघोंकोघोषोवावैदंलक्षणं यञ् गार्गः गार्गिकञ् दाक्षः दाक्षं परंपरासंबंधोंकः सा
क्षाल्लक्षणं शैलिशैखिका तस्यविकारः अश्मनोविकारेटिलोपः अश्मनोविकारोआ
श्मः भास्मनः मार्त्तिकः अवयवेच प्राण्योषधिवृक्षेभ्यः चाद्विकारे मयूरस्यविकारो
वयवोवामायूरः मौर्वंकांडंभस्मवा पैप्पलं त्रपुजतुनोःषुक् आभ्यामणपतयोःषुक्
च त्रापुषं जातुषं ओरञ् देवदारोरिदंविकारोदैवदारवं अनुदात्तादेश्च अत्र काषि
त्थे पलाशादिभ्योवा अञ् पालाशं कारीरं खादिरं शम्याःष्लञ् शाम्भारवयवंवावि

भ.सि.
कौ.
१८०
180

कारेशामीलं मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः प्रकृत्यात्रात्मयड्वास्यात् वि
कारावयवयोः अश्ममयं अश्मनः विकारे अश्मनोवयवे आश्मने विकारे टिलोपः
अत्रन अभक्ष्येत्यादिकिं मुद्गानां विकारः मौद्गः सूपः कार्पासमाच्छादनं नित्यं वृद्धि
शरादिभ्यः आम्रमयं शरमयं एकाचो नित्यं वाचः विकारे वाङ्मयं गोश्च पुरीषे
गोः पुरीषे गोमयं पएपः ठञ् पापाः विकारे पैणायं पएसस्तु पैण गोपयसोर्यत् ग
व्यं पयस्यं फले लुक् विकारावयवप्रत्ययस्य लुक् तद्धितलुकि उपसर्जनस्त्रीप्र
त्ययस्य आमलक्याः फले आमलके प्लक्षादिभ्योऽण् विधिसामर्थ्यान्न लुक् प्ला
क्षं न्यग्रोधस्य च केवलस्य अस्य च न वृद्धिरैजागमश्च नैयग्रोधं जंब्वा वा अण् फ १८०

ले जंब्वाः फलं जंबं जंबु वा फले इति वर्त्तते तस्य लुक् जंबु लुप् च जंब्वाः फलप्रत्ययस्य लुप्युक्त
वद्व्यक्तिवचने जंबूः फलपाकशुषामुपसंख्यानं व्रीहयः मुद्गाः पुष्पमूले बहुलं म
ल्लिकायाः पुष्पं मल्लिका जाती विदार्याः मूलं विदारी बहुलग्रहणान्नेह पाटलानि पु
ष्पाणि शालानि मूलानि बाहुलकात् क्वचित् लुक् अशोके करवीरे हरीतक्यादि
भ्यश्च फलप्रत्ययस्य लुप् हरीतक्यादीनां लिंगमेव प्रकृतिवत् हरीतक्याः फलानि
हरीतक्यः इति प्राग्दीव्यतीयः प्राग्वहतेष्ठक् तद्वहतीत्यतः प्राक् ठगधिक्रियते तदाहे
ति माशब्दादिभ्य उपसंख्यानं माशब्दं कारीति यश्चाह स माशब्दिकः आहौ प्रभूतादिभ्य
आहौ उत्पर्थे प्रभूतमाह प्राभूतिकः पार्याप्तिक पृच्छतौ सुस्नातादिभ्यः सुस्नातं पृच्छति

सौस्नातिकः सुखशायिनंपृच्छतिसौखशायिनिकः अनुशतिकादिः गच्छतौइत्यर्थेपरदा
रादिभ्यष्ठक् पारदारिकः गुरुतल्पंगच्छतिगौरुतल्पिकः तेनदीव्यतिखनतिजयतिजि
तं अक्षैर्दीव्यतिखनतिजयतिजितंवाआक्षिकः तेनसंस्कृतं तेनेतितृतीयासमर्थात्
संस्कृतमित्यर्थेठक् दध्नासंस्कृतंदाधिकं मारिचिकं तरतिइत्यर्थेठक् उडुपेनतरति।
औडुपिकः गोपुच्छाट्ठञ् गोपुच्छेनतरतिगौपुच्छिकः नौद्व्यचष्ठन् नावातरतिनावि
कः घटेनतरतिघटिकः चरतिइत्यर्थेठक् हस्तिनाचरतिहास्तिकः दध्नाचरतिदा
धिकः पर्पादिभ्यष्ठन् पर्पेणचरतिपर्पिकः पर्पिकी येनपीठेनपंगवश्चरंतिसप
र्पः अश्विकः रथिकः श्वगणाट्ठञ्च चात् ष्ठन् श्वगणेनचरतिश्वागणिकः श्वाग

णिकी स्वागणिकः स्वागणिकी वेतनादिभ्योठन् जीवतीत्यर्थे वेतनयाजीवतिवैतनिकः
विभाषाविवधात् ष्ठन् पक्षेठक् विवधेनहरतिविवधिकः वैवधिकः एकदेशविकृ
तस्यानन्यत्वात् वीवधादपि वीवधिक वैवधिकी विवधवीवधशब्दौउभयतोशि
क्यस्कंधवाह्येकाष्टेवर्त्तेते निर्वृत्तेक्षद्यूतादिभ्यष्ठन् अक्षद्यूतेननिर्वृत्तमाक्षद्यूतिकं
कंवैरं संसृष्टे इत्यर्थेठक् दध्नासंसृष्टंदाधिकं लवणाल्लुक् लवणेनसंसृष्टोलवणः
सूपः लवणं शाकं मुद्गादण् मुद्गैःसंसृष्टः औदनः मौद्गः उंछतिइत्यर्थेठक् वदराण्यु
छतिवादरिकः रक्षतिइत्यर्थेठक् समाजंरक्षतिसामाजिकः शब्ददर्दुरंकरोतीत्यर्थेठ
क्शाब्दंकरोतिशाब्दिकः यदिमत्स्यमृगान्हंति स्वरूपस्यपर्यायाणांविशेषाणां च

ग्रहणम् मत्स्यपर्यायेषु मीनस्यैव पक्षिणो हंति पाक्षिकः शाकुनिकः मायूरिकः
मात्सिकः मैनिकः शाकुलिकः मार्गिकः हारिणिकः सारंगिकः धर्मं चरतीत्यर्थे
ठक् धर्मं करोतीति धार्मिकः अधर्माच्चेति वक्तव्यम् आधर्मिकः तदस्य पण्यं अ
पूपाः पण्यमस्य आपूपिकः लवणाट्ठञ् लवणं पण्यमस्य लावणिकः शिल्पमित्य
र्थे ठक् मृदंगवादनं शिल्पमस्य मार्दंगिकः प्रहरणं तदस्येत्येव असिः प्रहरणमस्य
आसिकः धानुष्कः शक्तियष्ट्योरीकक् शक्तिः प्रहरणमस्य शाक्तीकः याष्टीकः अ
स्तिनास्तिदिष्टं मतिः तदस्येत्येव अस्ति परलोक इत्येवं मतिर्यस्य स आस्तिकः नास्ती
ति मतिर्यस्य स नास्तिकः दिष्टमिति मतिर्यस्य स दैष्टिकः शीलं तदस्येत्येव अपूपभक्ष॰ १८२

णंशीलमस्यआपूपिकः छत्रादिभ्योणः गुरोर्दोषाणामावरणंछत्रं तच्छीलमस्येतिछा
त्रः तत्रनियुक्तः आकरेनियुक्तः आकरिकः निकटेवसतिनैकटिकोभिक्षुः इतिठगाधि
कारः प्राग्घिताद्यत् तस्मैहितमित्यतः प्राक् यदधिक्रियते तद्वहतिरथयुगप्रासंगं
रथंवहतिरथ्यः युगंवहतियुग्यः वत्सानांदमनकालेस्कंधेयत्काष्ठंसप्रासंगः तंवहति
प्रासंग्यः धुरोयड्ढकौ धुरंवहतिधुर्यः धौरेयः हलसीराट्ठक् हलंवहतिहालिकः सैरि
कः विध्यत्यधनुषा द्वितीयान्ताद्विध्यतीत्यर्थेयत् नचेत्तत्रधनुष्करणं पादौविध्यंतिपद्
याः शर्कराः नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमि
तसंमितेषु नावातार्यंनाव्यंजलं वयसातुल्योवयस्यः धर्मेणप्राप्यंधर्म्यं विषेणवध्यः

म॰सि॰
कौ॰
१८३
183

विध्यः मूलेनानाम्यं मूल्यं मूलेनसमोमूल्यः सीतयासमितंसीत्यंक्षेत्रं तुलयासंमितंतुल्यं तत्र
साधुः सामसुसाधुःसामन्यः ब्रह्मण्यः कर्मण्यः शरण्यः सभायाःयः सभायांसाधुःसभ्यः इति
यतोविधिः प्राक्क्रीताच्छः तेनक्रीतमित्यतः छोऽधिक्रियते उगवादिभ्योयत् प्राक्क्रीतादि
त्येव उवर्णांतात्गवादियत्स्याच्छ स्यापवादः नाभिनभंच नभ्योक्षः नाभिशब्दोयत्प्रत्ययंल
लतेन भादेशंश्चरथांगस्यच्छिद्रेनाभिःतदनुप्रविष्टःकाष्ठविशेषोक्षःसचतदनुगुणत्वात् त
स्मैहितः नभ्यमंजनं रथेनाभावेवेदं शुनःसंप्रसारणं वाचदीर्घत्वं शुनेहितंशून्यं शुन्यं ऊ
धसोनङादेशश्च ऊधसेहितंऊधस्यं केवलाच्चसंज्ञायांयत् केवलं ऊर्णापलशतं संज्ञायां
किंकेवलीया ऊर्णा विभाषाहविरपूपादिभ्यः आमिक्षायैहितंआमिक्ष्यंदधि आमिक्षीयं १८३

पुरोडाशास्तंडुलाः पुरोडाशीयाः अपूपीयं तस्मैहितं वत्सेभ्योहितोवत्सीयो गोधुक् शंक
व्यं दारु गव्यंहविष्यं शरीरावयवात् यत् दंत्यं कंठ्यं नस्यं अजाविभ्यांथ्यन् अजथ्यायू
थिः अविथ्या आत्मन्विश्वजनभोगोत्तरपदात्खः आत्माध्वानौखे एतौखेएवप्रकृत्या
स्तः आत्मनेहितंआत्मनीनं विश्वजनीनं कर्मधारयादेवेष्यते अन्यत्र विश्वजनीयं पंच
जनादुपसंख्यानं पंचजनीनं मातृभोगीणः आचार्यादणत्वंच आचार्यभोगायहितंआचा
र्यभोगीनः छयतोर्पूर्णोविधिः प्राग्वतेष्ठञ् तेनतुल्यमितिवतःप्राग्वत्ञ्ठञधिक्रियते आर्हाद्गो
पुच्छसंख्यापरिमाणाट्ठक् तदर्हतीत्येतदभिव्याप्यठञ् अधिकारमध्येठञोपवादःठगधि
क्रियते गोपुच्छादीन्वर्जयित्वा असमासेनिष्कादिभ्य आर्हादित्येतन्नेनक्रीतमितियावदनुवर्त्त

ने निष्कादिभ्योऽसमासे ठगार्हीयेष्वर्थेषु निष्केण क्रीतं नैष्किकं समासे तु ठञ् परिमाणान्तस्या-
संज्ञाशाणयोः उत्तरपदस्य वृद्धिर्जिदादौ परमनैष्किकं शताच्च ठन्यतावशते शतेन क्रीतं शत्यं
शतिकं अशते किं संख्यायाः अतिशदन्तायाः कन् आर्हीयेर्थेष्वनेपरिमाणमस्य पञ्चकः सं-
घः बहुकः त्यन्तायास्तु साप्ततिकः शदन्तायाः चात्वारिंशत्कः वतोरिड्वा वतेतात्कनिडूह्वा
तावत्कः तावतिकः कंसाट्टिठन् कंसिकः अर्द्धाच्चेति वक्तव्यं अर्द्धिकः अध्यर्द्धपूर्वाद्विगोर्लु-
गसंज्ञायां अध्यर्द्धपूर्वात् द्विगोश्च परस्यार्हीयस्य लुक् अध्यर्द्धकंसं द्विकंसेन क्रीतं द्विकंसं
असंज्ञायां तु पाञ्चकलापिकं तेन क्रीतं ठञ् गोपुच्छेन क्रीतं गौपुच्छिकं साप्ततिकं प्रा-
स्थिकं ठन् नैष्किकं तस्येश्वरः सर्वभूमिपृथिवीभ्यामणञौ स्तः अनुशतिकादीनां च स- १८४

र्वभूमेरीश्वरः सार्वभौमः पार्थिवः तदस्यपरिमाणं प्रस्थपरिमाणमस्यप्रास्थिकः राशिः स्तो
मेडविधिः पंचदशमात्राः परिमाणमस्यपंचदशः सप्तदशः सप्तदशाः सोमयागेषुछंदोगैः
क्रियमाणाः स्तुत्यादिसंज्ञिकास्तुतिः स्तोमः पंक्तिविंशतित्रिंशच्चत्वारिंशत्पंचाशत्षष्टिसप्तत
त्यशीतिनवतिशतं पंतेशब्दानिपात्यंते तदर्हति श्वेतछत्रमर्हतिश्वैतछत्रिकः दंडादिभ्यः यः दंड्यो
यत् दंडमर्हतिदंड्यः अर्घ्यः वध्यः तेननिर्वृत्ते अह्नानिर्वृत्तंआह्निकं इतिठक्ठञोरधिकारः
तेनतुल्यंक्रियाचेद्वतिः ब्राह्मणेनतुल्यंब्राह्मणवदधीते क्रियाचेत्किंगुणतुल्येमाभूत् पुत्रे
णतुल्यः स्थूलः तत्रतस्येव मथुरायामिवमथुरावत्स्रुघ्नेप्राकारः चैत्रस्येवचैत्रवन्मैत्रस्यगा
वः तस्यभावस्त्वतलौ प्रकृतिजन्यबोधेगोत्वं गोता त्वांतंक्लीवः आचत्वात् ब्राह्मस्त्वइष्यतः ब्रा

म·सि·
कौ·
१८५
185

कृत्वतलावपिक्रियेते अपवादैः सहसमावेशार्थमिदं चकारेणत्वतल्भ्यामपिसमावेशार्थः स्त्रि
याभावः स्त्रैणं स्त्रीत्वं स्त्रीता पुंसःभावः पौंस्नं पुंस्त्वं पुंस्ता पृथ्वादिभ्यइमनिज्वा वावचनेअण्‌ा
दिसमावेशार्थं रऋतोहलादेर्लघोः इष्ठेमेयस्सु टेःलोपः इष्ठेमेयस्सु पृथुमृदुभृशकृशदृढ
परिवृढानामेवरत्वं पृथोर्भावःप्रथिमा पार्थवं म्रदिमा मार्दवं वर्णदृढादिभ्यःष्यञ्च वा
दिमनच शौक्ल्यं शुक्लिमा दार्ढ्यं द्रढिमा गुणवचनब्राह्मणादिभ्यःकर्मणिच चाद्भावे ज
डस्यभावःकर्मवाजाड्यं मौढ्यं ब्राह्मण्यं आकृतिगणोयं चतुर्वर्णादीनांस्वार्थेउपसंख्यानं
चत्वारोवर्णाश्चातुर्वर्ण्यं चातुराश्रम्यं त्रैस्वर्यं षाड्गुण्यं सैन्यं सांनिध्यं औपम्यं सामीप्यं
त्रैलोक्यमित्यादि स्तेनाद्यन्नलोपश्च नेतिसंघातग्रहणम् स्तेनस्यभावःकर्मवास्तेयः स १८५

त्वम्र्थः सखे कपिज्ञात्योर्ढक् कापेयं ज्ञातेयं पत्यन्तपुरोहितादिभ्यो यक् सैनापत्यं पौ
रोहित्यं राजासमासे राजशब्दोऽसमासे यकं लभते उक्तोर्थः राज्ञो भावः कर्म वा राज्यं
समासे तु ब्राह्मणादित्वात् ष्यञ् आधिराज्यं प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽ
ञ् प्राणभृज्जाति आश्वं औष्ट्रं वयोवचनं कौमारं कैशोरं औद्गात्रं औन्नेत्रं सौष्टवं दौ
ष्टवं हायनान्तयुवादिभ्योऽण् द्वैहायनं त्रैहायनं यौवनं स्थाविरं श्रोत्रियस्य यलो
पश्च श्रौत्रं कुशलनिपुणचपलपिशुनकुतूहलक्षेत्रज्ञाः युवादिषु ब्राह्मणादिषु च प
ठ्यंते कौशल्यं कौशलमित्यादि इगंताच्च लघुपूर्वात् शुचेर्भावः कर्म शौचं मौनं योप॰
धाद्गुरूपोत्तमाद्वुञ् रामणीयकं आभिधानीयकं सहायाद्वा साहाय्यं साहायकं हैह

म.सि
कौ.
१८६
186

मनोज्ञादिभ्यश्च चौरोपाध्यायकः मानोज्ञकं इतिनञ्स्नञोरधिकारः धान्यानांभवनेक्षे
त्रेखञ् मुद्गानांभवनंक्षेत्रंमौद्गीनं व्रीहिशाल्योर्ढक् व्रैहेयं शालेयं यवयवकषष्टिका
द्यत् यव्यं यवक्यं षष्टिक्यं विभाषातिलमाषोमाभंगाणुभ्यः यत्स्यात् पक्षेखञ् ति
ल्यं तैलीनं माष्यं माषीणं उम्यं औमीनं भंग्यं भांगीनं अणव्यं आणवीनं तत्सर्वादेः
पथ्यंगकर्मपत्रपात्रंव्याप्नोति सर्वादेः पथ्याद्येताद् द्वितीयांतात्ख सर्वपथान्व्याप्नो
तीतिसर्वपथीनः सर्वांगीणः सर्वकर्मीणः सर्वपात्रीणः हैयंगवीनंसंज्ञायां नवनी
तेनिपातोयं तस्यपाकमूलेपील्वादिकर्णादिभ्यःकुणब्जाहचौ पीलूनांपाकः पीलुकु
णः कर्णस्यमूलंकर्णजाहं पक्षात्तिः मूलेत्यनुवर्तते पक्षस्यमूलंपक्षतिः तेनवित्त १८६

श्चुञ्चुप्चणपौ पकारः प्रत्यययो राद्यौ लप्ननिर्दिष्टः तेन च स्पनेनेवं विद्यया वित्तः विद्याचुञ्चुः
विद्याचणः वेः शालच्छङ्कटचौ क्रियाविशिष्टसाधनवाचकात्स्वार्थे विस्तृते विशाले वि
शङ्कटं संप्रोदश्च कटच् संकटं प्रकटं उत्कटं चाह्निकटं अलाबूतिलोमाभङ्गाभ्यो रज-
स्युपसंख्याने अलाबूनां रजः अलाबूकटं तिलकटं उमाकटं भङ्गाकटं गोगोष्ठजा-
दयः स्थानादिषु पशुनामभ्यः गवां स्थानं गोगोष्ठं अश्वानां स्थानं अश्वगोष्ठं संघाते क-
टच् अवीनां संघातः अविकटः विस्तारे पटच् अविपटः द्वित्वे गोयुगच् द्वावुष्ट्रौ उ-
ष्ट्रगोयुगं षट्त्वे षड्गवच् अश्वषड्गवं स्नेहे तैलच् तिलस्य तैलं तिलतैलं सर्षपतैलं अ-
वात्कुटारच्च चात्कटच् अवाचीनः कुटारः अवकुटारः अवकटः नतेऽनासिकायाः

म॰ सि॰
कौ॰
१८७
187

संज्ञायांटीटच्नाटच्भ्रटचः अवादित्येव नतेनमने नासिकायाःनतेऽवटीटं अवनाटं अ
वभ्रटं नद्योगात् नासिकाप्यवटीटा पुरुषोऽवटीटः उपाधिभ्यांत्यकन्नासन्नारूढयोः
पर्वतस्यासन्नेस्थलेउपत्यका आरूढेस्थलमधित्यका कर्मणिघटोठच् कर्मणिघटतेक
र्मठः घटतइतिघटःपचाद्यच् तदस्यसंजातंतारकादिभ्यइतच् तारकाःसंजाताअस्य
तारकितंनभः पंडितः आकृतिगणोयं प्रमाणेदघ्नच्द्वयसच्मात्रच् एतेभवंति ऊरू
परिमाणमस्यऊरुद्वयसं ऊरुदघ्नं ऊरुमात्रं प्रथमश्चद्वितीयश्चऊर्द्धमानेमतौमम
ऊर्द्धमानेकिलोन्मानेपरिमाणंतुसर्वतः । आयामस्तुप्रमाणंस्यात् संख्याबाह्यातुस
र्वतः पुरुषहस्तिभ्यामण्च पुरुषप्रमाणमस्यपौरुषं पुरुषप्रमाणमस्यपौरुषं पुरुषद १८७

यत्तं यत्तदेतेभ्यः परिमाणेवतुप् यत्परिमाणमस्ययावान् तावान् एतावान् किमिदंभ्यांवो
घः आभ्यांवतुपवस्यघः इदंकिमोरीश्कीमःइमवतुषु कियान् इयान् किमःसंख्यापरि
माणेडतिच चाद्वतुप वस्यचवस्यघः कासंख्यायेषांतेकति कियन्तः संख्यायाःअवयवेतय
प पंचअवयवाअस्यपंचतयं द्वित्रिभ्यांतयस्यायज्वा द्वयं द्वितयं त्रयं त्रितयं उभादुदात्तो
नित्यं उभशब्दात्तयपोऽयच्स्यात् सचाद्युदात्तः उभयं तदस्मिन्नधिकमितिदशान्ताड्डः एका
दशाअधिकाअस्मिन् एकादशं शतसहस्रयोरेवेष्यते नेह एकादशाधिकाअस्यांविंश
त्यां प्रकृतिप्रत्ययार्थयोःसमानजातीयत्वएवेष्यते नेह एकादशमाषाअधिका अस्मिन्
सुवर्णशते शदंतविंशतेश्च डःस्यादुक्तेऽर्थे त्रिंशदधिकाअस्मिन्त्रिंशंशतं विंशं तस्यपू

म.सि.
कौ.
१८८
188

रणोडट् संख्यायाडत्येव एकादशानांपूरणः एकादशः नौतादसंख्यादेर्मट् डटोमडागमस्य पं
चानांपूरणःपंचमः नौताकिंविंशः असंख्यादेःकिं एकादशः षट्कतिकतिपयचतुरांथुक्
इति षष्णांपूरणःषष्ठः कतिथःकतिपयशब्दस्यातएवडट् कतिपयथः चतुर्थः चतुरश्छ
यतावाद्यक्षरलोपश्च तुर्यं तुरीयः वहुपूगगणसंघस्यतिथुक् इति वहुतिथः वतोरिथु
क् इति यावतिथः द्वेस्तीयः डटोपवादः द्वयोःपूरणोद्वितीयः त्रेःसंप्रसारणंच तृतीयः
इहहलइतिदीर्घोनद्वितीयतृतीयेतिनिर्देशात् विंशत्यादिभ्यस्तमडन्यतरस्यांडट् ए
भ्योडट्स्तमडागमोवास्यात् विंशतितमः विंशः एकविंशतितमः एकविंशः नित्यंश
तादिमासार्द्धमाससंवत्सराच्च शतस्यपूरणःशततमः एकशततमः मासादेस्तएव १८८

डट् मासतमः षष्ठ्यादेश्चासंख्यादेः षष्ठितमः संख्यादेस्तु विंशत्यादिभ्य इति विकल्प एव प
कषष्टः एकषष्टितमः मतौ छः सूक्तसाम्नोः मत्वर्थे छः अच्छावाकशब्दोस्मिन्नस्ति अच्छावा
कीयं सूक्तं वारवंतीयं साम श्रोत्रियःछंदोधीते श्रोत्रियः वेत्यनुवृत्तेःछांदसः पूर्वादिनिः
पूर्वं कृतमनेन पूर्वी सपूर्वाच्च कृतपूर्वी इष्टादिभ्यश्च इष्टमनेन इष्टी अधीती अनुपद्यन्वे
ष्टा अनुपदमन्वेष्टा अनुपदीना गवां साक्षाद्द्रष्टरि संज्ञायां साक्षाद्द्रष्टा साक्षी तदस्या
स्त्यस्मिन्निति मतुप् गावो स्यास्मिन्वा संतीति गोमान् तसौ मत्वर्थे तांतसांतौ भसंज्ञौ स्तः मत
र्थप्रत्यये परे वसोः संप्रसारणं च विदुष्मान् गुणवचनेभ्यो मतुपो लुगिष्टः शुक्लो गु
णोस्यास्तीति शुक्लः पटः कृष्णः प्राणिस्थादातो लजन्यतरस्यां चूडालः चूडावान् प्राणि

म॰सि॰ स्यात् किं शिखावान् दीपः प्राणिस्थादेव नेह मेधावान् सिध्मादिभ्यश्च लच् स्या सिध्मवान् वात

कौ॰ दन्तबलललाटानामूङ् च वातूलः दन्तूलः बलूलः ललाटूलः वत्सांसाभ्यां कामबले लच् स्या

१८९ यथासंख्यं कामवति बलवतिचार्थे वत्सलः अंसलः फेनादिलच्च चाल्लच् अन्यतरस्यां ग्र

189 हणमनुपसमर्थ्यार्थमनुवर्त्तते फेनिलः फेनलः फेनवान् लोमादिपामादिपिच्छादि

भ्यः शनेलचः लोमादिभ्यः शः लोमवान् लोमशः पामादिभ्यो नः पामनः पामवान् अ

ङ्गात्कल्याणे अङ्गना लक्ष्म्या अच्च लक्ष्मणः पिच्छादिभ्य इलच् पिच्छिलः पिच्छावान् उरसि

लः उरस्वान् प्रज्ञाश्रद्धार्चाभ्यो णः प्रज्ञो व्याकरणे प्राज्ञः श्राद्धः आर्चः वृत्तेश्च वार्त्तः तपःस

हस्राभ्यां विनीनी विनीन्योरिकारो नकारपरित्राणार्थः तपस्वी सहस्री अण् च तापसः साह १८९

त्वः ज्योत्स्नादिभ्यउपसंख्यानं ज्यौत्स्नः तामिस्रः सिकताशर्कराभ्यांच सैकतोघटः शा
र्करः देशेलुबिलचौच चादण्मतुप्च सिकतास्मिन्देशेसिकता सिकतिलः सैकतः
सिकतावान् एवंशर्करेत्यादि दंतउन्नतउरच् उन्नतादंताअस्यदंतुरः ऊषसुषिमुष्कमधो
रः ऊषरः सुषिरः मुष्कोंडः मुष्करः मधुरः रप्रकरणे खमुखकुंजेभ्यउपसंख्याने महदा
कारकंठविवरंखं खरः महत्कंठविवरंमुखं मुखरः कुंजोहस्तिहनुः कुंजरः नगपांशु
पांडुभ्यश्च नगरे पांसुरः पांडुरः कच्छ्वाह्रस्वस्वेच कच्छुरः द्युद्रुभ्यांमः द्युमः द्रुमः केशाद्वो
न्यतरस्यां प्रकृतेनान्यतरस्यांग्रहणेनमतुप्सिद्धेपुनर्ग्रहणं इनिठनोः समावेशार्थं केशा
वः केशी केशिकः केशवान् अन्येभ्योदृश्यते मणिवोनागविशेषः हिरण्यवोनिधिवि

म.सि.
कौ.
१४८
190

शोषः अर्णसोलोपश्च अर्णवः गांड्यजगात्संज्ञायां ह्रस्वदीर्घयोर्यणातेत्रेणनिर्देशः गां
डिवं गांडिवं अजगवं पिनाकः कांडाण्डादीरन्नीरचौ काण्डीरः आण्डीरः रजःकृष्यासुतिपरि
षदोवलच् रजस्वलास्त्री कृषीवलः वलेऽतिदीर्घः आसुतीवलः शौण्डिकः परिषद्वलः प
र्षद्वदितिपाठांतरे पर्षद्वलः अन्येभ्योपिदृश्यते भ्रातृवलः पुत्रवलः दंतशिखातसंज्ञायां
दंतावलः हस्ती शिखावलः केकी अतइनिठनौ दंडी दंडिकः व्रीह्यादिभ्यश्च व्रीही व्रीहिकः
तुंदादिभ्यइलच्च चादिनिठनौमतुप्च तुंदिकः तुंदी तुंदिलः तुंदवान् रूपादाहतप्र
शंसयोर्यप् आहतंरूपमस्यास्तिरूप्यः कार्षापणः प्रशस्तंरूपमस्यास्तीतिरूप्योगौः अ
न्येभ्योपिदृश्यते हिम्याःपर्वताः गुण्याः ब्राह्मणाः अस्मायामेधास्रजोविनिः यशस्वी य

१४०

शस्वान् मायावी मायावान् व्रीह्यादिभ्यश्च पाठात् इनिठनौ मायी मायिकः मेधावी स्रग्वी

शृंगवृंदाभ्यामारकन् शृंगारकः वृंदारकः फलबर्हाभ्यामिनच फलिन बर्हिणः हृदयाच्चा

लुरन्यतरस्यां हृदयालुः हृदयी हृदयिकः हृदयवान् शीतोष्णतृप्रेभ्यस्तदसहने शीतंनस

हते शीतालुः उष्णालुः तृप्रः पुरोडाशः तंनसहते तृप्रालुः तप् पूर्वमरुद्भ्यां पर्वतः मरुत्तः ऊ

र्णाया युस् स्त्रियां पदत्वे ऊर्णायुः वाचो ग्मिनिः वाग्मी आलजाटचौ बहुभाषिणि कुत्सित

इति वक्तव्ये कुत्सितं बहु भाषते वाचालः वाचाटः यस्तु सम्यग्बहु वदति तत्र वाग्मीत्येव स्वा

मिन्नैश्वर्ये ऐश्वर्यवाचकात्स्वशब्दात् मत्वर्थे आमिनिच् स्वामी अर्शआदिभ्योऽच् अर्शो

स्य विद्यते अर्शसः आकृतिगणोयं वातातीसाराभ्यां कुक्च चादिनिः वातकी अतीसारकी

म॰ सि॰
कौ॰
१९१
191

शीर्षे चायमिष्यते नेह वातवतीगुहा पिशाचाच्च पिशाचकी हलाज्जातौ हली जातौ किं हल
वान्पुरुषः वर्णाद्ब्रह्मचारिणि वर्णी कंशंभ्यांबभयुस्तितुतयसः कंशमिति मान्तौ कमित्युदक
सुखयोः शमिति सुखे आभ्यां सप्त प्रत्ययाः युस्तियसोः सकारः पदत्वार्थः कंवः कंभः कंयुः कं
तिः कंतुः कंतः कंयः शंवमित्यादि तुन्दिवलिवटेर्भः तुन्दिभः वलिभः वटिभः अहंशुभ
मोर्युस् अहमिति मान्तमव्ययमहंकारे अहंयुः अहंकारवान् शुभंयुः शुभान्वितः इति मत्व
र्थीयाः प्राग्दिशो विभक्तिः दिक्शब्देभ्य इत्यतः प्राक् वक्ष्यमाणाः विभक्तिसंज्ञाः स्युः अथ स्वा
र्थिकाः प्रत्ययाः किंसर्वनामबहुभ्योऽद्व्यादिभ्यः किमः सर्वनाम्नो बहुशब्दाच्च इति वक्ष्यमाणाः प्रत्यया विधि
यन्ते पंचम्यास्तसिल् पंचम्यन्तेभ्यः किमादिभ्यस्तसिल् स्याद्वा कुतिहोः किमः कुः स्यात् १९१

तादौ ह्यादौ च विभक्तौ कुतः कस्मात् इदमइश् प्राग्दिशीये इतः एतदोन् प्राग्दिशीये अ
नेकाल्त्वात्सर्वादेशः अतः अमुतः यतः ततः बहुतः ह्यादेस्त्रल् द्वाभ्यांपर्यभिभ्यांच तसिल्
परितः सर्वतः इत्यर्थः सप्तम्यास्त्रल् कुत्र अत्र बहुत्र इदमोहः त्रलोपवादः इशादेशः इह
किमोऽत्वा स्यात् क्वाति क्वेत्यादेशः स्यात् अति क्व कुत्र इतरेभ्योपि दृश्यंते सप्तमीपंचमीत
रविभक्त्यंतादपि तसिलादयो दृश्यंते दृशिग्रहणाद्भवदादियोगएव सभवान् ततोभवान्
तत्रभवान् तंभवंतं ततोभवंतं तत्रभवंतं एवंदीर्घायुः देवानांप्रियः आयुष्मान् सर्वैकान्यकिं
यत्तदः काले दा सप्तम्यंतेभ्य एभ्यः कालार्थे दा स्यात् सर्वस्य सोन्यतरस्यां दि दादौ प्राग्दिशीये सर्व
स्य सो वा स्यात् अस्मिन्काले सदा सर्वदा एकदा अन्यदा कदा तदा काले किं सर्वत्र देशे इदमो र्हिल्

म॰सि॰
कौ॰
१९२
192

सप्तम्यंतात् एतेतौरथोः इदम एतइत् एतौस्तः रेफादौथकारादौच प्राग्दिशीयेपरे अस्मिन्का
लेएतर्हि कालेकिं इहदेशे अधुना इदमः निपातोयं दानींच इदमोदानींप्रत्ययःकाले इ
दानीं तदोदाच तदा तदानीं अनद्यतनेर्हिलन्तरस्यां कर्हि कदा यर्हि यदा तर्हि तदा ए
तदः एतत्एतौस्तः रेफादौथकारादौच प्राग्दिशीये एतस्मिन्कालेएतर्हि सद्यः परुत्परार्यै
षमः परेद्यव्यद्यपूर्वेद्युरन्येद्युरन्यतरेद्यु रपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः एते निपात्यंते
द्युश्चोभयाद्वक्तव्यः उभयद्युः प्रकारवचने थाल् प्रकारवृत्तिभ्यः किमादिभ्यः थाल् तेनप्र
कारेण तथा यथा इदमस्थमुः थालोपवादः एतदोपिवाच्यः अनेन एतेनवाप्रकारेण
इत्थं किमश्च केनप्रकारेण कथं इतिप्राग्दिशीया दिक्शब्देभ्यःसप्तमीपंचमी अथ १९२

माभ्योदिग्देशकालेष्वस्ताति सप्तम्याद्यंतेभ्यो दिग्शिब्देभ्यः दिग्देशकालवृत्तिभ्यःस्वार्थेऽस्ता
तिः पूर्वाधरावराणामसिपुरधवश्चैषां पूर्वेभ्योऽस्तात्यर्थेऽसिः अग्नेश्चैषां पुरअधअव् स्यादेशा
स्युः अस्तातिच पूर्वादीनांपुरादयःस्युः पूर्वस्यां पूर्वस्याः पूर्वावा दिक्पुरःपुरस्तात् अधः
अधस्तात् अवः विभाषावरस्य अवस्तात् अवरस्तात् पूर्वदेशकालेच दिग्शिब्देभ्यःकिं
ऐन्द्र्यांवसति सप्तम्याद्यंतेभ्यःकिं पूर्वंग्रामंगतः दिगादिवृत्तिभ्यःकिं पूर्वस्मिन्गुरौवसति
अस्तातिचेतिज्ञापकादस्तिरस्तातिनबाधते दक्षिणोत्तराभ्यामतसुच् अस्तातेरपवादः द
क्षिणतः उत्तरतः विभाषापरावराभ्यां परतः परस्तात् अवरतः अवरतः अवरस्तात्
अंचेर्लुक् अंचत्यंतात्तु दिक्शब्दादस्तातेर्लुक्तद्धितलुकि प्राच्यां प्राच्याः प्राचीवादिक्

म.ति.
को.
१९३
193

प्राक् उदक् उपर्युपरिष्टात् निपातौ वेतौ पश्चात् तथा उत्तराधरदक्षिणादातिः उत्तरात्
अधरात् दक्षिणात् एनबन्यतरस्यामदूरेऽपंचम्याः उत्तरादिभ्य एनप् वासादवध्यवधिमतोः
सामीप्ये पंचम्यंतात्वन् उत्तरेण अधरेण दक्षिणेन पक्षे यथासंख्यं प्रत्ययाः इह केचित् दिक्श
ब्दमात्रादेनपूर्वमाहुः पूर्वेण ग्रामं दक्षिणादाच अस्तातेर्विषये दक्षिणाः वसंति अपंचम्या
इत्येव दक्षिणादागतः आहि च दूरे दक्षिणा दूरे आहिस्यात् त्वाहाच् दक्षिणाहि दक्षिणा
उत्तराच्च उत्तराहि उत्तरा संख्याया विधार्थे धा क्रियाप्रकारे वर्त्तमानात् संख्याशब्दात् स्वार्थे
धा स्यात् चतुर्धा एकाद्धा ध्यमुञ्ज अन्यतरस्यां एकध्यं एकधा द्वित्र्योश्च धमुञ् आभ्यां धाया उप
स्यात्सृज्वा द्वैधं द्विधा त्रैधं त्रिधा एधाच्च द्वेधा त्रेधा याप्ये पाशप् कुत्सितो भिषक् भि १९३

विकल्पार्थः तीयादीकक् स्वार्थे वा वाच्यः द्वैतीयीकः द्वितीयः तार्तीयीकः तृतीयः न वि
द्यायाः द्वितीयात्तृतीयाद्विद्यायामेव एकादाकिन्चासहाये चात्कन्लुकौ एकः एकाकी ए
ककः भूतपूर्वे चरट् आढ्यो भूतपूर्वः आढ्यचरः षष्ठ्या रूप्य च षष्ठ्यन्ताद्भूतपूर्वेर्थे रूप्यः
स्यात् चरट् च कृष्णस्य भूतपूर्वा गौः कृष्णरूप्यः कृष्णचरः अतिशायिने तमबिष्ठनौ अ
तिशयविशिष्टार्थवृत्तेः स्वार्थे एतौ स्तः अयमेषामतिशयेनाढ्यः आढ्यतमः लघुतमो
लघिष्ठः तिङश्च तिङन्तादतिशायने द्योत्ये तमप् स्यात् तरप्तमपौ घः एतौ घसंज्ञौ स्तः
किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे किमः एतदन्तात् तिङोऽव्ययाच्च यो घस्तदन्तादाम् स्या
त् न तु द्रव्यप्रकर्षे किन्तमां पचतितमां प्राह्णेतमां उच्चैस्तमां द्रव्यप्रकर्षेन्न एवंयोर

म॰ सि॰ कौ॰ १५४ 194

पवादः अयमनतिशायेनलघुः लघुतरो लघीयान् उदीच्याः प्राचेभ्यः पटुतराः पटीयांसः
अजादीगुणवचनादेव इष्ठन्नीयसुनौ नेह पाचकतरः पाचकतमः प्रशस्यस्यश्रः अस्य
आदेशः स्यात् इष्ठेयसोः परतः प्रकृत्यैकाच इष्ठादिष्वेकाच्प्रकृत्या श्रेष्ठः श्रेयान् ज्य
च प्रशस्यस्यज्यादेश इष्ठेयसोः ज्येष्ठः ज्यादादीयसः आदेः परस्य ज्यायान् वृद्धस्यच ज्यादे
शः अजाद्योः ज्येष्ठः ज्यायान् अन्तिकबाढयोर्नेदसाधौ अजाद्योः नेदिष्ठः नेदीयान् सा
धिष्ठः साधीयान् स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरे पूर्वस्यचगुणः परं यणा
दिलुप्यते पूर्वस्यचगुणः इष्ठादिषु स्थविष्ठः दविष्ठः यविष्ठः ह्रसिष्ठः क्षेपिष्ठः क्षोदिष्ठः
एवमीयसुन् ह्रस्वक्षिप्रक्षुद्राणां पृथ्वादित्वाद्ध्रसिमा क्षेपिमा क्षोदिमा प्रियस्थिरस्फि १५४

रोरुबहुलगरुतृप्रदीर्घवृंदारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रप्द्राघिवृंदाः प्रियादीनांक्र
मात्स्युरिष्ठादिषु प्रेष्ठः स्थेष्ठः स्फेष्ठः वरिष्ठः बंहिष्ठः गरिष्ठः वर्षिष्ठः त्रपिष्ठः द्राघिष्ठः वृं
दिष्ठः एवमीयसुन् प्रियोरुबहुलदीर्घाणां पृथ्वादित्वात् इमनिप् अपि बहोर्लोपोभूचबहोः
बहोःपरयोरिमेयसोर्लोपःस्याद्बहोश्चभूरादेशः भूमाभूयान् इष्ठस्ययिट्च बहोःपरस्य
इष्ठस्यलोपःयिडागमश्च भूयिष्ठः विन्मतोर्लुक् विनोर्मतुपश्चलुक्स्यात् इष्ठेयसोः अति
शयेनस्रग्वी स्रजिष्ठः अतिशयेनत्वग्वान् त्वचिष्ठः त्वचीयान् प्रशंसायांरूपप् सुवैता
न्निङंताच्च प्रशस्तःपटुः पटुरूपः प्रशस्तंपचतिपचतिरूपं ईषदसमाप्तौकल्पप्देश्यदेशी
यरः ईषदूनोविद्वान्विद्वत्कल्पः विद्वद्देश्यः विद्वद्देशीयः पचतिकल्पं पचतिकल्पं देश्यदेशी

यरः ईषदूनो विद्वान् विद्वत्कल्पः विद्वद्देश्यः विद्वद्देशीयः पचतिकल्पं यशास्कल्पं यजुष्कल्पं
यजुष्कल्पं विभाषासुपो बहुच् पुरस्तात् ईषदसमाप्तिविशिष्टेर्थे सुबन्तात् बहुच् वा स्यात् सच प्रा
गेव नतु परः ईषदूनः पटुः बहुपटुः पटुकल्पः सुपः किं यजतिकल्पं प्रागिवात्कः इवे प्रति
कृताविभ्यतः प्राक् काधिकारः अव्ययसर्वनाम्नामकच् प्राक् टेः कापवादः तिङश्चेत्यनुवर्तते
कस्य चदः कोन्ताव्ययस्य दकारोन्तादेशोऽकच्च अज्ञाते कस्यायमश्वोऽश्वकः उच्चकैः नीचकैः
सर्वके पचतकि यकित् हिरक्रात् कुत्सिते कुत्सितोश्वोऽश्वकः अल्पे अल्पतैलं तैलकं ह्रस्वो
वृक्षो वृक्षकः अस्मिन् प्रकरणे हलादौ प्रत्यये द्वितीयादचः परस्य लोपो वा वाच्यः देवदत्तकः दे
वकः लोपः पूर्वपदस्य [illegible] विनापि प्रत्ययेपूर्वोत्तरपदयोर्लोपो वा वाच्यः देवदत्तः दत्तः देवः

मत्समामामामा ह्रस्वा कुटी कुटीरः शमी शमीरः शुंडा शुंडारः ह्रस्वा कुटी कुटीरः शमीरः शुंडारः कुत्वाडुपच्

ह्रस्वः कुतूपः कुतुः कृत्तेः स्नेहपात्रे ह्रस्वा सा कुतूपः प्रमात्र कासूगोणीभ्यां ष्टरच् आयु

धविशेषः कासूः ह्रस्वा सा कासूतरी गोणीतरी वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे ष्टरच् वत्सतरः

उक्षतरः अश्वतरः ऋषभतरः किंयत्तदो निर्धारणे द्वयोरेकस्य डतरच् अनयोः कतरो वैष्णवः

यतरस्ततरः वा बहूनां जातिपरिप्रश्ने डतमच् बहूनां मध्ये निर्धारणे डतमज्वा स्यात् जातिपरि

प्रश्न इति प्रत्याख्यातमाकरे कतमो भवतां कठः यतमस्ततमः वा ग्रहणमकजर्थं यकः स

कः एकाच्च प्राचां डतरच् डतमच्च स्यात् अनयोरेकतरो मैत्रः एषामेकतमः इति प्रागिवीयाः

इवे प्रतिकृतौ कन् स्यात् अश्व इव प्रतिकृतिः अश्वकः शाखादिभ्यो यः शाखेव शाख्यः मुख्यः

म·सि·कौ· १९६ 196 जचन्यः अमन्यः शारणयः कुशाग्राक्षः कुशाग्रीयः तत्प्रकृतवचनेमयट् प्राचुर्येणप्रस्तुतंप्र
कृतं तस्यवचनंप्रतिपादनं भावेधिकरणेवाल्युट् आद्येप्रकृतमन्नमन्नमयं अपूपमयं द्वि
तीयेअन्नमयोयज्ञः अपूपमयंपर्व संख्यायाःक्रियाभ्यावृत्तिगणनेकृत्वसुच् अभ्यावृत्ति
र्जन्म क्रियाजन्मगणनवृत्तेःसंख्यायाःस्वार्थेकृत्वसुच् पंचकृत्वोभुंक्ते संख्यायाःकिं भूरिवा
रान्भुंक्ते द्वित्रिचतुर्भ्यःसुच् कृत्वसुचोपवाद द्विर्भुंक्ते त्रिर्भुंक्ते रात्सस्य चतुः एकस्यसकृच्च
सकृद्देशः चास्य सकृद्भुंक्ते देवतांतात्तादर्थ्येयत् तदर्थमेवतादर्थ्यं अतएवस्वार्थेष्यञ्
अग्निदेवतायैइदं अग्निदेवत्यं पादार्घाभ्यांच पादार्थमुदकंपाद्यं अर्घ्यं अतिथेर्ञ्यः अति
थेर्ञ्यः अतिथये इदंआति[illegible] नवस्यनूआदेशः त्नप्तनप्खाश्चवाच्याःस्वार्थे नूत्नं नूत १९६

नं नवीनं भागरूपनामभ्यो धेयः भागधेयं रूपधेयं नामधेयं आग्नीध्रसाधारणादञ्
आग्नीध्रं साधारणं देवात्तल् देवएवदेवता अवेःकः अविरेवअविकः यावादिभ्योकन्
यावएवयावकः मणिकः सर्वप्रातिपदिकेभ्यः स्वार्थेकन् बहुतरके मृदस्तिकन् मृदेवमृत्ति
का सस्नौप्रशंसायां रूपोपवादः प्रशस्तामृत् मृत्सा मृत्स्ना प्रज्ञादिभ्यश्चअण् स्यात् प्रज्ञ
एवप्राज्ञः प्राज्ञीस्त्री देवताएवदैवतः बांधवः इगाञ्जोग्रामणीरवीत् स्वार्थेनानाजातीया
अनियतवृत्तयोर्थकामप्रधानाः संघाः पूगाः तद्वाचिकाञ्ञः स्यात् लौहितध्वज्यः त्र्यादयस्त
द्राजाःस्ववद्राजस्येतिलुक् लोहितध्वजाः व्रातेतिञ्यः कापोतपाक्यः कपोतपाकाः कौंजायन्याः
ब्राध्नायनाः इत्यादि बह्वल्पार्थाच्छस् कारकादन्यतरस्यां बहूनिददातिबहुशः अल्पशः ब

म॰ सि॰
कौ॰
१९८
197

ह्वल्पार्थात् मंगलामंगलवचनेनेह बहूनि ददाति अनिष्टेषु अल्पं आभ्युदयिकेषु संख्यैकवचना
च्च वीप्सायां द्वौ द्वौ ददाति द्विशः माषं माषं माषशः प्रस्थशः परिमाणिशब्दाद्वृत्तावेकार्थीपव
संख्यैकवचनात् किं घटं घटं ददाति वीप्सायां किं द्वौ ददाति कारकादित्येव द्वयोः स्वामी प्रति
योगे पंचम्यास्तसिः प्रतिना कर्मप्रवचनीयेन योगे या पंचमी विहिता तदंतात्तसिः प्रद्युम्नः
कृष्णतः प्रति आद्यादिभ्य उपसंख्यानं आदौ आदितः मध्यतः पृष्ठतः अंततः पार्श्वतः
आकृतिगणोयं स्वरेण स्वरतः वर्णतः कृभ्वस्तियोगे संपद्यकर्तरि च्विः अभूततद्भावइ
ति वक्तव्यं विकारात्मतां प्राप्नुवत्यां प्रकृतौ वर्त्तमानात् विकारशब्दात्स्वार्थे च्विर्वा स्यात् करोत्या
दिभिर्योगे अस्य च्वौ ईत् [illegible]लोपः च्व्यंतत्वादव्ययत्वं अकृष्णः कृष्णः संपद्यते तं करोति [illegible] १९८

स्तीकरोति अह्नीभवति गेहीस्यात् अव्ययस्यच्वयीत्वनेनिवाच्य दोषाभूतमहः दिवाभूतारा
त्रिः क्वचोश्च हलःपरस्याप्रत्ययस्यलोपःक्वेच्वोचपरे गार्गीभवति च्वौच पूर्वस्यदी
र्घः शुचीभवति पटूस्यात् अरुर्मनश्चक्षुश्चेतोरहोरजसांलोपश्च चात्च्विः अरूकरोति उन्म
नीकरोति उच्चक्षूकरोतिविचेतीकरोति विरहीकरोति विरजीकरोति विभाषासातिकार्त्स्न्ये
च्विविषये सातिर्वास्यात् साकल्ये साम्पदाद्योः कार्त्स्न्येनशस्त्रमग्निःसंपद्यते अग्निसाद्भवति अ
ग्नीभवति महाविभाषयावाक्यमपि कार्त्स्न्येकिंएकदेशेनअग्नीभवतिपटः अभिविधौसंप
दाच संपदाकृभ्वस्तिभिर्योगेसातिर्वाव्याप्तौ पदेकृभ्वस्तियोगेच्विः संपदात्वाक्यमेव अग्नि
सात्संपद्यते अग्निसाभवतिशस्त्रं अग्नीभवति जलसात्संपद्यते जलीभवतिलवणं नद

म॰सि॰
कौ॰
१९८
198

धीनवचनेसातिः कृभ्वस्तिभिः संपदाचयोगे राजसात्करोतिराज्ञाधीनमित्यर्थः देयेत्राच तदधी
नेदेयेत्रास्यात् सातिस्त्रकारिद्वयोगे विप्राधीनंदेयंकरोति विप्रत्राकरोति विप्रत्रासंपद्यतेपदे
विप्रसात्करोति देयेकिं राजसाद्भवतिराष्ट्रं देवमनुष्यपुरुषपुरुमर्त्येभ्योद्वितीयासप्तम्योर्व
हुलं घभ्योद्वितीयांतेभ्यःसप्तम्यंतेभ्यश्चत्रास्यात् देवत्रावदेरमेवा वहुलोक्तेरन्यत्रापिवहुत्रा
जीवतोमनः अव्यक्तानुकरणात्ह्यजवराद्धादनितौडाच् ह्यजवरंन्यूनं ननतनोन्यूनं अनेका
चेतियावत्ताहशमर्द्धंयस्यतस्मात्डाच् कृभ्वस्तिभिर्योगेडाचिवहुलंद्वेभवति डाचिविव
क्षितेद्वित्वं नित्यमाम्रेडितेडाचीतेवक्तव्यं डाचपरंयदाम्रेडितंतस्मिन्परे पूर्वपरयोर्वर्णयोः
पररूपंस्यात् इतितपयोः[illegible] पटपटाकरोति अव्यक्तानुकरणात्किं दृषत्करोति ह्यजवरा १९८

ड्वीतिं अव्यक्तं करोति अव्यक्तेऽनुकरणे पटपटाकरोति अनितेनाकरोति कृञो द्वितीयशंवबीजात्कृ
षौ द्वितीयादिभ्योडाच् कृञ एव योगे कर्षणेऽर्थे बहुलोकेऽव्यक्तानुकरणान्यस्यडाचिन द्वि
द्वित्वं द्वितीयं तृतीयं कर्षणं करोति द्वितीयाकरोति तृतीयाकरोति शंवशब्दः प्रतिलोमे
अनुलोमं कृष्टं क्षेत्रं पुनः प्रतिलोमं कर्षति शंवाकरोति बीजाकरोति संख्यायाश्च गुणान्ता
याः द्विगुणाकरोति क्षेत्रं समयाच्च यापनायां कृषाविति निवृत्तं समयाकरोति कालं या
पयतीत्यर्थः सपत्र निष्पत्रादतिव्यथने सपत्राकरोति मृगं सपुंखशरप्रवेशनेन सपत्रं
करोतीत्यर्थः निष्पत्राकरोति सपुंखशरस्यापरपार्श्वे निर्गमनान्निष्पत्रं करोतीत्यर्थः अ
तिव्यथने किं सपत्रं निष्पत्रं करोति भूतलं निष्कुलान्निष्कोषणे निष्कुलाकरोति दाडिमं

म॰ सि॰
कौ॰
१५५
199

निर्गते तुल्यमनेनरवयवानां समम्होयस्मादितिवज्रव्रीहेर्डाच् सुखप्रियादानुलोम्ये सुखाक
रोतिगुरुं मनकूलाचरणेनानंदयतीत्यर्थः दुःखात्प्रातिलोम्ये दुःखाकरोतिस्वामिनं
पीडयतीत्यर्थः शूलात्पाके शूलाकरोतिमांसं शूलेनपचतीत्यर्थः सत्यादशपथे स
त्याकरोतिभांडंवणिक् केतव्यमितितथ्यंकरोतीत्यर्थः शपथेनसत्यंकरोतिविप्रः मद्रा
त्परिवापणे मद्रशब्दोमंगलार्थः परिवापणंमुंडनं मद्राकरोतिकुमारं मंगल्यमुंडनेनसं
स्करोतीत्यर्थः भद्राच्चेतिवक्तव्ये भद्राकरोति अर्थःप्राग्वत् परिवापणेकिं भद्रंकरो
ति मद्रंकरोति ॥ इतितद्धितप्रक्रिया सर्वस्यद्वेइत्याधिकृत्य परेर्वर्जने परिपरिवंगे
भ्योवृष्टोदेवः उपर्यध्यधसःसामीप्ये उपर्युपरिग्रामं ग्रामस्योपरिष्टात्समीपदेशेइ १५५

त्यर्थः उपर्यधिसमत्वे सविशेषणविशिष्टत समीपकाले ऽधःस्थितमर्थः उपर्युपरि लोकं लोकस्याथ
स्तात्समीपदेशेऽधस्तदर्थः वाक्यादेरामंत्रितस्यासूयासंमतिकोपकुत्सनभर्त्सनेषु संदरसुंदराऽहृ
ष्याने सौंदर्यं देवदेव योऽसि दुर्विनीत दुर्विनीतास्यामि पापकर्मन्भर्त्सनेऽथ चोर चोर घातयि
ष्यामित्वां एकैकबहुव्रीहिवत् द्विरुक्तएकशब्दो बहुव्रीहिवत् तेन सुब्लोपपुंवद्भावौ एकैक
मक्षरं एकैकयाऽऽहुत्या ग्रावापेच पीडायां द्वयोर्यो द्वयोर्यो हेतौ बहुव्रीहिवच्च ग
तगतः गतगता एक देवचमत्कारस्य साहृदये योऽन्यैकाणावचनस्य हेतुत्वस्य कर्मधारय
वत् पटुपट्वी पटु पटुः सहृषार्श्वमतद्विरुक्तिः यावत् ग्रामस्य पूर्वे हेवाचे गलेनस्यूलः संभ्रमे
लाप्रकृतौ यथेष्टमनेकधा प्रयोगो न्यायसिद्धः सर्पः २ बुध्यस्व २ सर्पः ३ बुध्यस्व ३

कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये समासवच्च बहुलं बहुलग्रहणादन्यपरयोर्न समासवत्
इतरयोस्तु नित्यं असमासवद्भावे पूर्वपदस्य सुपः सुर्वक्तव्यः अन्योन्यं विप्रा नमंति अन्यो
न्यौ अन्योन्यान् अन्योन्येन कृतं अन्योन्यस्मै दत्तं इत्यादि स्त्रीनपुंसकयोरुत्तरपदस्थाया
विभक्तेराम्भावो वा वाच्यः अन्योन्यां अन्योन्यं परस्परां परस्परं इतरेतरां इतरेतरं वा इमे
ब्राह्मण्यौ कुले वा भोजयतः द्वंद्वैकशेषयोरभावः क्लीबे चाद्विरहः स्वमेः समासे सोल्लुक्चे
ति सिद्धं वाङ्गलकात्त्रयं परस्परं अन्योन्यं इत्यादौ द्वंद्वैकशेषाप् अदुत्तरेप्स्वदृवप्राप्तः
अन्योन्यसंसक्तमहस्त्रियामं अन्योन्यसंश्रयः परस्पराहितसाहाय्यं अदृष्टपरस्परैरित्या
दौ सोऽलुक्च प्राप्तः सर्वं वाङ्गलकात्समाधेयं इति द्विरुक्तप्रक्रिया समाप्ता ॥ अष्टोस्या १२

नासिकानासापुटः कंठः स्मितस्तथा जिह्वामूलं लवं तालुमध्यनासिकोष्ठौ च तालु च १ हकारं
पंचमैर्युक्तमंतस्थाभिश्च संयुते उरस्यं ते विजानीयात् कंठमाहुरसंयुते २ स्त्रियां अपि
कारो यं समर्थानामिति यावत् अजाद्यतष्टाप् अजादीनामकारांतस्य च वाच्यं यत्स्त्रीत्वं
तत्र द्योत्ये टाप्स्यात् अजा अजादिभिः स्त्रीत्वविशेषणान्नेह पंचाजी अत्र द्विसमासार्थेस
माहारनिष्ठस्त्रीत्वे अतः षट्वा अजा एडका चटका मूषिका बाला वत्सा होढा मेदा
विलाता संभस्त्राजिनशणपिंडेभ्यः फलात् संफला भस्त्रफला इत्यादि सदच्कांडप्रां
तशतैकेभ्यः पुष्पात् सत्पुष्पा प्राक्पुष्पा प्रत्यक्पुष्पा शूद्राचामहत्पूर्वाजातिः शू
द्रा पुंयोगेन शूद्री अमहत्पूर्वेति किं महाशूद्री क्रुंचा उष्णिहा देवविशा ज्येष्ठा कनिष्ठा

उगिदचामितिनुम्

म. सि. कौ. १२१ 201

मध्यमा पुंयोगेपि कोकिला जातावपि मूलान्नञः अमूला उगितश्च ङीप् भवंती पचं-
ती वनोरच्च वन्नंतात्तदंताच्च ङीप्स्यात् रश्चांतादेशः सुत्वानमतिक्रांता अतिसुत्वरी अति-
धीवरी शार्वरी वनो न हशः हशंताद्धातोर्विहितो यो वन् तदंतात्तदंतांताच्च प्रातिपदि-
कान्न ङीप् रश्चान्तादेशः ओणृ अपनयने वनिप् विड्वनोरित्यात्वे अवावा अवावरी ब्रा-
ह्मणी राजयुध्वा बहुव्रीहौ वा बहुधीवा बहुधीवरी पादोन्यतरस्यां पाच्छब्दः कृतसमा-
सांतः तदंतात्प्रातिपदिकान्ङीप्स्यात् द्विपदी द्विपात् टाबृचि द्विपदा ऋक् एकपदा
मनः मन्नंतान्न ङीप् सीमा सीमानौ अनो बहुव्रीहेः अन्नंताद्बहुव्रीहेर्न ङीप् बहुयज्वा बहुय-
ज्वानौ डाबुभाभ्यामन्यतरस्यां सूत्रद्वयोपात्ताभ्यां डाप् वा स्यात् सीमे सीमानौ दामानौ १२१

प्रत्ययस्थात्ककारात्पूर्वस्याकारस्येकारः स्यादापि परे सुपः परो न चेत्

दामे अनउपधालोपिनोन्यतरस्यां अन्नन्ताद्बहुव्रीहेरुपधालोपिनो वा ङीप् पक्षे डाप्प्रति

ङीप् ङीप् डाप् ङीप्निषेधे राजन्वत्

षेधौ बहुराज्ञी बहुराज्ञ्यौ बहुराजे बहुराजानौ प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः

आप्यसुपः परो नचेत् सर्विका कारिका अतः किं नौका प्रत्ययस्थात् किं शक्नोतीति शा

का असुपः किं बहुपरिव्राजका नगरी मामकनरकयोरुपसंख्यानं मामिका न

रिका त्यक्त्यपोश्च दाक्षिणात्यिका इहत्यिका न यासयोः यत्तदोस्तेन्न यका सका

त्यकनश्च निषेधः उपत्यका अधित्यका आशिषि वुनश्च न जीवका भवका उत्त

रपदलोपेन देवदत्तका देवका क्षिपकादीनां च क्षिपका ध्रुवका चटका कन्यका

तारका ज्योतिषि अन्यत्र तारिका वर्णका तान्तवे अन्यत्र वर्णिका वर्तका शकुनौ

प्राचां उदीचांतुवर्त्तिका अष्टकापितृदेवत्ये अष्टिकान्या सूतका पुत्रका वृंदारकाएषां
वेतिवक्तव्ये वृंदारका वृंदारिका एषोवाअकारोभवतीत्यर्थः सूतिका सूतकाउत्यादि
उदीचामातःस्थानेयकपूर्वायाः यकपूर्वस्यस्त्रीप्रत्ययस्यातःस्थानेयोऽतस्तस्मात्पूर्वस्ये
दापिपरे केणइतिह्रस्वः आर्यका आर्यिका चटकिका चटकका आतःकिं सां
काश्येभवासांकाश्यिका यकेतिकिं अश्विका स्त्रीप्रत्ययःकिं शुभंयिका अभाषितपुं
स्काच्च एतस्माद्विहितस्यातःस्थानेउद्वा गंगिका गंगका आचार्याणांसर्वत्रविधे
ये गंगाका अनुपसर्जनात अधिकारोयं यूनस्तिरित्यभिव्याप्य डिड्ढाणञ्द्वयसज्द
घ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः अनुपसर्जनंयट्टिडादितदंतंयदंतं ततःङीप्कु

चरी उपसर्जनत्वान्नेह बहुकुरुचरा नदट् नदी देवट् देवी सौपर्णेयी ऐंद्री औत्सी
ऊरुद्वयसी ऊरुदघ्नी ऊरुमात्री पंचतयी आक्षिकी लावणिकी यादृशी इत्वरी नञ्
स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानं स्त्रैणी पौंस्नी शाक्तीकी आढ्यंकरणी क
थंकरणी तरुणी तलुनी यञश्च यञंतात्ङीप्स्यादकारलोपे कृते हलस्तद्धितस्य हल
उत्तरस्योपधाभूतस्य तद्धितयस्य लोपः स्यादीति गार्गी प्राचां ष्फः तद्धितः यञंतात्ष्फो
वा गार्ग्यायणी वयसि प्रथमे प्रथमवयोवाचिनोऽदंतात्ङीप् कुमारी वयस्यचरम
इति वाच्यं वधूटी चिरंटी द्विगोः अदंतात्ङीप् त्रिलोकी अजादित्वात्त्रिफला अनीका
सेना अपरिमाणबिस्ताचितकंबल्येभ्यो न तद्धितलुकि अपरिमाणांताद्बिस्तादेर्द्वि

ताच्चद्विगोर्नङीप् तद्धितलुकि पंचभिरश्वैः क्रीताः पंचाश्वा आर्हीयष्ठक् अध्यर्धेतिलुक्
द्वौविस्तौपचतिद्विविस्ता द्व्याचिता द्विकंबल्या परिमाणान्तु द्व्याढकी तद्धितलुकिकिं
समाहारे पंचाश्वी कांडानात् क्षेत्रे क्षेत्रेयःकांडांतोद्विगुस्ततोनङीप्तद्धितलुकि द्वे
कांडेप्रमाणमस्याःद्विकांडा क्षेत्रभक्तिः मात्रचः प्रमाणेलोद्दितोद्विगोर्नित्यमितिलुक्
क्षेत्रेकिंद्विकांडीरज्जुः पुरुषात्प्रमाणेन्यतरस्यां प्रमाणेयःपुरुषःतदंतात्द्विगोङीब्वा
तद्धितलुकि द्वौपुरुषौप्रमाणमस्याःद्विपुरुषी द्विपुरुषावापरिखा ऊधसोनङ् ऊधों
तस्यबहुव्रीहेरनङ्स्त्रियां बहुव्रीहेरूधसोङीष् ऊधोंताद्बहुव्रीहेःङीष् घटोध्नी स्त्रियांकिं
घटोधः धेनुकं दामहायनांताच्च संख्यादेर्बहुव्रीहेःदामांताद्धायनांताच्चङीप् द्विदाम्नी

द्विहायनी वाला त्रिचतुर्भ्यां हायनस्य णत्वं वाच्यम् वयोवाचकस्यैव हायनस्य ङीप्णत्वे
चेष्यते त्रिहायणी चतुर्हायणी वयसोऽन्यत्र त्रिहायना चतुर्हायना शाला अन्तर्वत्पतिवतो
र्नुक् नोऽन्तता ङीप् अन्तर्वत्नी पतिवत्नी गर्भभर्तृसंयोग एवेष्यते अन्यत्र तु अन्तरस्यां शा
लायामित्युक्तं पतिमती पृथिवी पत्युर्नो यज्ञसंयोगे पतिशब्दस्य नकारादेशः स्यात्स च य
ज्ञसंबंधे वसिष्ठस्य पत्नी विभाषा सपूर्वस्य पतिशब्दान्तस्य नो वा गृहपत्नी गृहपतिः
दृढपत्नी दृढपतिः नित्यं सपत्न्यादिषु सपत्नी एकपत्नी वीरपत्नी शतक्रतोरैच्च
शतक्रतोः स्त्री पूतक्रतायी वृषाकप्यग्निकुसितकुसिदानामुदात्तः एषामुदात्त ऐदादेशो ङीप्
च वृषाकपेः स्त्री वृषाकपायी अग्नायी कुसिता कुसिदायी मनोरौ वा मनुशब्दस्यौ

म.सि.
कौ.
२.४

204

कारादेशः उदात्तेकारश्च वाताभ्यांसन्नियोगशिष्टोङीप्च मनायी मनावी मनुः वर्णादनु
दात्तात्तोपधात्तोनः वर्णवाचीयस्तोपधस्तदंतादनुदात्ताद्ङीप्तस्यचनः एता एनी रोहिता रोहि
णी षिद्गौरादिभ्यश्चङीष् नर्त्तकी गौरी अनडुही अनड्वाही पिप्पल्यादिभ्यश्च आकृ
तिगणोयं मत्स्यस्यङ्यांयलोपः मत्सी जानपदकुंडगोणस्थलभाजनागकालनीलकु
शकामुककबराद्वृत्त्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनायोविकारमै
थुनेच्छाकेशवेशेषु एकादशभ्यः क्रमाद्वृत्त्यादिष्वर्थेषुङीष् जानपदीवृत्तिश्चेत् अन्या
जानपदी अजंतत्वात्ङीपि आद्युदात्तः भाजीश्राणाचेत् अन्यत्रभाजा यवागूरुह्स्निका
श्राणाविलेपीनरलाचसा शोणात्प्राचां शोणी शोणा वोतोगुणवचनात् उदंता २.४

तरुणवाचिनो वाचिनो वा ङीष् मृद्वी मृदुः उतः किं शिति गुणोक्तिति किं आखुः खरुसं
योगोपधान्न खरुः पांडुः बह्वादिभ्यश्च वा ङीप् बहुः बह्वी कृदिकारादक्तिन रा
त्रिः रात्री सर्वतोक्तिन्नर्थादित्येके शकटिः शकटी पुंयोगादाख्यायां या पुमाख्या
पुंयोगात्स्त्रियां वर्त्तते ततो ङीष् गोपस्य स्त्री गोपी पालकांतान्न गोपालिका अश्व
पालिका सूर्याद्देवतायां चाप् सूर्यस्य देवता स्त्री सूर्या इंद्रवरुणभवशर्वरुद्रमृड
हिमारण्ययवयवनमातुलाचार्याणामानुक् ङीष् च इंद्राणी हिमारण्ययोर्महत्त्वे ।
महद्धिमं हिमानी अरण्यानी यवाद्दोषे दुष्टो यवो यवानी यवनाल्लिप्यां यवना
नी लिपिर्यवनानी मातुलोपाध्याययोरानुग्वा मातुलानी मातुली उपाध्याया

म. सि. कौ. २५ 205

नी उपाध्यायी आचार्यादणत्वंच आचार्यादणत्वंच आचार्यानी अर्यक्षत्रियाभ्यांवास्वा

र्थे अर्याणी अर्या क्षत्रियाणी क्षत्रिया पुंयोगेतु अर्यी क्षत्रियी क्रीतात्करणपूर्वात्

क्रीतात् अदन्तात्करणादेर्ङीष् वस्त्रक्रीती क्वचिन्न धनक्रीता क्तादल्पाख्यायां कर

णादेः क्तान्तादन्तात्स्त्रियांङीष्स्यात् ऊरुभिन्नी अस्वाङ्गपूर्वपदाद्वा एवंणनित्येप्रा

प्ते विकल्पोयं सुरापीती सुरापीता स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् असंयोगोप

धमुपसर्जनंयत्स्वाङ्गंतदन्ताद्वाङीष् केशानतिक्रान्ता अतिकेशी अतिकेशा चन्द्रमु

खी संयोगोपधात्तु सुगुल्फा अद्रवंमूर्तिमत्स्वाङ्गंप्राणिस्थमविकारजं अतत्स्थंतत्र

दृष्टंचतेनचेत्तत्तथायुतं । सुस्वेदा द्रवत्वात् सुज्ञाना अमूर्तत्वात् सुमुखाशाला २५

अप्राणिस्थत्वात् सुशोफा विकारजत्वात् सुकेशी सुकेशा वा रथ्या अप्राणिस्थस्यापि प्रा
णिनि दृष्टत्वात् सुस्तनी सुस्तना वा प्रतिमा प्राणिवत् प्राणिसदृशे स्थितत्वात्
नासिकोदरौष्ठजंघादंतकर्णशृंगाच्चवाङीष् तुंगनासिकी तुंगनासिका पुच्छाच्च सु
पुच्छी सुपुच्छा कवरमणिविषशरेभ्यो नित्यं चित्रंपुच्छंयस्यासाकवरपुच्छीइत्यादि उ
पमानात्पक्षाच्च पुच्छाच्च नित्यमित्येव उलूकपक्षीशाला उलूकपुच्छीसेना नक्रोडादि
बह्वचः क्रोडादेर्बह्वचश्चस्वांगान्नङीष् कल्याणक्रोडा आकृतिगणोयं सुजघना
सहनञ्विद्यमानपूर्वाच्चनङीष् सकेशा अविद्यमाननासिका नखमुखात्संज्ञायांङी
ष्न शूर्पणखा गौरमुखा संज्ञायांकिं ताम्रनखी कन्या वाहः वाहंतात्ङीष्च दि

म. सि.
कौ.
२०८
206

यौही सत्वशिम्बीतिभाषायां मत्ती अशिम्बी जातेरस्त्रीविषयादयोपधात् जातिवा
चियत्तन्नचस्त्रियां नियतमयोपधंतत्तोस्त्रियांङीष् आकृतिग्रहणाज्जातिलिंगानांचनस
र्वभाक् सकृदाख्यातनिर्ग्राह्यागोत्रंचचरणैःसह १ तटी वृषली औपगवी कठीजातेः
किं मुंडा अस्त्रीविषयात्किं बलाका अयोपधात्किं क्षत्रिया योपधप्रतिषेधे गवयह
यहयमुकमनुष्यमत्स्यानामप्रतिषेधः गवयी हयी मुकयी मनुष्यी मत्सी पा
ककर्णपर्णपुष्पफलमूलवालोत्तरपादाच्च पाकाद्युत्तरपदाज्जातिवाचिनःस्त्रीविष
यादपिङीष् ओदनपाकी शंकुकर्णी शालपर्णी शंखपुष्पी दासीफली दर्भमूली गो
वाली ओषधीविशेषेरूढाएते इतोमनुष्यजातेः ङीष् दाक्षी मनुष्येतिकिं तित्तिरिः २०८

ऊङुतः उकारान्तादयोपधान्मनुष्यजातिवाचिन ऊङ् स्त्रियां कुरूः पंगोश्च पंगूः श्वशुर
स्योकाराकारलोपश्च चादूङ् पुंयोगलक्षणङीषोपवादः श्वश्रूः ऊरूत्तरपदादौप
म्ये उपमानवाचिपूर्वपदमूरूत्तरपदं यत्प्रातिपदिकं तस्मादूङ् करभोरूः संहि
तशफलक्षणवामादेश्च संहितोरूः सहितसहाभ्यां चेति वक्तव्यं सहितोरूः स
होरूः शार्ङ्गरवाद्यञो ङीन् शार्ङ्गरवादेरञो योऽकारस्तदन्ताज्जातिवाचिनो ङीन्
शार्ङ्गरवी बैदी नृनरयोर्वृद्धिश्च नारी. यङश्चाप् यङन्ताच्चाप् आम्बष्ठ्या कारीषगन्ध्या षा
षाद्यञश्चाप्वाच्यः पौतिमाष्या आवट्याच्चाप् यञश्चेति ङीपोपवादः अवटशब्दो गर्गा
दिः आवट्या यूनस्तिः युवनशब्दात्तिः युवतिः अनुपसर्जनादित्येव बहवो युवानो यस्यां

म॰ सि॰ कौ॰ २०७ 207

सावक्तव्या ध्रुवनीतियोनेःश्वात्रंतानड्रीपिबोध्यम् ❁ इतिस्त्रीप्रत्ययाः ❁ षष्ठीयुक्तश्छंद
सिवा पतिर्घ्याह्वोर्घिसंज्ञः क्षेत्रस्यपतिना वयं इहहेतियोगंविभज्यछंदसीत्यनुवर्त्तते तेनस
र्वेविधयश्छंदसिवैकल्पिकाः बह्वृलेछंदसीत्यादिरस्यैवप्रपंचः अयस्मयादीनिछंदसि भपद
संज्ञाधिकाराद्यथायोगंसंज्ञाद्वयंबोध्यम् तथाचवार्त्तिके उभयसंज्ञान्यपीतिवक्तव्यम् इ
तिसष्टुभास ऋक्वतागणेन पदत्वात्कुत्वं भत्वाज्जश्त्वाभावः नैनंहिन्वंत्यपिवाजिनेषु अत्र
पदत्वाज्जश्त्वं भत्वात्कुत्वाभावः तेप्राग्धातोः छंदसिपरेपि व्यवहिताश्च हरिभ्यांयाह्य
ह्योकआ आमन्द्रैरिंद्रहरिभिर्याहि तृतीयाचहोश्छंदसि जुहोतेः कर्मणितृतीयास्याद्द्वि
तीयाच यवाग्वाग्निहोत्रंजुहोति मंत्रेश्वेतवहोक्थशस्पुरोडाशोण्विन् श्वेतवहा[illegible]नांडस्य २०७

दस्येतिवक्तव्यम् यत्रपदत्वंभावितत्रायंनिषेधः इत्थवक्तव्यस्तत्पर्यः श्वेतवाः श्वेतवा
हौ श्वेतवाहः उक्थानि उक्थेषुचशंसति उक्थशाः यजमानः उक्थशासौ पुरोडाः पुरोदाशतेदीय
तेपुरोडाः अवेयजः अवयाः अवयाजौ अवयाजः अवयौः श्वेतनाः पुरोडाश्च एतेसं
बुद्धौनिपात्यंते चाउक्थशाः लिङर्थेलेट् विध्यादौहेतुहेतुमद्भावादौचधातोर्लेट्स्याच्छं
दसि सिब्बहुलंलेटि इतश्चलोपःपरस्मैपदेषु लेटस्तिङामितोलोपोवास्यात्परस्मैपदेषु
लेटोडाटौस्तः लेटः अडाटावागमौस्तः तौचपितौ सिब्बहुलंणिद्वक्तव्यः वृद्धिः प्रणआ
युंषितारिषत् सुपेशसस्करतिजोषषद्धि आसाविषद्दर्शसानाय सिपश्लेटः वृद्धिः प्र
णआयूंषितारिषत् सुपेशसस्करतिजोषषद्धि आसाविषद्दर्शसानाय सिपश्लेपस्स

म· सि·
कौ·
२·८
208

चाभावे पताति विद्युत्प्रियः सूर्ये प्रियो अग्ना भवाति स उत्तमस्य लेट उत्तमस्य सकारस्य वा लो
पः करवाव करवावः टेरेत्वे आत ऐ लेट आकारस्य ऐ सुतेभिः सुप्रियसामादयैते आता
मित्याकारस्य ऐ विधिसामर्थ्यादैट ऐत्वं न अन्यथा ऐट्टमेव विदध्यात् यो यजाति यजा
ते वैतोन्यत्र लेट एकारस्य ऐ स्याद्वा आत ऐ इत्यस्य विषयं विना पशूनामीशै ग्रहमध्यैते
अन्यत्र किं सुप्रयसामादयैते उपसंवादाशंकयोश्च पणावैये आशंकायां चलेइ अह
मेव पशूनामीशै नेज्जिह्मायंतो नरकं पताम व्यत्ययो वहुलं विकरणानां वहुलं व्यत्ययः
स्यात् छंदसि आंडा शुष्णस्य भेदति भिनत्तीति प्राप्ते जरसा मरते यतिः म्रियते इति प्रा
प्ते इंद्रो वस्तेन नेषतु नयतेर्लोटि शप्सिपौ द्वौ विकरणौ इंद्रेण युजा तरुषेम वृत्रं तरेम

इत्यर्थः तरतेर्विध्यादौ लिङ् उः मिथ्वेति विकर्षेरणा सन्निकृष्ट पग्रहः लिंगनशांताकालहलचच
कर्तृयज्ञोचकमास्ययमिच्छति शास्त्रकृद्देवामोपिच मिश्रातिवाङ्लिकेन धृगिवदत्तणायाः दक्षि
णस्यामितिप्राप्ते चषालेयेभ्यश्यूपायनतत्तानितन्तोनीतिरितिप्राप्ते उपग्रहः परस्मैपदात्मनेप
दे ब्रह्मचारिणमिच्छतेरिच्छतीतिप्राप्ते घ्रतीपमन्य ऊर्मिर्ढुन्नानि पुष्पानेऽतिप्राप्ते मथोऽहत्मा
श्वामतेमथुनश्रतिप्राप्ते नरः पुरुषः अथास दीर्घैर्दशाभिर्विरूपाविषूयांदितिप्राप्ते कालः
कालवाचकाः प्रत्ययाः स्रोमीनाथासमानेन लटो विधेयेलट् नमसोगाश्रुतव अधुत
दितिप्राप्ते मित्रवपंचस्वरयः मित्रावरुणमितिप्राप्ते लटःबन्धयस्तवद्यते कालस्मावः कारक
मात्रपरः तथाचतद्धा विनोक्तञ्ज न हितानातत्प्रत्ययः अन्नादयश्चणविषये अचश्चव्यग्रहे विशे

म॰सि॰
कौ॰
२५
209

षः यङोयशब्दादारभ्य लिङाशिष्यङितिङकारेण प्रत्याहारः तेषां व्यत्ययो भेदतीत्यादि रू
रूपव छंदस्युभयथा धातोरधिकारोक्तप्रत्ययः सार्वधातुकार्द्धधातुकोभयसंज्ञः स्यात् वर्द्धन
त्वा सुष्टुतयः वर्द्धयेत्विति प्राप्ते आर्द्धधातुकत्वाण्णिलोपः विशृण्विरे सार्वधातुकत्वात्
श्नुः श्रुभावश्च हुश्नुवोरिति यण् तुमर्थे सेसेनसेअसेनक्सेकसेनध्यैअध्यैन्कध्यैकध्यै
शध्यैशध्यैन्तवैतवेङ्तवेनः सेवद्ये रायः सेन् तावामेषे असे अरदोक्षावसेयाः असेनिति
कसेषेन आयुरान्नः क्से प्रेषे क्सेन् गवामिवश्रियसेश्रृंगामन्नमं अध्यै अध्यैन् ज
ठरेहणाध्यैपदेआयुदान्ते कध्यै कध्यैन् आहुवध्यै शध्यै सहमादध्यै शध्यैन्वायवे
पिवध्यै तवैदातवाउतवेङ्सूतवे तवेन् कर्त्तवे प्रैयैरोहिष्यै अव्यथिष्यै एतानिपातसे २५

ते प्रयाते रोहे अप्यधितमित्यर्थः कृत्पार्थितवैकेन्केन्यत्वतः यातोरेतेस्मः तवे प्र
न्वेतवै केन अवगांहे केन्यः विहृत्तेष्णवः त्वन कर्त्व मथितृशोःकसुन् नमर्थपुरा
क्रूरस्य विसृपोविरप्शो पुरातन्मस्मातृदः प्रकृत्यंतःपादमव्यपरे अकृपाद
दमय्यस्यपदृप्रकृत्यास्यात अति ननवकारयकारपरेअति उपप्रयेनास्रस्यरे
रुजातेअम्बस्नते अम्बस्नते अंतःपादेकिं पतासपतेर्चेति अव्यपरेकिं ते
वदन् अम्भादवद्यादचक्रमरव्रतायमवेत्ववसुश्च पशुचव्यपरेष्वेतिपदृप्रकृ
त्य वसुभिर्नोअम्यात मित्रमहो अवद्यात् मात्रिवासोअवक्रमः तेनोअवक्रमः
तेनोअव्रत शतधायअयमणिः तेनोअवंत कुशिकासोअवस्यवः सपांसुलुक

म· सि·
कौ
२१
210

पूर्वसवर्णोछेयाडाड्यायाजालः ऋजवःसंत पंथा पंथानइतिप्राप्ते परमेव्योमन्वो
मन्निहितप्राप्ते धीतीमतीसुष्टुती धीत्यामत्यासुष्टुत्याइतिप्राप्ते पूर्वसवर्णः या सुरथा
रथीतमापोभ्सुरथाविनीत्यादौप्राप्ते आ नताद्ब्राह्मणान्नतमितिप्राप्ते आत् यादेव
विद्मतात्वायमितिप्राप्ते आत् न युष्मेवाजवेयवः अस्मेइंद्राबृहस्पतीति युष्मासु अस्म
भ्यंइतिप्राप्ते शे उरुयाधृष्णुया उरुणाधृष्णुनेतिप्राप्ते या नाभापृथिव्याः नाभावि
तिप्राप्ते आल् इयाडियाजीकाराणामुपसंख्यानं उर्विया उरुणेतिप्राप्ते इया सु
क्षेत्रिया सुक्षेत्रिणेतिप्राप्ते डियाच् दृतिंनशुष्कंसरसीशयानं सरस्यामितिप्राप्ते
ई आज्जसेरसुक् देवासः ब्राह्मणासः तन्वादीनांवेयङुवङौ तन्वेपुषेम तनुवंपुषे २१

म विष्णुपश्य स्वर्गोलोकः ऋचयंवके त्रियंवकंवरेण्यं वरेण्यं अतोभिसऐसबहुलंछं
दसि अग्निर्देवेभिः मेत्रेर्याश्छादेरात्मनः आत्मनश्छन्दस्यादेर्लोपश्चाडि त्मनादेवेषु
अयोभिमासश्छंदसीतिवक्तव्ये माद्भिः शरद्भिः प्रसमुपोदः पादपूरणे पथांद्देस्तः
प्रप्रायमग्निः संसमिद्युवसेउपोपमेपरामृश किंनोदुदुहर्षसे दृष्टद्याः पुत्रदृष्टपा
रपदयपसोषेषु विसर्गस्सः स्यात् वाचस्पतिं विश्वकर्माणं दिवस्पृथायस्यूर्या
य दिवस्पृष्ठंभंदमानः तमसस्पारमस्य परवीतरूलसदे दिवस्पृथिव्योरितिषाणि रा.
यस्पोषंयजमानेषुधत्ते इतिवैदिकप्रक्रिया ॥ ॥ धातोः अंतउदात्तः स्यात् अन्नदा
त्तेपदमेकवर्जं परिभाषेयंस्वरविधिविषया यस्मिन्पदेयस्योदात्तः स्वरितोवाविधीय

ते तमेकमचं वर्जयित्वाशेषं तत्पदमनुदात्तं स्यात् गोपायतं नः अत्र सनाद्यन्ता धा
तव इति प्राप्ते याकारस्वरेणायकाराकार उदात्तः शिष्टमनुदात्तं उदात्तादनुदात्तस्य स्व
रितः इति तकाराकारः स्वरितः स्वरितात्संहितायामनुदात्तानामेकश्रुतिः स्यात्
इति नकाराकारप्रचयः अनुदात्तस्य च यत्रोदात्तलोपः यस्मिन्ननुदात्ते उदात्तो लुप्य
ते तस्योदात्तः देवीवाचं अत्र ङीबुदात्तः आद्युदात्तश्च प्रत्ययश्चाद्युदात्तः स्यात् क
र्तव्यं अनुदात्तौ सुप्पितौ पूर्वस्यापवादः यत्तस्तरनयोः उच्छ्रति शापूतियोरनुदा
त्तत्वे स्वरितप्रत्ययौ चितः अन्त उदात्तः स्यात् चितः सप्रकृतेर्बह्वकजर्थं चितिप्रत्यये
सति प्रकृतिप्रत्ययसमुदायस्यान्तोदात्तत्वाच्येत्यर्थः बह्ववत्वः तमंतामस्यके समेय

केमवरत्वंतौतन्मते तद्धितस्याविनमनहितस्यांतउदात्त पूर्वेणासिद्धेनिन्स्वरश्चायमार्थं
कौंज्ञायनाः कितः कितस्तद्धितस्यांतउदात्तिमेनयः तिन्स्वरितेक्षनूने ऽयोन्तमेरिति म
ध्यमयोनस्योयोन्तममुदात्तंस्यात् यदाहवनीये त्रिवृदादिभिस्तेन्नःयदाभिदेतस्यचादि
रुदात्तः यस्मिन्विश्वानियौंस्याःपुंसःकर्माणि ब्राह्मणादित्वात्ष्यञ् सदेदयिष्ठनस्य
नः चायतेरमन्वाचायेरन्नेष्ठसेश्चेति चकारादस्मिन्नोन्तदागमः लितिप्रत्ययात्पूर्वमु
दात्तंस्यात्चिकीर्षकः अत्रईकारस्योदात्तताऽत्यादिप्रयोगमनुसृत्याव्याख्यातव्यो इ
तिस्वरप्रक्रियाः ॥ःः॥ एषा वरदराजेनबालानामुपकारका अकारिपाणिनीयानांमध्य
सिद्धांतकौमुदी १ इतिवरदराजस्यमध्यसिद्धांतकौमुदी तस्यासंख्यान्नविज्ञेयाएव

बाणकरवह्निभिः २ इतिश्रीवरदराजभट्टकृतमध्यसिद्धांतकौमुदीसमाप्ता ॥

